REPRINT FROM THE PANDIT.

॥ श्रीः ॥

वेदार्थसंग्रहः ।

वेदान्तप्रकरणग्रन्थः ।

श्रीभाष्यकारेण श्रीमता भगवद्रा-
मानुजाचार्येण प्रणीतः ।

सत्संप्रदायाचार्यपण्डितस्वामिश्रीराममिश्रशास्त्रि-
रचितस्नेहपूर्तिव्याख्यासङ्कलितया ।

वेदव्यासापरनामधेयश्री ६ सुदर्शनसूरिप्रणीत-
तात्पर्यदीपिकाख्यव्याख्यया संवलितः ।

स· सं· पं· स्वा· श्रीराममिश्रशास्त्रिणा
संशोध्य मुद्रितः ।

VEDÁRTHA SAṀGRAHA

WITH THE GLOSS CALLED TÁTPARYADIPIKÁ

BY SUDARŚANASU'RI


EDITED WITH A COMMENTARY CALLED SNEHAPÚRTTI

BY S. SUM. P. S. RA'MA MIS'RA S'ASTRI
PROFESSOR, SANSKRIT COLLEGE, BENARES.

काश्याम् ।

मेडिकल्-हाल्-नामकमुद्रालये मुद्रयित्वा प्रकाशितः ।

१९५० वैक्रमाब्दे । १८९४ ईस्वी ।



भूमिका ।

॥ श्रीमते रामानुजाय नमः ॥

सगु*णविद्यैव विद्या, देशविशेषा†वच्छिन्नः श्रीपतिरेव प्राप्यः प्रापकश्च, तत्प्रपत्तिरेव ‡परमोपायस्सा च ज्ञानसाध्या, तच्च ज्ञानं भक्त्युपासनादिपदव्यपदेश्यं सगुणविद्यास्वरूपमेव, सर्वास्वप्युपनिषत्सु विदिनोपक्रम्योपासिनोपसंहारदर्शनादुपासिनोपक्रम्य विदिना चोपसंहरणात् । न च विद्यनुरोधादुपासिरेव विद्यर्थ इति वाच्यम् उपासनाया विशेषज्ञानरूपतया तदनुरोधेन सामान्यार्थकस्य विदेरेव तदर्थकतायाः समुचितत्वात् । एतत्तत्त्वं चान्तः प्रविश्य विवेचितमस्माभिः स्वीयब्रह्मसूत्रवृत्ताविति ततो द्रष्टव्यम् । भक्तिश्च—वर्णाश्रमाचारवता पुरुषेण परः पुमान् । विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥ इत्युक्तरीत्या न संन्यासनियता, नापि यत्किञ्चिदेकवर्णनियता, किन्तु स्वस्ववर्णाश्रमनियता । कर्माङ्गकं§ ज्ञानमेव ज्ञानं न तु नैष्कर्म्यं, नापि ज्ञानकर्मणोः समसमुच्चयः, इत्याद्यर्थजातनिरूपणपरां ब्रह्मसूत्रचतुरध्यायीं व्याख्यातृदोषदूषितामुपलभ्य सूत्रान्तरार्थनिरूपणपराः टङ्क—द्रमिड—भारुचिप्रभृतयः पूर्वोक्तार्थप्रतिपादनैदम्पर्येण वाक्य—भाष्यादिग्रन्थान् रचयाञ्चक्रुर्बौधायनीयवृत्तिमनुस-

---

* विद्ययोः परापरविभागस्तु ब्रह्मप्रापकत्व—तदप्रापकत्वाभ्यामिति सर्ववेदान्तार्थनिष्कर्षणमुखेन प्रत्यपीपदाम ब्रह्मसूत्रवृत्तिषु ।

† कौषीतक्युपनिषदि सुस्पष्टमिदम् ।

‡ स्वभ्यस्तगीतार्थाः अञ्जसा श्रद्दधते ।

§ यथाहुराचार्याः ब्रह्मप्राप्त्युपायश्च शास्त्राधिगततत्त्वज्ञानपूर्वकस्वकर्मानुगृहीतभक्तिनिष्ठा—साध्यानवधिकातिशयप्रियविशदतमप्रत्यक्षतापन्नानुध्यानरूपपरभक्तिरेवेति ॥

रन्तः । निरास्थँश्च शतधा सहस्रधा श्रुत्या युक्त्या च निर्विशेषब्रह्मवादं, नैष्कर्म्यवादं, जगन्मिथ्यात्ववादं, भक्तिनिरपेक्षज्ञानमात्रान्मोक्षवादं, विश्वस्रष्टोऽपारकल्याणगुणाकरस्य स्वाभाविकज्ञान–क्रिया–बलैश्वर्यसंपन्नस्य नैर्गुण्यवादं, सर्वात्मैक्यवादं, देवतात्मैक्यवादं, चिदैक्यवादं, चिकतुल्यतावादमित्येवमादिमोक्षप्रतिद्वन्द्विवादजातम्, अपूपुषँश्च प्रतिपिपादयिषितं वैदिकमर्थजातमिति न किंचिदवशिष्टं विशिष्टं येन ग्रन्थारम्भः सफलस्सम्भाव्येतापि । मोक्षस्य घण्टापथस्वरूपो भक्तिमार्गस्तु स्ववर्णनियताचरणप्रदर्शनपुरस्कारेण सम्यगवगमितो वकुला*भरणमुनिभिः । ते हि युगह्रासानुरूप्येण चतुर्थवर्णे स्वजनिमवलम्ब्य (शूद्रयोनावहं जातो नातोऽन्यद्वक्तुमुत्सहे) इति सनत्सुजातीये विदुरोक्तरीत्या कार्यविशेषप्रसाधनाय स्वपरिगृहीताद्द्विजयोन्यनुसारेण वेदाक्षराण्यसंगिरमाणा दध्नो घृतमिव सस्मृतीतिहासपुराणानां सशिरस्कवेदानां भवान्तराधिगतज्ञानतया वा भगवदवतारतया वा, प्रातिभप्रतिभानभासितार्थतया वा सारमुन्मथ्य सुप्राचीनद्राविडभाषयैवोपनिबबन्धुः । ता हि भवभयाभितप्ताः सारमादित्समानाः सुखमासेवन्ते, अभिदधते च–द्राविडोपनिषदः–इति ताभिरमूभिर्वेदार्थनिष्कर्षणमुखेन जिज्ञासवो द्विजाः, अद्विजाश्चोपकारमुपयापिताः । तथाऽपि बोधायनीयवृत्तेरतिविस्तरेण विलोपात्–टङ्काचार्यनिर्मितवाक्यग्रन्थस्याविस्तरतया, द्रमिडा†चार्यभाष्ये चा-

---

* वकुलाभरणपदेन श्रीशठकोपाचार्या विवक्ष्यन्ते. ते हि भगवतः श्रीकृष्णस्य–तेनाहं गुणपात्रेण श्रीनिवासेन साम्प्रतम् । शोचामि रहितं लोकं पाप्मना कलिनेक्षितम्–इति श्रीभागवतोक्तरीत्या भगवत्पादपरिष्वङ्गविमुखे पृथ्वीपरिष्वङ्गे जाते दशादिनान्यतीत्य समुत्पेदिरे रचयाञ्चक्रुश्च सहस्रगीतीः सर्वशास्त्रार्थसारगर्भा अतिप्राचीनतामिलपद्धवाच्यभाषयेति ॥

† द्रमिडभाष्यं तु सुप्राचीनमेतेभ्यः अत एव शाङ्करोपनिषद्भाष्ये सूत्रभाष्येऽपि च तन्मतमनुरणितम् ।

धुनिकानां शङ्कराचार्य-यादवाचार्य-भास्कराचार्यादिभिः स्वमत्युत्प्रेक्षितानामनल्पसार*युक्तीनामनिराकरणाद्, द्राविडोपनिषदां चातिप्राचीनभाषानिबद्धतया सर्वानुपकारकत्वाद् वेदार्थसंग्रहं नाम ग्रन्थं जग्रन्थुराचार्याः । तदिदं ग्रन्थरत्नं प्रथमतो निर्माय आचार्यास्तस्य याथार्थ्यनिर्णयाय वेङ्कटाद्रिनाथं भगवन्तं विष्णुमर्पयाञ्चक्रुः—यथोक्तं टीकाकृतैव—श्रीभाष्यकृदुपन्यस्तो यः श्रीशैलपतेः पुरः । वेदार्थसंग्रहस्यास्य कुर्मस्तात्पर्यदीपिकाम् ॥ इति, स च भगवानस्य ग्रन्थरत्नस्य सात्त्ये प्रत्यक्षतामाप इत्यलौकिकममुं व्यापारमवलोक्य तदानीन्तनैरमत्सरैराचार्यैः श्रीरामानुजाचार्याः ब्रह्मसूत्रेषु भाष्यनिर्माणाय भृशमभ्यार्थिषत । तेऽपि चासेतुहिमाचलमवञ्चलस्वप्रचारानवरुद्धसर्वदिङ्मण्डलानुपाधिवाद-मायावाद-ब्रह्माज्ञानवादान् विततगहनकुहनाकषायदुर्युक्तिभर्गान् वहुशाखप्रशाखान् बौद्धादिपक्षनिराकरणपराणां †श्व-

* इदमनल्पसारत्वाभिधानं प्राचामपेक्षया ।

† सततकलहप्रिये आस्तां केचित् श्वश्रू-स्नुषे तयोरादिमा गृहमपहाय गृहान्तरं गता तदानीमेव कश्चन भिक्षुर्भिक्षार्थी स्नुषया भिक्षां न दास्यामि याहीति प्रत्युक्तः, तेन भिक्षुणा मार्गे संमिलिता श्वश्रूर्लब्धभिक्षोऽसीति पृष्टवती स तु किनीतो नेत्युवाच, तं च सा आयाहि गृहमित्युदितवती स तु समुत्पन्नाधिकतृष्णास्तदभ्यर्थनया तया साकमेव पुनर्गृहमायातस्तदा सा श्वश्रूः स्नुषां प्रहरं यावदधिक्षिप्तवती का भवती यया ह्यस्समायातया गृहस्वाम्यकामया मयि ध्रियमाणायामेव भिक्षुः केवलं कणान् कामुकोविमुखीकृत इत्यादिदुर्वादजातं सरोषहुङ्कारमवादीत् इदं सर्वमवलोक्य समुत्पन्नाधिकभिक्षाशो भिक्षुश्चिरं तस्थौ, न च सा तं किमप्युक्तवतीति स स्वयमेव मातरहं प्रतीक्षे यावदाज्ञां भवत्या इति व्याजहार । तं चैवं वदन्तं सा परमकार्पण्या चण्डी साधो प्रभो भिक्षुवर याहि याहि क्षमस्व त्वरस्व मा विलम्बस्व नाहं भवन्तं भिक्षां दातुं प्रत्यावर्तितवती कालविलम्बक्लेशं चान्वबीभवं, किन्तु परमकृपणप्रकृतिमनभिजातां दरिद्रोदरदरीसम्भवामेनां गृहस्वाम्यकामां स्नुषां दर्शयितुं निजाधिकारवैभवं, यद् भर्तृगृहे कर्तुमकर्तुमन्यथा वा कर्तुमहमेव प्रभवामि न भवतीति । कथमसावनपनीतोद्वाहमङ्गलकङ्कणा कं चिद् भिक्षुमपि भिक्षायै नेति वदेत् नेत्यपि वदेयं चेदहं सा गृहस्वामिनीति । इदं श्वश्रूभिक्षाप्रतिक्षेपन्यायशरीरं, तदत्र बौद्धपक्षप्रतिक्षेपकृतपरिकरैः कैश्चिदाचार्यवर्यैरयमेव न्यायार्थोऽन्वकारि । बौद्धेषु योगाचाराः—इदं बाह्यं जगज्जातं क्षणिकविज्ञानात्मन्येव प्रविष्टं नेतोऽतिरिक्तो नाम कश्चनानुभवनीयोऽनुभव एव तु रूपविशेषापन्नोऽनुभवनीयतामापेत्यातिष्ठन्ते तदिदं योगाचारमतं

अभिक्षाप्रतिक्षेपप्रायाननन्यनिरसनीयानवधृत्याचार्याणां प्रार्थितार्थसिद्धये प्रसेदुः ।

स्फुटमिदमेतेन यदयं वेदार्थसंग्रहः श्रीभाष्यात्पूर्वमेव ग्रन्थित इति । श्रीभाष्ये तत्र तत्र वेदार्थसंग्रहनामोल्लेखाद्नुल्लेखाच्च वेदार्थसंग्रहे श्रीभाष्यनाम्नोऽपि चायमर्थः सिध्यति ।

यद्यपि वेदार्थसंग्रहप्रतिपाद्याः प्रतिक्षेप्याश्चार्था भगवद्भिर्यामुनाचार्यपादैः सिद्धि*त्रयेऽभिहिताः प्रतिक्षिप्ताश्च, तथाऽपि तत्रास्ति तादृशोऽर्थसंक्षेपो येन तत्र परमनिपुणानामेवोपकारसंभवो नेतरेषामिति न तेनाप्यस्य गतार्थतेत्यालोच्य जिज्ञासुजनसौकर्याय अस्यापूर्वव्युत्पादकस्य ग्रन्थस्य प्रकाशने प्रवृत्तिस्साधीयसीति । आशासे च कलावपि बलादेतेन भगवति समुत्पन्नभक्तिशेमुषीका जनाः सहसा संसारतापान् जह्युरिति ॥

हारीतान्वयसंभवस्य श्रीकेशवसोमयाजिनो द्राविडब्राह्मणस्य सुतः श्रीकान्तिमतीगर्भसंभवः श्रीमानयमस्मदीयो मुमुक्षुजनजीवातुः परमाचार्यः श्रीरामानुजाचार्यः—मेषे चैत्रे शुक्लपक्षे पञ्चम्यां गुरुवासरे । मध्याह्ने कर्कटे लग्ने नक्षत्रे रुद्रदैवते ॥ इति, रुद्रदैवते पुनर्वसौ मद्रासप्रान्ते भूतपुर्यां वेदार्थसमुद्धरणाय जनिं लेभे । आसीदसावविकलः शेष इति कृतसुकृतसहस्राः परिमृष्टमतयः श्रद्दधते ।

ब्रह्मसूत्रेषु प्रतिक्षिप्तं तदेव च कैश्चिदर्मीभिर्वैदिकवेषैर्दृष्टिसृष्टिवादं हस्तयद्भिर्हठादवलम्बितमिति परिहसन्ति सन्तः । तत्साधु समर्थितं श्वश्रूभिक्षाप्रतिक्षेपप्रायान् वादानिति । सर्वथा निर्विशेषब्रह्मवादश्च यथा माध्यमिकमर्ममनीषितमर्थजातमनुकरोति तथा प्रत्यपीपदाम ब्रह्ममीमांसासूत्रेष्विति तत्रैव द्रष्टव्यम् ।

* आत्मसिद्धिः, संवित्सिद्धिः, स्वप्रकाशसिद्धिरिति त्रयी सिद्धीनाम् ।

आचार्याणां मातुलाः श्रीरामायणार्थोपदेष्टारो गुरवश्च श्रीद शैलपूर्णाचार्याः । महापूर्णाः समाश्रयणगुरवः । गोष्ठीपूर्णा रहस्यार्थोपदेशाचार्याः । अमीषां सर्वेषामपि गुरवोभगवन्तो यामुनाचार्याः, तदाचार्याः श्रीद्राममिश्राचार्याः । तद्वाचार्याः श्रीदपुण्डरीकाक्षाः । श्रीदरामानुजाचार्यप्रणीता ग्रन्थाः—श्रीभाष्यं, वेदार्थसंग्रहः, वेदान्तसारग्रन्थः, वेदान्तदीपः, गीताभाष्यं, नित्याराधनविधिः । श्रीगद्यम्, शरणागतिगद्यम्, वृहद्गद्यमित्येते ज्ञायन्ते । श्रीदरामानुजाचार्याः कदाऽवतेरुः किमकार्षुः कस्मादपाठिषुः, के कति च तेषां शिष्या अभूवन्निति, कियन्तमनेहसमवात्सुः कुत्र चेति । कियन्तं कालं गार्हस्थ्यमवालम्बिषत, कस्य हेतोः कदा च संन्यास्यन्नित्यादि सर्वं निरूपितमस्माभिराचार्यपरिचर्यायामिति तत्र द्रष्टव्यम् ।

श्रीभाष्यस्यातिगहनगभीरार्थगर्भतया तदर्थेषु बुद्ध्यवतरणार्थं लोकसौकर्यार्थं च वेदार्थसंग्रहमुद्रणेऽपि अव्याख्यस्यास्य मुद्रणे नोद्देश्यसिद्धिर्जनानामेतदुदितार्थातिवैदेशिकत्वादित्यनुसन्धाय विधाय च मतिपङ्गूनां स्वजनसम्भवस्थलेषु वैशद्यमियं **तात्पर्यदीपिका स्नेहपूर्तिपूर्णा** जनाज्ञानतमस्तिरस्करणाय विष्णवे समर्पिता । एतस्यास्तात्पर्यदीपिकाख्यव्याख्याया रचयिता च सुप्रौढपाण्डित्योऽतिविसृत्वरस्वकीर्तिकिरणधवलीकृतसर्वदिङ्मण्डलो वेदव्यासापरनामधेयः श्रीदसुदर्शनसूरिः काञ्चीनिवास्तव्यो द्राविडब्राह्मणः—अयं च श्रीभाष्यकृतामाचार्याणां भागिनेयस्य वात्स्यकुलोद्भवस्य श्रीसुदर्शनगुरोः पौत्रस्य नाम्ना श्रीवरदाचार्यस्य शिष्यः ।

अयं च परमकृतज्ञोऽचेदमेव पर्याप्तमुदाहरणं यदसौ सर्वतन्त्रस्वतन्त्रप्रज्ञोऽपि श्रीभाष्ये **श्रुतप्रकाशिकां** नाम व्याख्यामका-

श्रीमते रामानुजाय नमः ।

सटीकस्य वेदार्थसंग्रहस्य विषयसूचनिकापत्त्रम् ।

मङ्गलं, मङ्गलश्लोकार्थनिरूपणं, प्रसङ्गतो यादव-भास्कर-
शाङ्करमतव्यावृत्तिप्रदर्शनम् ॥

* श्रीमद्यामुनाचार्यैः सिद्धित्रयेऽभिहितः ।

श्रियै नमः । श्रियै नमः । श्रियै नमः ।

श्रीमते रामानुजाय नमः ।

सटीकस्य वेदार्थसंग्रहस्य शुद्धिपत्त्रम् ।

अशुद्धम् ।	शुद्धम् ।	पृष्ठे ।	पङ्क्तौ
भगच्छ	भगवच्छ	११ ।	२३
मैकार्थ	मैकार्थ्य	१२ ।	२२
जीर्व	जीव	१५ ।	५
इत्यन्तेनेन	इत्यन्तेन	१६ ।	१८
प्रत्म	प्रत्य	२० ।	२३
स्तत्तव	स्तत्तदव	३० ।	१३
लणाद्म	लक्ष्मणा	३२ ।	२५
प्रमाणान्तरगोचरम्	प्रमाणान्तरागोचर इत्यपेक्षितं, यद्यप्येवं जातीयका अशुद्धयो बहुधा टीकायां वर्तन्ते परं तु गौड़द्राविडयावत्पुस्तकेषु तादृशपाठोपलम्भात्तूष्णीमेवाऽऽसितं मया, परं तु वस्तुतो विचारे लिङ्गव्यत्यासहेतुभूतबहुव्रीह्याद्यसम्भवस्थले गोचरशब्दस्य नियतलिङ्गतया नापुंसक्यमसङ्गतमित्येव प्रतिभाति ।	४१ ।	३
थाऽग्नि	थाऽग्नी	४२ ।	४
मुस्वा	मुखेन स्वा	४२ ।	२५
प्रतिमि	प्रमिति	४७ ।	४
सर्तृक	सकर्तृक	४६ ।	६
च्विवि	च्विर्वि	५१ ।	१६
नानाधेय	नानानामधेय	५४ ।	१०
स्मिच	स्मिचु	५५ ।	१६
दपे	दग्ने	५६ ।	१७
द्रव	द्रव्य	५६ ।	४
परा	पार	६१ ।	२३
उतरश्च	उत्तरश्च	६३ ।	१३
षष्ट	षष्टे	७१ ।	८

अशुद्धम् ।	शुद्धम् ।	पृष्ठे ।	पङ्क्तौ
रित्याद्व	रित्यादि	७१ ।	१२
त्यनि	नित्य	७१ ।	१३
प्रकाशप्रसरे	प्रकाशप्रसरेति	७४ ।	१०
विद्यत	भिद्यते	९१ ।	३
श्रुति श्रुतिश्च	श्रुतिश्च	९३ ।	१४
चिदचिनु	चिदचिचिदनु	१०२ ।	१२
क्रोधतु	क्रोधहेतु	१०३ ।	६
जनत्री	जनित्री	११३ ।	८
भयत्व	भयत्वं	११५ ।	६
प्रत्वेत्वे	प्रत्वे	११७ ।	३
शयय	शमय	११६ ।	११
नाभक्ताप	नाभक्ताय	११६ ।	टिप्पण्यां
शुश्रूवे	शुश्रूषवे	११६ ।	टिप्पण्यां
र्षं	र्षः	१३१ ।	८
स्यति	स्येति	१३५ ।	४
गौधौ	गौघा	१३८ ।	४
स्यसमानं	स्यमानं	१३८ ।	३
त्म्यान	त्म्यानव	१४६ ।	६
त्मत्वेकनो	त्मकत्वेनो	१५८ ।	११
धीत्वा	धीतत्वा	१५६ ।	६
द्रिंहि	द्रुंहि	१६२ ।	१०
ऽपिपिपा	ऽपिपा	१७२ ।	१०
रणाव	राव	१७३ ।	१०
मवग	मर्गं	१७४ ।	६
त्स्यथ	च्यर्थं	२०२ ।	१०
तश	तः श	२०२ ।	६
तावि	ताभि	२०४ ।	१
थांव	थांप	२०५ ।	४
त्वंल	त्वल	२०४ ।	४
नुसास	नुशास	२०८ ।	११
देवत्त	देवदत्त	२०६ ।	१३

अशुद्धम् ।	शुद्धम् ।	पृष्ठे ।	पङ्क्तौ
यच्छ	यच्छ	२१३ ।	६
दिभ	भ	२१३ ।	७
मिन्द्राद	मिन्द्रादिदे	२१३ ।	७
वोमा	होमा	२१३ ।	७
भगावत	भगवत	२१५ ।	११
गुपरे	गुरे	२१५ ।	३
यीय	यीयं	२१८ ।	६
ड्राक	नीक	२१६ ।	५
पर्शप	मर्शप	२२१ ।	६
वर्ता	वर्ती	२३३ ।	३
चप्प	चाप्प	२३४ ।	६
यास्त्वव	यास्त्वनव	२४६ ।	१३
स्वत्व	स्वत्वे	२५२ ।	२

इति शुद्धिपत्त्रम् । श्रियै नमः । श्रियै नमः । श्रियै नमः ।

॥ श्रीः ॥


श्रियै नमः ।

श्रीपतये नमः ।

श्रीमते रामानुजाय नमः ।

नमोनमो यामुनाय यामुनाय नमोनमः ।

नमोनमो यामुनाय यामुनाय नमोनमः ।



यस्मिँश्चिरन्तनगिरामिह तत्परत्व-

तत्तत्प्रलम्भनविमूर्छितशोकहानम् ।

आयत्तमस्ति भववारिधिपोतपादो

रामानुजार्यमुनिरेष जयत्यजस्रम् ॥

श्रियै नमः

श्रीपतये नमः ।

पूर्वाचार्येभ्यो नमः ।

नमो वेदान्तविशदीकरणदीक्षाय परमगुरवे बोधायनमहर्षये ॥

श्रीमते रामानुजाय नमः ।

भगवद्भाष्यकारेण
कृतोवेदार्थसंग्रहः ।

वेदार्थसङ्ग्रहः ।

तात्पर्यदीपिकायुक्तो
जीयात्सुमनसां मुदे ॥

अशेषचिदचिद्वस्तुशेषिणे शेषशायिने ।
निर्मलानन्तकल्याणनिधये विष्णवे नमः ॥ १ ॥

श्रीमते रामानुजाय नमः । श्रीमते हयग्रीवाय नमः ।

श्रीश्रीनिवासमहागुरवे नमः । पूर्वाचार्येभ्यो नमः ।

वरदं द्विरदाद्रिशेखरं कमलाया दयितं दयानिधिम् ।
सकलार्थिजनार्थितप्रदं प्रणमामि प्रणतार्तिहारिणम् ॥ १ ॥

कृत्वा ऽनवद्यं निगमान्तभाष्यं निराकृतं येन भयं श्रुतीनाम् ।
प्रतारितानामबहुश्रुतैस्तं रामानुजं योगिनमाश्रयामः ॥ २ ॥

श्रीभाष्यकृदुपन्यस्तोयः श्रीशैलपतेः पुरः ।
वेदार्थसंग्रहस्यास्य कुर्मस्तात्पर्यदीपिकाम् ॥ ३ ॥

अशेषेत्यादिश्लोकद्वयेन प्रारिप्सितप्रकरण*विघ्नपरिसमाप्त्यर्थं श्रोतॄणां तत्प्रसिद्ध्यर्थं च स्मृत्याचारप्राप्तं श्रुत्या मङ्गलमाचरति श्रोतृबुद्धिसमाधानार्थमादौ† प्रतिपाद्यसंक्षेपश्च क्रियते तत्रेष्टदेवतोपासनारूपम-

* शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ॥
इति पराशरोपपुराणोक्तलक्षणलक्षितः सन्दर्भविशेषः प्रकरणपदेनेह विवक्ष्यते ॥

† समाधानार्थमादौ इति पा० ।

ङ्गलाचारः स्वपक्षस्थापनरूपः प्रतिपाद्यसंक्षेपश्च श्रौत आर्थश्च क्रियते प्रथमश्लोकेन, स्वपक्षे च प्रतिपाद्यमुपायोपेयात्मकं तत्र सिद्धवस्तुस्वरूपमुपेयं चतुर्थ्यन्तैः पदैरुच्यते, नमः शब्देनोपायः सूच्यते तत्रोपेयस्य ब्रह्मण उभयविभूतिवैशिष्ट्यं पूर्व्वार्द्धेनोच्यते निर्मलेत्यादिपदेनोभयलिङ्गत्वमुच्यते तत्र विप्रतिपत्तिविषयस्य तत्त्वमसीति* वाक्यस्यार्थनिष्कर्षणमुखेन लीलाविभूतिविशिष्टत्वमुच्यते, अशेषचिदचिद्वस्तुशेषिण इति प्रथमपदेन जगद्ब्रह्मणोः सामानाधिकरण्यं शरीरशरीरिभावनिबन्धनं, शरीरत्वं च चेतनं प्रत्यनन्यार्हशेषत्वम्, एवं सामानाधिकरण्यस्य शरीरशरीरिभावनिबन्धनत्वे सति हि भेदश्रुतिभिर्घटकश्रुतिभिश्चास्य वाक्यस्याविरोधः । अशेषपदं चेतनबहुत्वं दर्शयति कतिपयचेतननियन्तृताव्यावृत्तिश्चानेन सिद्ध्यति, वस्तु—शब्देन परमार्थत्वं विवक्षितम्, अशेषवस्तुशेषिण इत्येतावताऽलं किमर्थं चिदचिच्छब्दप्रयोग इति चेदुच्यते यादवप्रकाशमते सर्वमपि चेतनमेव तत्र घटादेश्चैतन्यानभिव्यक्तिमात्रमेवेति न चिदचिद्विभाग इति तद्व्यावृत्तिश्चिदचिच्छब्दाभ्यां । किञ्च मायिमते जीवब्रह्मणोस्सामानाधिकरण्यं स्वरूपैक्यनिबन्धनम्, अचिद्ब्रह्मणोस्तु बाधार्थमिति सामानाधिकरण्यस्य नैकरूपोऽर्थ इति तद्व्यावृत्तिश्चाभिप्रेता । किञ्च भास्करमते जीवब्रह्मणोर्भेदश्रुतय औपाधिकभेदविषयाः, अचिद्ब्रह्मणोर्भेदश्रुतयः स्वाभाविकभेदविषया इति भेदश्रुत्यर्थो नैकरूपोऽभ्युपगत इति तद्व्यावृत्तिश्चाभिप्रेता ॥

निःशेष इति वक्तव्ये अकारस्य मङ्गलार्थत्वादशेषेत्युक्तम्, एवं लीलाविभूतिविशिष्टत्वमुक्तं भवति, नित्यविभूतियोगमाह शेषशायिन इति, शेषशब्दः पत्नीपरिजनादेः प्रदर्शनार्थः ताच्छील्यार्थप्रत्ययान्तत्वात् भोगविभूतिसंबन्धस्य स्वाभाविकतया नित्यत्वमभिप्रेतम् । एवमुभयविभूतिविशिष्टत्वमुक्तम् । अथोभयलिङ्गत्वमाह निर्मलानन्तकल्याणनिधय इति, निर्मलश्चानन्तश्च कल्याणनिधिश्चेति निर्मलानन्तकल्याणनिधिः† निर्गुणं निरञ्जनं । निरवद्यम् अपहत‡ पाप्मा । समस्तहेयरहितं विष्ण्वाख्यं§ परमं

* तत्त्वमस्यादिवाक्यस्येति पा· ।

† आत्मा· उ· २ ।

‡ वृह· उ· । ६२ । २१ ।

§ वि· पु· १ । २२ । ५३ ।

पदम् इत्यादिषु ब्रह्मविशेषणत्वेन निर्दोषत्वादिवाचिपदानां प्रयोगात् नैर्मल्यं हेयप्रत्यनीकत्वं निर्मलत्वमनुकूलत्वं च परिच्छिन्नेषु केषुचित्प्राकृतवस्तुष्वप्यस्तीति तद्व्यावृत्त्यर्थं सकलेतर*परित्यागपूर्व्वकप्राप्यत्वादिसिद्ध्यर्थं तदुपयोग्यानन्त्यमाह अनन्तशब्देन, अनेन वाङ्मनसनिवृत्तिरूपार्थगुणनिषेधपरिहारश्चाभिप्रेतः ॥

कल्याणशब्दोऽनुकूलवाचित्वादत्रानन्दाभिधायी, न हि प्रतिकूलोपेतेषु कल्याणशब्दप्रयोगः। यद्वा अनुकूलवेदनीयत्वात्सर्वे गुणाः कल्याणशब्दवाच्याः निर्मलकल्याणशब्दाभ्यां सामान्यविशेषाभ्यां गोबलीवर्दन्यायोऽभिप्रेतः निधिशब्देन गुणगुणिभावो विवक्षितः, अनेना†नन्दो ब्रह्मेत्यादिष्वानन्दशब्दस्यानन्दिवाचित्वं सिद्धमित्यभिप्रेतम्। आन‡न्दं ब्रह्मणो विद्वानिति व्यतिरेकनिर्देशात्, एवं हेयप्रत्यनीकत्वकल्याणगुणाकरत्वरूपोभयलिङ्गत्वं ब्रह्मण उक्तं, विष्णुशब्दो धर्मिनिर्देशकः अनेन शेषित्वमन्तर्यामित्वपर्यन्तमिति स्फोरितं रूढ्या देवताविशेषनिर्णयश्च। एवं चतुर्थ्यन्तैः पदैरुपेयवस्तु निरूपितम्। अथोपायं सूचयति नम इति मन्मना§ भव मद्भक्तो मद्याजी मां नमस्कुर्वित्यत्र मद्भक्तशब्दस्य प्रतिपदमन्वयेन नमस्याया भक्त्यन्तर्भावात् ध्यानार्चनप्रणामादिरिति हि वक्ष्यते। एवं देवतोपासनरूपमङ्गलाचारः श्रौतः कृतः प्रतिपाद्यस्वपक्षस्थापनसंक्षेपश्चार्थतः कृतः ॥ १ ॥

परं ब्रह्मैवाज्ञं भ्रमपरिगतं संसरति
तत्परोपाध्यालीढं विवशमशुभस्यास्पदमिति।
श्रुतिन्यायापेतं जगति विततं मोहनमिदन्तमो
येनापास्तं स हि विजयते यामुनमुनिः ॥ २ ॥

अथ द्वितीयेन गुरूपासनरूपमङ्गलाचारः श्रौतः क्रियते, आर्थः प्रतिपाद्ये परपक्षनिराससंक्षेपश्च क्रियते, तत्र पूर्व्वार्द्धेन परपक्षोपन्याससंक्षेपः उत्तरार्द्धेन तन्निराससंक्षेपः परं ब्रह्मैवेत्यादि, परं हेयप्रत्यनीकत्वकल्याण-

---

* सकलचेतनाचेतनेति पा॰।
† तै॰ उ॰ भृ॰ ६२।
‡ तै॰ उ॰ आन॰ ४६।
§ अ॰ १८। ६५।

गुणाकरत्वाभ्यां सर्वविलक्षणम् एवकारो विरोधं स्फोरयति संश्रितदुरितापहरत्वेन तदिष्टफलप्रदत्वेन च यदाश्रयणीयं तदेवाज्ञानपरवशं चेत्कोऽन्यो रक्षक इति भावः । अज्ञम्–अविद्यातिरोहितस्वरूपम्, अत एव भ्रमपरिगतं–विविधभेददर्शनशालि, संसरति–भेददर्शनकृतजन्मजरामरणादिसांसारिकदुःखभागीत्यर्थः एवं शङ्करमतमुपन्यस्तम् । अथ भास्करमतमुपन्यस्यते तत्परोपाध्यालीढमिति, परशब्देनोपाध्यन्तरनिरपेक्षं स्वत एव प्रस्तुतब्रह्मव्यतिरिक्तत्वमुच्यते पराभ्युपगतमिथ्याभूताविद्यान्यत्वं च विवक्षितम्, आलीढं–संबद्धं, विवशं–कर्म्मपरवशम्"। अथ यादवप्रकाशमतम् अशुभस्यास्पदमिति, अचिद्गतपरिणामार्हतारूपाशुभस्य चिद्ग*तापुरुषार्थान्वयरूपाशुभस्य चास्पदमित्यर्थः । जीवब्रह्मणोर्भेदस्य स्वाभाविकत्वाभ्युपगमात्र ब्रह्मण्यपुरुषार्थान्वय इति वैषम्यं दुर्वचम् अभेदस्यापि स्वाभाविकत्वाभ्युपगमेनापुरुषार्थान्वयादिति भावः । अचिद्ब्रह्मणोर्भेदाभेदौ स्वाभाविकौ चिद्ब्रह्मणोस्त्वभेद एव स्वाभाविकः भेदस्त्वौपाधिकः मुक्तावभेदवचनादिति भास्करमतं चिद्ब्रह्मणोरपि भेदाभेदौ स्वाभाविकौ मुक्तौ भेदस्यापि निर्देशादिति यादवप्रकाशमतं तस्मादुक्त एवार्थः, तत्राशुभस्यास्पदमिति न यादवप्रकाशमतोपन्यासः । परं ब्रह्मेत्यादिपदेन शङ्करमतोपन्यासः तत्परोपाध्यालीढमित्यादिपदेन भास्करमतोपन्यासः, इतरदर्थसिद्धमिति केचित् । तदानीमशुभस्यास्पदमित्यचिद्गताशुभास्पदत्वमुच्यते । ततोऽपि पक्षत्रयोपन्यासः इति निर्वाहो वरं कस्यचिन्मतस्यार्थसिद्धत्वादप्यवान्तरविभागस्य कल्प्यत्वोपपत्तेः । इति–शब्दः पक्षत्रयस्वरूपपरः । अथ तन्निराससंक्षेपः–

श्रुतिन्यायापेतमिति श्रुतिः–प्रमाणं, तदनुग्राहकस्तर्को न्यायः तन्मतसाधकं तर्कानुगृहीतं प्रमाणं नास्तीत्यर्थः । यद्वा श्रुतिन्यायापेतं तन्मतं प्रमाणतर्कविरुद्धं बाधकतर्कानुगृहीतं प्रमाणमस्तीति भावः । तन्निरासे किङ्कारणमित्यत्राह जगति विततमिति श्रुतिन्यायापेतमिति प्रसिद्धत्वान्न तन्निरासे यत्नः कार्य इति चेत्तत्राह मोहनमिदं तम इति, तमोऽयथार्थज्ञानावरणं, मोहनम् अपरा†मार्थे सम्यगर्थधीहेतुः अपास्तं दूरत उत्सा-

* चिद्गतापुरुषार्थयोग्यतारूपाशुभस्येति पा० । † अपार्थे इति पा० ।

रितमित्यर्थः परमतनिरासः । स हीत्यादिना गुरूपासनमुक्तं जयत्यतिबलो*राम इतिवत् स हि विजयत इत्युक्तम् । अनेन प्राकरणिकार्थस्य साम्प्रदायिकत्वमुक्तं भवति । एवमाद्ये स्वपक्षस्थापनं परपक्षप्रतिक्षेपसंक्षेपं कुर्वता देवतागुरूपासनरूपोभयविधं मङ्गलं श्रौतमाचरितं भवति तथा पूर्वैरनुष्ठितं नमस्कृत्य†हृषीकेशं नमो भगवते‡तस्मै व्यासायेत्यादिषु तथा च श्रुतिः यस्य देव §इत्यादि । अथ प्रथमश्लोकार्थमीषद्विस्तरेण वदन् प्राकरणिकमर्थं सप्रमाणकं प्रतिजानीते अशेषजगदित्यादिना ॥ २ ॥

स्वपक्षसंक्षेपः । **अशेषजगद्धितानुशासनश्रुतिनिकरशिरसि समधिगतोऽयमर्थः। जीवपरमात्मयाथात्म्यज्ञानपूर्वकवर्णाश्रमधर्मेतिकर्तव्यताकपरमपुरुषचरणयुगलध्यानार्चनप्रणामादिरत्यर्थप्रियस्तत्प्राप्तिफलः ॥**

श्रूयते नित्यमिति व्युत्पत्तिसिद्धेन श्रुतिशब्देन वेदस्यापौरुषेयत्वान्नित्यनिर्दोषत्वमभिप्रेतं, निकर—शब्देनाभिधीयमानकृत्स्नशाखार्थपर्यालोचनं विवक्षितं, तत्राप्यनन्यपरपरभागसिद्ध इति दर्शयितुं शिरः शब्दः । वक्ष्यमाणाभिप्रायेणायमर्थ इत्युक्तं, समधिगतः—सम्यगधिगतः अनधीतशाखान्तरार्थप्रतिपादकेतिहासपुराणादिभिस्सहाधिगत इत्यर्थः । जगतो मिथ्यात्वाच्च भवदभिमतोपायोपेयपराः श्रुतयः अपि तु निर्विशेषवस्तुज्ञानस्यैव मोक्षोपायत्वप्रतिपादनपरा इति शङ्कां व्युदस्यति अशेषजगद्धितानुशासनेति, जगद्धितानुशासनेति जगद्धितज्ञापनप्रवृत्तस्य वेदस्य पूर्वमेव भ्रान्ते जगति प्रत्यक्षाद्यनवगतभ्रमान्तरोत्पादकत्वमनुपपन्नमित्यभिप्रायः । हितमुपायोपेयात्मकम् अनुशासनं विविच्य ज्ञापनम् अनुपूर्वः शासिर्विविच्य ज्ञापनार्थो दृष्ट इति हि शाब्दाः अशेषजगच्छब्देन सर्वाधिकारिण उच्यन्ते । हितानुशासनपरो वेदः कथं स्वर्गाद्यपुरुषार्थं पुरुषार्थं बोधयतीति चेत् तत्तदधिकारिविशेषापेक्षया पुरुषार्थत्वमस्तीति तद्बोधनं । तर्हि श्येनेना||भिचरन् यजेतेति कथं

* रामा॰ सु॰ स॰ ४२ । ३३ । † भार॰ १ । १ । २६ ।
‡ भार॰ १ । १ । ३ । § श्वेता॰ उ॰ ५ । ३२ ४ ।
|| छा॰ उ । ६ । ६ ।

पापतममत्यन्ताहितं कर्म्म विदधातीति चेत् उच्यते तच्च भक्त्यविशेषैर्बालानिव शठान् वशीकर्त्तुं । यद्वा देवब्राह्मणहिंसकादिदुष्टनिग्रहार्थत्वेन तस्य हिततमत्वमिति । यद्वा अभिचारादिकर्म्माराध्यत्वतत्तत्फलप्रदत्वरूपभगवदैश्वर्यविशेषज्ञापनेन तदभिधायिशास्त्रस्य हितपरत्वमिति प्रथमश्लोके उपायस्यातिसंक्षेपेण सूचितत्वात्तं विस्तरेण वदन् प्रतिज्ञातस्यार्थस्य शरीरमाह जीवेत्यादिना, यद्वा याथात्म्यशब्देन तत्त्वमसीति वाक्ये त्वम्पदस्य चेतनद्वयगर्भत्वं सूचितम् । ऐतदात्म्यमिदं सर्वं तत्सत्यमिति परमात्मात्मकत्वं सत्यमुक्तं तस्माद्याथात्म्यशब्दस्यायमेवाभिप्रायः ज्ञानपूर्वकशब्देन वाक्यार्थज्ञानमात्रस्यानुपायत्वं सूचितं वर्णाश्रमधर्म्मेतिकर्त्तव्यताकशब्देन कर्म्मणो विविदिषासाधनत्वं समुच्चयवादश्च व्यावर्तितौ । परमपुरुषपदेन ध्येयस्य हेयप्रत्यनीकत्वकल्याणगुणाकरत्वाभ्यां सर्वविलक्षणत्वं देवताविशेषत्वं चोक्तं तमेवं विद्वान् नान्यः पन्था इति श्रीपुरुषसूक्तानुरोधात् चरणयुगलशब्देन स्वामिनि दास्यानुगुणा स्थितिर्दर्शिता सर्वदा चरणद्वन्द्वं व्रजामीत्यादिवचनानुगुण्यात् ध्यानार्चनप्रणामादिरित्यत्रादि-शब्देन सततङ्कीर्तयन्तोमामित्याद्युक्तकीर्तनयतनादयो विवक्षिताः ध्यानार्चनप्रणामादयः सर्वे उपासनशरीरान्तर्गताः वर्णाश्रमधर्माः प्रयाजादिस्थानीयाः आग्नेयादिषट्कस्थाने ध्यानार्चनप्रणामादिः । ध्यानं मानसं नामसङ्कीर्तनं वाचिकम् । अर्चनादि कायिकं च कर्म्म यद्यपि तत्र ध्यानस्य प्राधान्यमितरापेक्षया तथाऽपि तद्विपाकरूपपरमभक्त्यपेक्षयाऽर्चनादितुल्यव्यवहारः एवं त्रिविधमुपासनं यथा मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु सततं कीर्तयन्तो मां यजन्तश्च दृढव्रताः श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् । इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणेत्यादि मद्याजी मदर्चनपरः वेदनध्यानादिशब्दैरन्यतमोक्तावप्यर्चनप्रणामादिसहितध्यानस्योपायत्वं न्यायस्मृत्यनुगृहीतश्रुतिसिद्धं तत्र सामान्यविशेषन्यायाद्वेदनादिशब्दानां ध्यानादिपरत्वसिद्धिवत् स्मृत्यनुगृहीतत्वात् अर्चनप्रणामादिसहितध्यानपरत्वसिद्धिरित्यर्थः । तस्माद् ध्यानार्चनप्रणामादिः सर्वोऽप्युपेयविरोधिनिरासकः । अत्यर्थप्रिय इति

ध्यानार्चनप्रणामादिः सर्वोऽपि अत्यर्थप्रीतिपूर्वकः कार्यः, मन्मना भवेत्यादिवचने मद्भक्तोमन्मना भव मद्भक्तोमद्याजी भवेति प्रतिपदं मद्भक्तपदान्वयादिति भावः । एवं प्रथमश्लोकसंक्षिप्तमुपायस्वरूपं विस्तृतम् ॥

अस्य जीवात्मनोऽनाद्यविद्यासंचितपुण्यपापरूपकर्म्मप्रवाहहेतुकब्रह्मादिसुरनरतिर्यक्स्थावरात्मकचतुर्विधदेहप्रवेशकृततत्तदात्माऽभिमानजनितावर्जनीयभवभयविध्वंसनाय देहातिरिक्तात्मस्वरूप—तत्स्वभाव—तदन्तर्यामिपरमात्मस्वरूप—तत्स्वभाव—तदुपासन—तत्फलभूतात्मस्वरूपाविर्भावपूर्वकानवधिकातिशयानन्दब्रह्मानुभवज्ञापने प्रवृत्तं हि वेदान्तवाक्यजातम् ।

उपेयमाह तत्प्राप्तिफल इति, अयमर्थं इत्यर्थ—शब्दस्य विशेषणत्वात्पुँल्लिङ्गता पूर्वमुपायस्यातिसंक्षिप्तत्वेन तद्विवरणपरत्वादस्मिन् ग्रन्थे उपायप्रधाननिर्देशः । उपेयं निर्विशेषज्ञप्तिमात्रं निवर्त्यं मिथ्यारूपमविद्यादिकम् । उपायो वाक्यार्थज्ञानमात्रं, न हि मिथ्यासर्पो गरुडध्याननिवर्त्यः अपि तु नायं सर्प इति ज्ञानमात्रनिवर्त्यस्तस्माच्च भवदुक्तस्योपायतेत्यत्राह अस्येति, परमात्मैक्यानुपपत्तये तद्विरुद्धस्वभावतया प्रत्यक्षसिद्धत्वमुच्यते अस्येति पदेन, अनादिशब्देनान्योन्याश्रयः परिहृतः, श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन । अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिरित्युक्तप्रकाराऽत्राविद्याऽभिप्रेता तया सञ्चितम् अविद्यासञ्चितं अविद्यासञ्चितं कर्म्मेति हि स्मृतिः उत्क्षेपणादिव्यावृत्त्यर्थं पुण्यपापशब्दः कथं पुण्यस्याविद्यासञ्चितत्वं तद्धि देहाद्यतिरिक्तात्मज्ञानवताऽनुष्ठीयते उच्यते यथाऽऽत्मनोदेहादिविलक्षणत्वाद्देहात्मज्ञानमविद्या तद्धुता च पापं क्रियते एवमात्मनो भगवच्छेषत्वात्स्वतन्त्रात्मज्ञानमप्यविद्या तन्मूलं स्वर्गादिफलदकर्म्मानुष्ठानमिति पुण्यस्याविद्यासञ्चितत्वोपपत्तिरिति देहात्माभिमानिभिरजडत्वादिधर्म्मके आत्मनि जडत्वाध्यारोपवद् भगवदात्मक आत्मनि

स्वनिष्ठत्वारोपणं भ्रान्तिरेवेति अविद्यैव हि सा एवंविधकर्म्मप्रवाहहेतुकश्चतुर्विधदेहप्रवेशः तत्कृतस्तत्तद्देहेष्वात्माभिमानः अनात्मन्यस्वे चात्मात्मीयधिया कर्म्म कर्म्मणा शरीरप्रवेशः तच्छरीरसम्बन्धेनाविद्येति प्रवाहोऽनादिः तेनावर्जनीयं भवभयं जन्मजरामरणादिभयं मिथ्येति सहस्रकृत्वउद्घोषेणापि निवर्तयितुमशक्यमित्यभिप्रायेणावर्जनीयमित्युक्तम्, तद्विध्वंसनायेति एवं निवर्त्यमुक्तम्, अत्र जन्यजनकभावोपपादनेन प्रतीतिमात्रसिद्धत्वाभावाददृष्टद्वारा निवर्त्त्यमिति सिद्धं। देहातिरिक्तात्मस्वरूपतत्स्वभावेति स्वरूपं ज्ञानानन्दैकलक्षणं स्वभावो भगवच्छेषत्वम् उपासकत्वानुगुणौ स्वरूपस्वभावौ जीवस्योक्तौ। तदन्तर्यामिपरमात्मस्वरूपतत्स्वभावेति, तदन्तर्यामि–शब्देन जीवस्य परमात्मपर्यन्तत्वेन तद्वाचिशब्दस्य परमात्मपर्यन्तत्वमिति सिद्धं परमात्मस्वरूपम्–ईशितृत्वं स्वभावः–प्रणतसौलभ्यम् उपास्यत्वानुगुणौ स्वरूपस्वभावावीश्वरस्योक्तौ एवं सिद्धं रूपमुपेयमुक्तम्। तदुपासनशब्देनोपाय उक्तः। स पूर्वं विस्तृत इति नात्र विस्तृत उपेयस्य प्राप्तिप्रकार उच्यते तत्फलभूतेत्यादिना, ज्ञापन इति ज्ञापन–शब्देन पूर्वोक्तानुशासनशब्दस्य स्पष्टार्थः वेदान्तवाक्यजातशब्देनैकवाक्यमात्रपर्यालोचनं व्यावृत्तं, ब्रह्मानुभवज्ञापन इति निर्देशेन वेदान्तवाक्यानामुपासनारूपकार्यप्रधानत्वशङ्का व्यावृत्ता ।

तत्त्व*मसि। अय†मात्मा ब्रह्म। य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त ‡आत्मान्तर्याम्यमृतः। एष सर्वभूतान्तरात्माऽपह§तपाप्मा दिव्यो देव एको नारायणः। तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तप॥साऽनाशकेन। ब्रह्मविदाप्नोति¶ परम्।

* छा· उ· ६।८।४।
† बृ· उ· ६।४।५।
‡ भा· ३२६। माध्य· बृ· उ· ५।७।
§ सु· उ· ७।
॥ बृ· उ· ६।४।२२।
¶ तै· उ· आना।

तमेवं विद्वानमृत* इह भवति नान्यः पन्था अयनाय विद्यत इत्यादिकम् ।

उक्तार्थविषयाणि तानि वाक्यान्याह तत्त्वमसीति, षड्विधतात्पर्यलिङ्गोपेतत्वात् तत्प्रथममुक्तम् । तत्र जीवविशेषस्य ब्रह्मतादात्म्यं प्रतिपन्नमिति जीवमात्रस्य ब्रह्मात्मकत्वपरं वाक्यमाह अयमात्मा ब्रह्मेति, । अथ घटकश्रुतिमाह य आत्मनीति, देवताविशेषनिर्णयार्थमाह एष इति, उपासनस्य वर्णाश्रमधर्मेतिकर्तव्यताकत्वे प्रमाणमाह तमेतमिति, उपासमेवोपाय इत्यत्र प्रमाणमाह ब्रह्मविदिति, ब्रह्मवित्–परमपुरुषोपासकः । उपायान्तरनिषेधमाह तमेवमिति, आदि–शब्देनोपासनशब्दान्वितवाक्यानि भेदश्रुतयश्च विवक्षिताः । एषु वाक्येषु जीवपरयोः स्वरूपं कथं प्रतिपन्नमित्याकाङ्क्षायामुपबृंहणानुगृहीतश्रुतिप्रतिपन्नं तयोः स्वरूपं विवृण्वन् प्रथमं जीवस्वरूपमाह–

जीवात्मनः स्वरूपं देवमनुष्यादिप्रकृतिपरिणामविशेषरूपनानाविधभेदरहितं ज्ञानानन्दैकगुणं तस्यैतस्य कर्म्मकृतदेवादिभेदे† विध्वस्ते स्वरूपभेदो वाचामगोचरः स्वसंवेद्यः ज्ञानस्वरूपमित्येतावदेव निर्देश्यम् । तच्च सर्वेषामात्मनां समानम् ।

जीवात्मेति, तथात्मा प्रकृतेस्सङ्गादहं मानादिदूषितः । भजते प्राकृतान्धर्मानन्यस्तेभ्योऽपि सोऽव्ययः ॥ पुमान्न देवो न नरो न पशुर्न च पादपः । शरीराकृतिभेदास्तु भूपैते कर्मयोनय इत्यादिषु प्रकृतिसङ्गाद्देवादिशरीरसङ्गादप्यनेकरूपत्वदर्शनात् तदुभयवाक्यैककण्ठ्यं दर्शयन्नाह देवमनुष्यादिप्रकृतिपरिणामविशेषरूपेति, प्रकृतिपरिणामनिबन्धनो विशेषः प्रकृतिपरिणामविशेषरूपः तद्रूपः नानाविध–शब्देन बाह्यो देवमनुष्यादिष्ववान्तरभेदः आन्तरः सुखित्वदुःखित्वाद्यवान्तरभेदश्च विवक्षितः

* पु॰ सू॰ ७ । † भेदेऽपध्वस्ते इति पा॰ ।

ज्ञानानन्दैकगुणमित्यनेन निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः दुःखाज्ञानमला धर्म्माः प्रकृते*स्ते न चात्मन॥ इत्यस्यार्थो ऽभिप्रेतः ज्ञानानन्दविशेषगुणकं ज्ञानत्वानन्दत्वादिगुणकं वा न तु ज्ञानमात्रस्वरूपं ।न नु कथं देवादिभेदराहित्यं प्रत्यक्षानुमानागमैः वृथाहि प्रतिपत्तिरिति शङ्कायां प्रत्यक्षादीनि शरीरविसृष्टात्मविषयाणि निष्कृष्टात्मविषयवाक्यानि तु भेदराहित्यं वदन्तीत्यादि वदन्नभेदशङ्कां च परिहरति तस्यैतस्येति, अत्राद्वैतभ्रमास्पदानि कानिचिद्वचांसि व्याख्यातानि भवन्ति तस्येति ज्ञानानन्दैकस्वरूपत्वं विविच्चितम् एतस्येति शरीरसंबन्धोऽभिप्रेतः कर्म्मकृतदेवादिभेदे विध्वस्त इत्यनेन एकस्वरूपभेदो हि बाह्यकर्मावृतिप्रजः । देवादिभेदेविध्वस्ते नास्त्येवावरणो हि स ॥ इत्यस्यार्थो विवृतो भवति । स्वरूपभेदो वाचामगोचरः स्वसंवेद्य इत्यनेन प्रत्यस्तमितभेदमित्यादिवचनं व्याख्यातं भवति एकस्वरूपेति ग्रन्थस्यायमर्थः ज्ञानानन्दैकस्वरूपस्यात्मनो बुद्धिसुखाद्यान्तरभेदः संसारहेतुकर्म्मजन्यशरीराख्यावरणहेतुकः देवादिशरीरभेदे विनष्टे सति नात्मनो भेद आवरणो हि सः । स हि देवादिशरीरभेद आवरणः तस्मात्तन्नाशे तत्कृतभेदो नात्मनि विद्यत इत्यर्थः नात्मनावरण इति पाठान्तरेऽर्थः स्पष्टः प्रत्यस्तमितेत्यादिग्रन्थस्यायमेवार्थः प्रत्यस्तमितदेवमनुष्यादिभेदं सत्तामात्रं न तु जन्मादिविकारास्पदम् अत एवागोचरं वचसां देवादिभेदवचसां जायत इत्यादिवचसाम् अगोचरं तुक्तत्वव्यावृत्त्यर्थमाहात्मसंवेद्यमिति, तच्च स्वरूपतो धर्म्मतश्च ज्ञानं तच्च ब्रह्मशब्दाभिलप्यमित्यर्थः संसारदशायां योव्यवहारः तदगोचरं चेत् जानामीत्यपि तदानीं व्यवहारात् ज्ञानस्वरूपमित्यपि न वक्तुं शक्यं यदि शक्यं तर्हि देवादिव्यवहारश्च शक्य इत्यत्राह ज्ञानस्वरूपमित्येतावदेव निर्देश्यमिति, न ह्यौपाधिकाकारभेदे विध्वस्ते तद्वाचिशब्दागोचरत्वमिव स्वाभाविकरूपवाचिशब्दागोचरत्वमित्यर्थः सर्वशब्दागोचरं चेद्वचसामगोचरमित्यपि न शक्यते वक्तुमिति भावः । तच्च सर्वेषामात्मनां

---

* प्रकृतेस्ते तु नात्मन इति पा॰ ।

समानमित्यनेन पुमानेको व्यवस्थित इत्यादिष्वेकशब्दो व्याख्यातो भवति तन्मनस्समतालम्बिकार्थं साम्यं हि मुक्तये निर्दोषं हि समं ब्रह्मेत्यादिवचनात् ॥

एवंविधचिदचिदात्मकप्रपञ्चस्योद्भवस्थितिप्रलयसंसारनिवर्त्तनैकहेतुभूतः समस्तहेयप्रत्यनीकतयाऽनन्तकल्याणैकतानतया च स्वेतरसमस्तवस्तुविलक्षणस्वरूपोऽनवधिकातिशयासंख्येयकल्याणगुणगणः सर्वात्मपरब्रह्मपरज्योतिःपरतत्त्वपरमात्मसदादिशब्दभेदैर्निखिलवेदान्तवेद्यो भगवान्नारायणः पुरुषोत्तम इत्यन्तर्यामिस्वरूपम् । अ*स्यैव च वैभवप्रतिपादनपराः श्रुतयः । स्वेतरसमस्तचिदचिद्वस्तुजातान्तरात्मतया निखिलनियमनं तच्छक्ति–तदंश–तद्विभूति–तद्रूप–तच्छरीर–तत्तनुप्रभृतिभिः शब्दैस्तत्सामानाधिकरण्येन च प्रतिपादयन्ति ।

अथान्तर्यामिस्वरूपमाह एवंविधेति, जीवस्वरूपस्य देवादिशरीरस्य च प्रस्तुतत्वादेवं विधेत्युक्तम् । यद्वा प्रत्यक्षादिप्रमाणप्रसिद्धतयोक्तम् उद्भवेत्यादिना जगत्कारणत्वमोक्षप्रदत्वे उक्ते, स्वेतरवैलक्षण्यं तृणादेरप्यस्तीति तद्व्यावृत्त्यर्थं शोधकवाक्योक्तोभयलिङ्गत्वेन वैलक्षण्यमुच्यते समस्तेत्यादिना, कल्याणशब्द आनन्दवाची समस्तवस्तुविलक्षणस्वरूप इत्यत्र स्वरूपशब्देन विशेष्यांशोऽभिप्रेतः उपास्यत्वप्राप्यत्वोपयोगिगुणजाताभिप्रायेणाह अनवधिकातिशयासङ्ख्येयकल्याणगुणगण इति, सद्ब्रह्मात्मादिसाधारणशब्दैर्भगवन्नारायणपुरुषोत्तमाद्यसाधारणशब्दैश्चैक एवाभिधीयते इत्याह सर्वात्मेत्यादिना, भगवच्छब्देन हेयप्रत्यनीकत्वं कल्याणगुणास्पदत्वं

* तस्य चेति पा० ।

च विवक्षितं नारायणशब्देनोभयविभूतिमत्त्वं पुरुषोत्तमशब्देन विभूतिभूतचिदचिद्विलक्षणमित्यन्तर्यामिस्वरूपमित्युक्तं भवति इत्यर्थः । अयं भेदश्रुतेरर्थ उक्तः, अयं चाभेदश्रुतिविरुद्ध इति शङ्कायां तदैकार्थ्यमुच्यते अस्य चेत्यादिना अस्य—भेदश्रुतिप्रतिपन्नस्य वैभवप्रतिपादनपराः श्रुतय इति भेदश्रुत्यानुगुण्याद्घटकश्रुत्यैकार्थ्यात्सामानाधिकरण्यस्वाभाव्याच्चाभेदश्रुतयोऽपि तद्वैभवप्रतिपादिका इत्यभिप्रायः । सामानाधिकरण्यवाक्यस्य तद्वैभवप्रतिपादकत्वं कथमित्यत्राह स्वेतरेत्यादिना, अन्तर्यामिणः परमात्मनः तदेकनियाम्यत्वेन कृत्स्नस्य शरीरत्वात्तद्वाचिनः शब्दाः शरीरिपर्यन्तमभिदधतीति समानाधिकरणवाक्यैर्भिन्नप्रवृत्तिनिमित्तपदैर्व्यधिकरणवाक्यैश्च तद्वैभवमेव प्रतिपाद्यत इति सर्वश्रुतीनामैकार्थ्यमित्यर्थः तन्नियमनं प्रतिपादयन्तीत्यन्वयः परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगद्विष्णोरंशो द्विजोत्तम विष्णोरेता विभूतयः परस्य ब्रह्मणो रूपं जगत्सर्वं शरीरं ते तत्सर्वं वै हरेस्तनुः तानि सर्वाणि तद्वपुरित्यादिषु शक्त्यंशादिशब्दानां प्रयोगो द्रष्टव्यः तच्छक्तितदंश इत्यादिना प्रतिपदं तच्छब्दप्रयोगावृत्तिरेकैकस्य निरपेक्षहेतुत्वाभिप्रायेण । यद्वायं परमात्मानं प्रति यदेतज्जगच्छरीरमुच्यते तमेव प्रति तदेवेदं जगच्छक्तिरंश इति चोच्यते, अत एव पितृत्वपुत्रत्ववत्प्रतिसम्बन्धि भेदादविरोधो दुर्वचः । अत एव शरीरादिशब्दानामेकार्थपरत्वेनाविरोधे वाच्ये शरीरशब्दानुगुणं शक्त्यादिशब्दानां वर्णनीयः । अन्तरो यमयतीति लक्षणपूर्वकं शरीरशरीरिभावस्य मुख्यतयोक्तत्वात्कार्योपयोगिविशेषत्वाच्छक्तिः विशिष्टे ब्रह्मणि विशेषणतयैकदेशत्वादंशः नियाम्यतया विभूतिः व्याप्यत्वे सति नियाम्यत्वात् शरीरम् । अतस्सर्वेषामैकार्थ्यमित्यभिप्रायः शरीरतनुशब्दोपादानं दृष्टान्ताभिप्रायेण कृतं, शरीरतनुशब्दयोरिव शक्त्यादिशब्दानामविरोधो वर्णनीय इति भावः । एवं प्रथमश्लोकार्थ ईषद्विवृतः ।

शाङ्करपक्षसंक्षेपः ॥ **तस्य वैभवप्रतिपादनपराणामेषां सामानाधिकरण्यादीनां विवरणे प्रवृत्ताः केचन निर्विशेष-**

ज्ञानमात्रमेव ब्रह्म तच्च नित्यमुक्तस्वप्रकाशस्वभावमपि तत्त्वमस्यादिसामानाधिकरण्यावगतजीवैक्यं ब्रह्मैवाज्ञं बध्यते मुच्यते च निर्विशेषचिन्मात्रातिरेकीशेशितव्याद्यनन्तविकल्पस्वरूपं कृत्स्नं जगन्मिथ्या, कश्चिद्बद्धः कश्चिन्मुक्त इतीयं व्यवस्था न विद्यते, इतः पूर्वं केचन मुक्ता इत्ययमर्थो मिथ्या, एकमेव शरीरं जीववत् निर्जीवानीतराणि शरीराणि, तच्छरीरं किमिति न व्यवस्थितम् । आचार्यो ज्ञानोपदेष्टा मिथ्या, शास्त्रं च मिथ्या, शास्त्रप्रमाता च मिथ्या, शास्त्रजन्यं ज्ञानं च मिथ्या, एतत्सर्वं मिथ्याभूतेनैव शास्त्रेणावगम्यत इति वर्णयन्ति ।

अथ द्वितीयश्लोकस्य पूर्वार्द्धस्य परपक्षत्रयोपन्यासपरस्यार्थं क्रमाद्विवरिष्यन्प्रथमं मायि*मतसंग्रहं विवृणोति तस्य वैभवेत्यादि तस्यैषामिति पदद्वयस्यायमभिप्रायः। तस्य भेदश्रुतिभिः समस्तचिदचिद्वस्तुविलक्षणतया प्रतिपन्नस्य ब्रह्मणः एषां भेदश्रुत्यानुगुण्यात्सामानाधिकरण्यस्वाभाव्यात् घटकश्रुत्यैकार्थ्याच्च तद्विभवप्रतिपादनपराणामिति भावः। आदिशब्देन घटकश्रुतयो विवक्षिताः भेदनिषेधश्रुतयो वा एषां विवरणे प्रवृत्ताः केचनेत्यन्वेनविरोधः स्यादिति विरोधः स्फोरितः। केचन वर्णयन्ति इत्यन्वयः निर्विशेषज्ञानमात्रमेव ब्रह्मेति मात्रशब्देन क्वचिदंशे जडत्वव्यावृत्तिर्वा कार्त्स्न्येन ज्ञानमित्यर्थः। स यथा सैन्धवघन इति श्रुतिवाक्यार्थोऽत्राभिप्रेतः। यद्वा निर्विशेषशब्देन श्रौतनिषेधोऽभिप्रेतः तेन ज्ञातृज्ञेयस्वरूपविशेषगुणरूपविशेषाश्च निषिद्धा भवन्ति । ज्ञानशब्देन ज्ञानस्वरूपतोक्तिरूपार्थगुणनिषेधोऽभिप्रेतः ज्ञानरूपस्यैव ज्ञातृत्वं ज्ञेयत्वं च सिद्धान्तिनोऽभिमतम्

* शाङ्करमतेति पा० ।

अतस्तद्व्यावृत्त्यर्थं न दृष्टेर्द्रष्टारं यस्यामतमित्याद्युक्तज्ञातृत्वज्ञेयत्वनिषेधाभिप्रायो मात्रशब्दः एवकारेण सविशेषत्वप्रतिपादकवाक्यानामतत्त्वावेदकत्वमभिप्रेतं स्वयाथात्म्याज्ञानपूर्व्वको बन्धः स्वप्रकाशे वस्तुनि न सम्भवति इति ब्रह्म नित्यमुक्तमेवेत्यत्राह नित्येति, वस्तुतो नित्यमुक्तस्वप्रकाशमपि जीवैक्यस्य सामानाधिकरण्यवाक्यावगतत्वात् ब्रह्मैवाविद्यातिरोहितं भेदभ्रममनुभवतीति कल्प्यमत एव बन्धश्च मोक्षश्च उपपन्न इत्यर्थः । जीवैक्यं श्रुतिसिद्धमभ्युपगतं चेच्छ्रुतिसिद्धेश्वरेशितव्यादिभेदोऽभ्युपगन्तव्य इत्यत्राह निर्विशेषेति, अद्वैतवाक्यबलेन तेषां वाक्यानां मिथ्याविषयत्वमाश्रयणीयमित्यर्थः । बद्धमुक्तव्यवस्थासिद्ध्यर्थमात्मभेदोऽभ्युपगन्तव्य इत्यत्राह कश्चिदिति, बद्धमुक्तव्यवस्था श्रुतिसिद्धत्वादङ्गीकार्या शुकादयो हि मुक्ता इत्यत्राह इतः पूर्वमिति, चेष्टादिभिः सर्वशरीराणामात्मवत्त्वं सिद्धं तथा सति सुखदुःखादिव्यवस्थायां चात्मनि भेदेन मोक्षबन्धव्यवस्था स्यादित्यत्राह एकमेव शरीरमिति, जीवैक्ये सर्वशरीराणां सजीवत्वाभावात्सुखादिप्रतिसन्धानाभाव इत्यर्थः । एकस्य सजीवत्वं चैक्योपदेशबलात्स्वीकृतम् । एकमेव शरीरं सजीवं चेत्तच्छरीरको जीवः श्रवणमननादिभिर्बुद्धाद्वैतज्ञानः स्यादिति बन्धोन स्यादित्यत्राह तच्छरीरं किमिति न व्यवस्थितमिति, इदं शरीरं सजीवम् एतच्छरीरको जीवो ज्ञानवानिति निश्चेतुमशक्यमित्यर्थः । शिष्याचार्य्यव्यवस्थायामात्मबहुत्वं स्यात् शास्त्रस्य च प्रामाण्याद्ब्रह्मव्यतिरिक्तं सत्यं स्यादित्यत्राह आचार्य इति, प्रमाता श्रोता विवक्षितः एकैकमेव निरपेक्षं दूषणमिति ज्ञापनाय मिथ्याशब्दावृत्तिः । इति वर्णयन्ति इति वर्णनशब्देन ग्रन्थप्रपञ्चोऽर्थदौस्थ्यञ्च विवक्षितम् ॥

भास्करपक्षसंक्षेपः । **अपरेऽपहतपाप्मत्वादिसमस्तकल्याणगुणोपेतमपि ब्रह्मैतेनैवैक्यावबोधेन केनचिदुपाधिविशेषेण संबद्धं बध्यते मुच्यते च नानाविधमलरूपपरिणामास्पदं चेति व्यवस्थिताः ॥**

अथ द्वितीयश्लोकपूर्वार्द्धस्थभास्करमतोपन्याससंग्रहं च विवृणोति अपर इत्यादिना, विवरणे प्रवृत्ता इत्यनुवर्तते अपरे व्यवस्थिता इत्यन्वयः प्रमाणसिद्धस्य बाधायोगात्सगुणत्वं तैरभ्युपगतमित्याह अपहतपाप्मत्वादीति, । स्वतोऽपहतपाप्मत्वादियुक्तमपि ऐक्योपदेशान्यथाऽनुपपत्त्या उपाधिसम्बन्धोऽभ्युपगत इत्याह तेनैवेति, ऐक्यावबोधेन व्यवस्थिता इत्यन्वयः केनचिद्देवमनुष्याद्युपाधिष्वन्यतमेन तथा सति बन्धमोक्षव्यवस्थाऽप्युपपद्यत इत्याह बध्यते मुच्यते चेति, बध्यते—संसरति, एवं जीवत्वं ब्रह्मण उक्तम्। अथाचिद्रूपपरिणाममाह नानाविधेति, मलरूपशब्दो दोषरूपत्वपरः ।

यादवपक्षसंक्षेपः । **अन्ये पुनरैक्यावबोधयाथात्म्यं वर्णयन्तः स्वाभाविकनिरतिशयापरिमितोदारगुणसागरं ब्रह्मैव सुरनरतिर्यक्स्थावरनारकिस्वर्ग्यपवर्गिचेतनैकस्वभावं स्वभावतोविलक्षणमविलक्षणं च वियदादिनानाबिधमलरूपपरिणामास्पदं चेति प्रत्यवतिष्ठन्ते ।**

अथ यादवप्रकाशमतसंग्रहं विवृणोति अन्ये पुनरित्यादिना, ऐक्यावबोधेति याथात्म्यं वर्णयन्त इत्युपालम्भः । यथाऽचिद्ब्रह्मणोः जीवब्रह्मणोश्चैक्यमेकरूपं प्रतिपन्नं तथाभेदोऽप्येकरूपः प्रतिपन्न इति अचिद्ब्रह्मणोर्भेदस्य स्वाभाविकत्वं जीवब्रह्मणोर्भेदस्यौपाधिकत्वं च न वाच्यमुभयत्र भेदः स्वाभाविक इति वर्णयन्त इत्यभिप्रायः तत्रापि सगुणत्वाङ्गीकारमाह स्वाभाविकेति, अपरिमितत्वम् असंख्येयत्वम् उदार उत्कृष्टः प्रशस्यः तादृशो गुणसागरो गुणगणो यस्येति बहुव्रीहिः जीवगताचिद्गताशुभास्पदत्वमाह सुरनरेति, स्पष्टं तत्रेत्यादिना द्वितीयश्लोकोत्तरार्द्धोक्तपरपक्षप्रतिक्षेपसंक्षेपं विवृणोति श्रुत्यर्थपर्यालोचनपरा इति, पर्यालोचनं परित आलोचनम् अभेदभेदघटकसमानाधिकरणश्रुतितत्पौर्वापर्याद्यालोचनपराः । न त्वेकवाक्यमात्रतृप्ता इत्यर्थः । उदाहरन्ति भगव*द्यामुनाचार्या इति शेषः ॥

* सिद्धित्रये

तत्र प्रथमपक्षस्य श्रुत्यर्थपर्यालोचनपरा दुष्परिहरान् दोषान् उदाहरन्ति तथा हि प्रकृतपरामर्शितच्छब्दावगतस्य ब्रह्मणः स्वसंकल्पकृतजगदुदयविभवविलयादयः तदैक्षत बहु स्यां प्रजायेयेत्यारभ्य सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा इत्यादिभिः पदैः प्रतिपादिताः तत्संबन्धितया प्रकरणान्तरनिर्दिष्टाः सर्वज्ञता–सर्वशक्तित्व–सर्वेश्वरत्व–सर्वप्रकारत्व–समाभ्यधिकनिवृत्ति–सत्यकामत्व–सत्यसंकल्पत्व–सर्वावभासकत्वाद्यनवधिकातिशयासंख्येयकल्याणगुणगणा अपहतपाप्मेत्याद्यनेकवाक्यावगतनिरस्तनिखिलदोषता च सर्वे तस्मिन् पक्षे विहन्यन्ते ।

तत्र प्रथमं तत्त्वमसीति वाक्यस्य निर्विशेषपरत्वे अनेकदूषणानि विवक्षन् पूर्वं तच्छब्दावगतगुणजा*तमाह प्रकृतेत्यादिना, प्रकृतपरामर्शीति पदं हेतुगर्भं तच्छब्दो, गुणविशिष्टवाची प्रकृतपरामर्शित्वादित्यर्थः कथं गुणानां प्रकृतत्वमित्यत्राह स्वसंकल्पेति, आदिशब्देनानुप्रवेशनामरूपव्याकरणादयो गृह्यन्ते जगदुदयविभवविलयादय एव तत्तद्वाक्यप्रतिपन्नतया विशेष्यन्ते तदैक्षतेत्यादिभिः पदैः प्रतिपादिता इत्यन्तेनेन तत्प्रकरणाधीतगुणा उक्ताः सर्वशाखाप्रत्ययन्यायेन प्रकरणान्तराकृष्टान् गुणानाह तत्संबन्धितयेति, कारणवस्तुसंबन्धितया प्रकरणान्तरोक्तागुणा गण्यन्ते सर्वज्ञतेत्यादिना यस्सार्वज्ञस्सर्ववित् परा†ऽस्य‡ शक्तिर्विविधैव श्रूयते ईशनाय स ईशो§ऽस्य

* गुणबाधमाहेति पा० । † यस्सर्वज्ञस्सर्ववित्–मु० उ० । १ । १ । १० ।
‡ श्वे० उ० ६ । ६ ।
§ श्वे० उ० ५ । ४

जगतो नित्यमेव नान्यो हेतुर्विद्यते ईशनाय न तत्समश्चा*भ्यधिकश्च दृश्यते सत्यकामः† सत्यसंकल्पः तस्य भासा‡ सर्वमिदं विभाति इत्यादि-वाक्येष्वमी सर्वज्ञतादि गुणा द्रष्टव्याः । एकैकमनवधिकातिशयाः कल्याण-गुणा असंख्येया इत्याह अनवधिकेति, हेयप्रत्यनीकत्वमाह अपहतपाप्मे-ति, अमी गुणास्सर्वे सृष्ट्युपयोगित्वेन प्रकरणान्तरोक्ता आकृष्टा भवन्ति समाभ्यधिकनिवृत्तौ सत्यां तदेककारणत्वसिद्धिः सर्वावभासकत्वं च । सृष्टजगत्स्थित्युपयोगित्वेन कारणत्वापेक्षितं हेयप्रत्यनीकत्वं च सर्गाद्यु-पयोगिहेयास्पदत्वे कर्म्मवश्यत्वेन स्वातन्त्र्यादिभङ्गप्रसङ्गात् ते सर्वे तच्छ-ब्दावगता विहन्यन्त इत्यर्थः ।

अथ स्यात् उपक्रमेऽप्येकविज्ञानेन सर्वविज्ञान-मुखेन कारणस्यैव सत्यतां प्रतिज्ञाय तस्य कारणभूत-स्यैव सत्यतां विकारजातस्य चासत्यतां मृद्दृष्टान्तेन दर्शयित्वा सत्यभूतस्यैव ब्रह्मणः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति सजातीयविजातीयनि-खिलभेदनिरसनेन निर्विशेषतैव प्रतिपादिता, एत-च्छोधकानि प्रकरणान्तरगतवाक्यान्यपि सत्यं ज्ञान-मनन्तं ब्रह्म निष्कलं निष्क्रियं निर्गुणं निरञ्जनं विज्ञा-नमानन्दमित्यादीनि सर्वविशेषप्रत्यनीकाकारतां बो-धयन्ति,

अथ स्यादित्यादि, उपक्रमशब्देनोपक्रमोपक्रमो विवक्षितः तत्त्वमसीति वाक्यापेक्षया तदैक्षतेति वाक्यस्योपक्रमत्वेऽपि त्वेकविज्ञानेन सर्वविज्ञा-प्रतिज्ञावाक्यं तस्याप्युपक्रमभूतमित्यभिप्रायः । एकविज्ञानेन सर्वविज्ञान-प्रतिज्ञामुखेन कारणस्यैव सत्यतां प्रतिज्ञायेति, एकविज्ञानेन सर्वविज्ञान-

* छ· उ· । ८ । ७ १ ।   † श्वे· उ· ६ । ७ । ३ ।
‡ क· उ· । २ । ५ । १५ ।

द्वारा एकविज्ञानेन सर्वविज्ञानप्रतिज्ञया कारणस्यैव सत्यत्वं फलितमित्यर्थः । कारणस्यैव सत्यत्वं दृष्टान्तवाक्ये कण्ठोक्तमित्याह तस्येति, । दार्ष्टान्तिकवाक्येऽपि निर्विशेषपरत्वमुक्तमित्याह सत्यभूतस्येति, । निखिलभेदशब्देन स्वगतभेदोऽविवक्षितः विजातीयभेदान्तर्गतत्वात्स्वगतभेदस्य । शोधकवाक्यानामपि निर्विशेषपरत्वमाह एतदिति, एतच्छोधकानि कारणवाक्यावगतस्य शोधकत्वात् तदैकार्थ्येन निर्विशेषपराणीत्यर्थः । सामानाधिकरण्यस्वाभाव्यात् *निर्गुणमित्यादिशोधकवाक्यान्तरैकार्थ्याच्च सत्यं †ज्ञानं विज्ञानमानन्दमित्यादीनि शोधकवाक्यानि निर्विशेषपराणीत्यभिप्रायेणाह सत्यं ज्ञानमिति, । सत्यादिपदानां निर्विशेषपरत्वे प्रवृत्तिनिमित्तभेदाभावात् सामानाधिकरण्यलक्षणहानिरित्यत्राह सर्वविशेषप्रत्यनीकेति, ।

न चैकाकारताऽवबोधे पदानां पर्यायता एकत्वेऽपि वस्तुनः सर्वविशेषप्रत्यनीकाकारत्वोपस्थापनेन सर्वपदानामर्थवत्त्वादिति । नैतदेवम् एकविज्ञानेन सर्वविज्ञानं सर्वस्य मिथ्यात्वे सर्वस्य ज्ञातव्यस्याभावान्न सेत्स्यति सत्यमिथ्यात्वयोरेकताप्रसक्तिर्वा, अपि त्वेकविज्ञानेन सर्वविज्ञानप्रतिज्ञा सर्वस्य तदात्मकत्वेनैव सत्यत्वे सिद्ध्यति,

प्रतियोगिविशे‡षाः प्रवृत्तिनिमित्तानीत्यर्थः । तर्हि तद्व्यावृत्तिरूपधर्मः स्यादित्यत्राह एकाकारतामिति, आकारशब्दः स्वरूपवाची स्वरूपमेव व्यावृत्तिरिति भावः । निर्विशेषवस्तुपरत्वे पदानां पर्या§यता स्यादिति पर्यायत्वशङ्कां परिहरति न चेति, । कुत इत्यत्राह एकत्वेऽपीति, अर्थवत्त्वात्—प्रयोजनवत्त्वात् । अथ सिद्धान्त||माह नैतदे-

* छा॰ उ॰ । ६ । २ । १ । † तै॰ आ॰ । १ । ३ । ‡ प्रतियोगिभेदा इति पा॰ ।
§ समानशक्यतावच्छेदककत्वे सति विभिन्नशक्ततावच्छेदककत्वं पर्यायत्वम् ।
|| सिद्धान्त्याहेति पा॰ ।

त्वमिति, एकविज्ञानं सर्वविज्ञानं च किमेकं ज्ञानम्? उत ज्ञानद्वयम्? । एकत्वपक्षे किमेकविज्ञानेन सर्वविज्ञानं सर्वस्याभावादुच्यते, उतैकस्य सर्वस्य च तादात्म्यादिति विकल्पमभिप्रेत्य प्रथमं दूषयति एकेति, एकेत्यादि स्पष्टं न सेत्स्यति इति सर्व-शब्दस्य सर्वाभाववाचित्वाभावादिति भावः । द्वितीयं दूषयति सत्येति, सत्यमिथ्यात्वयोरेकताप्रसक्तिर्वेति जगतः सत्यत्वं ब्रह्मणो मिथ्यात्वं वेत्यर्थः । द्विती*यपक्षे च एकविज्ञानेन सर्वविज्ञानं स्थालीपुलाकन्यायेन सर्वस्यैकसाधर्म्याद्यदि स्यात् तत् त्वन्मते न युक्तं कार्यस्या†सत्यत्वात् एकवैधर्म्याद्वा स्यात् देवदत्तप्राधान्यज्ञानेनेतरेषामप्रधानतया ज्ञातत्ववत् तदानीं त्वन्मते मिथ्यात्वेनेत्याध्याहारः स्यात् । ज्ञातव्या‡भावेन निवृत्तिलक्षणा वा स्यात् ज्ञानद्वयवैरूप्यादस्वारस्यं चेत्यभिप्रायः । अपि त्विति । न हि घटपटयोः सत्यत्वेऽपि घटज्ञानेन पटो ज्ञातो भवतीति तद्व्यावृत्त्यर्थमाह सर्वस्य तदात्मकत्वेनैव सत्यत्व इति, ब्रह्मात्मककत्वेनैव सत्यत्व इत्यर्थः । न हि कारणावस्थे ब्रह्मणि ज्ञाते कार्य्यावस्था ज्ञाता भवतीति चेदुच्यते न हि विशेषणान्तरविशिष्टाकारेण विशेषणान्तरान्वयः अपि त्वेकस्मिन्धर्म्मिणि विशेषणद्वयान्वयो विवक्षितः, तस्मान्न ज्ञातत्वविशिष्टाकारेण सर्वत्वं सर्वत्वविशिष्टाकारेण ज्ञातता वा किंतु सर्वत्वं ज्ञातत्वं चैकाश्रयवर्त्तिनी इति, अवस्थानवगमेऽपि धर्म्मिण ऐक्येन ज्ञाततया प्रयोगो मुख्य एव दृष्टः सोऽयं देवदत्तः पूर्व्वमेव मया ऽयं ज्ञात इत्यादिषु, न हि तत्र वर्तमानकालविशिष्टत्वेन पूर्वं ज्ञातः तस्मात्परिषद्दर्शनेनामी पुरुषा दृष्टा इतिवदिदमुपपन्नम् । एकस्य सत्यत्वज्ञानेन व्यतिरिक्तं मिथ्यात्वेन ज्ञातं भवतीति चेन्न येनाश्रुतं§श्रुतं भवतीत्यादिषु वाक्येषु मिथ्यात्वेनेत्यध्याहारः एकविज्ञानस्य सर्वविज्ञानस्य च वैरूप्यम् अमुख्यत्वं च ज्ञात्रभावात्, न हि सर्वं मिथ्यात्वेन जानन् क्वचित् कश्चिज्ज्ञाताऽस्ति तस्मात्सर्वविज्ञानशब्देन सर्वज्ञानिवृत्तिलक्षणा स्यादिति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञावाक्यं किं तदात्मकत्वेनैव सत्यत्वं कथं

* द्वित्वपक्षे चेति पा० ।
† कार्यस्यासामान्यादिति पा० ।
‡ ज्ञातृज्ञेयाभावेनेति पा० ।
§ छा० उ० । ६ । १ । २ ।

तथा सति कथं प्रतिज्ञोपपत्तिः उपक्रमवाक्यं सत्यत्वपक्षानुगुणमपि तदु-पसंहारापेक्षया प्रबलं न तु महावाक्यस्वारस्यापेक्षया, महावाक्यं च मिथ्यात्वपक्षानुगुणं तत्त्वमसि मृत्तिकेत्येव सत्यं सदेवैकमेवेत्यादिषु तथा प्रतीतिरिति शङ्कायामाह अयमर्थ इति, प्रतिज्ञावाक्योपक्रमभूतं स्तब्धोऽसीति वाक्यमारभ्य व्याख्यातुं स्तब्धोऽसीति श्रूयमाणमध्यमपुरु-षार्थदा*व्यार्थमाह श्वेतकेतुं प्रत्याहेति,

अयमर्थः श्वेतकेतुं प्रत्याह स्तब्धोऽस्युत तमादेश-मप्राक्ष्य इति परिपूर्ण इव लक्ष्यसे तानाचार्यान्प्रति तमप्यादेशं पृष्टवानसीति आदिश्यतेऽनेनेत्यादेशः आदेशः–प्रशासनम्, एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादिभिरैकार्थ्यात्,

स्तब्धोऽसीत्यादिश्रुतिवाक्योपादानं तत्र वाक्ये स्तब्धोऽसीत्यस्यार्थ-माह परिपूर्ण इव लक्ष्यस इति, प्रच्छ इति धातुर्द्विकर्म्मकः वक्तृकर्म्मकः वाच्यकर्म्मकश्चेति तत्रादेशशब्दाभिहितं वाच्यं कर्म्मेति दर्शयितुं ताना-चार्यान् प्रतीति वक्तृकर्म्म व्याहृतं न वै नूनं भगवन्तस्त एतदवेदिषुर्यद्ध्येत-दवेदिष्यन्कथं मे नावक्ष्यन्निति तच्छब्दनिर्दिष्टा आचार्या अत्र स्मारिताः, तानिति बहुवचनेन तमादेशमिति तच्छब्दस्याचार्यविषयत्वशङ्काव्युदासः। तमपीति श्रोतुर्दुर्ल्लभमित्यपि–शब्दाभिप्रायः । कर्म्मादि श्रोतव्यान्त-रसमुच्चयो वा ऽभिप्रेत इति श्वेतकेतुं प्रत्याहेत्यन्वयः । आदेशशब्दं व्याचष्टे आदिश्यत इत्यादिना, आदिश्यतेऽनेनेत्यादेश इति प्रत्ययार्थव्याख्यानम्। आदेशः प्रशासनमिति प्रकृत्यर्थव्याख्यानं, तत्र अकर्तरि च कारके संज्ञा-यामिति घञः कर्तृव्यतिरिक्तकारके विहितत्वाद्ब्रह्मणश्च प्रशासने कर्तृ-त्वादुपदेशकर्म्मत्वोपपत्तेश्च प्रकृत्यर्थः उपदेशः प्रत्ययार्थः कर्म्म चेति परै-र्व्याख्यातं तत्र प्रकृत्यर्थास्वारस्यं प्रत्ययार्थस्वारस्यम्, अस्मत्पक्षे प्रकृत्यर्थ-स्वारस्यं प्रत्ययार्थास्वारस्यं कर्तृव्यतिरिक्तकारकविषयस्य घञः कथं कर्त्र-

* स्याध्यार्थमाहेति पा॰ ।

र्थत्वं विवक्षातः कारकाणि भवन्तीति न्यायेन कर्तुरेव करणान्तरनिरपेक्षत्वलक्षणेन करणसाधर्म्यरूपेण साधकतमत्वेन करणत्वविवक्षया घञ्प्रत्यय उपपद्यते, एतदभिप्रायेण हि आदिश्यतेऽनेनेत्युक्तं न त्वादिशतीति, विवक्षया कारकप्रवृत्तिश्चेदकर्त्तरीति विधानस्य किं प्रयोजनं स्वतः प्राप्त*स्य कर्तृव्यतिरिक्तकारकस्य कर्तरि करणत्वादिविवक्षया कर्त्रर्थत्वमस्वरसमिति विभागः प्रयोजनं सूत्रस्य प्रयोजनवत्त्वेऽपि स्वारस्यमस्वारस्यं च तुल्यं चेत् किमनेन योजनान्तरेणेति चेत् उच्यते परपक्षे प्रत्ययार्थस्यैव स्वारस्यमस्मत्पक्षे तु स्वारस्यद्वयमस्ति अर्थस्वारस्यं शब्दस्वारस्यं चेति प्रकृत्यर्थस्वारस्यं तावत् सिद्धं विवक्षितविशेषणस्यासाधारणाकाराभिधानं स्वतः प्राप्तं सर्वप्रशासितृत्वं ब्रह्मासाधारणधर्म्मः, उपदेश्यत्वं तु कर्म्मस्वरूपादेः साधारणं किंचापेक्षितविधेरनपेक्षितविधानं दुर्बलमिति न्यायादत्रावश्यापेक्षितप्रशासितृत्वज्ञापनमेव युक्तं नानपेक्षितोपदेश्यत्वज्ञापनं तस्माच्छब्दस्वारस्यमर्थस्वारस्यं चेति स्वारस्यद्वयविभवादयमेवार्थः । ब्रह्मणः कृत्स्नप्रशासितृत्वे सिद्धे हि तदत्रासाधारणाकारतया वक्तव्यं तत्र किं प्रमाणमित्यत्राह एतस्य वा इति, ।

तथा च मानवं वचः प्र†शासितारं सर्वेषामित्यादि, अत्राप्येकमेवेति जगदुपादानतां प्रतिपाद्य अद्वितीयपदेनाधिष्ठात्रन्तरनिवारणादस्यैवाधिष्ठातृत्वमपि प्रतिपाद्यते, अतस्तं प्रशासितारं जगदुपादानभूतमपि पृष्टवानसि येन श्रुतेन मतेन विज्ञातेनाश्रुतममतमविज्ञातं श्रुतं मतं विज्ञातं भवति इत्युक्तं स्यात्, निखिलजगदुदयविभवविलयादिकारणभूतं सर्वज्ञत्व–सत्यकामत्व-सत्यसंकल्पत्वाद्यपरिमितोदारगुणसागरं किं ब्रह्म त्वया श्रुतमिति हार्दो भावः,

* स्वतः प्राप्तत्वमिति पा· । † मनुस्मृ· । १२ । १२२ ।

स्मृतिमाह प्रशासितारमिति, न केवलं श्रुत्यन्तरेष्वेव प्रशासितृत्वप्रसिद्धिः अस्मिन्प्रकरणेऽपि सिद्धमित्याह अत्रापीति, अधिष्ठातृत्वं हि प्रेरकत्वं तच्च प्रशासितृत्वमिति तत्फलितमित्यर्थः, एवमादेशशब्दार्थ उक्तः । अथ तच्छब्दं च विशृङ्खलवाक्यार्थं च योजयति अत इति, येन विज्ञातं भवति तं पृष्टवानसीत्यन्वयः, येन श्रुतेन मतेन विज्ञातेनेत्यध्याहारेण योजनायाः को हेतुः । उच्यते न हि ब्रह्मणः सत्तया कृत्स्नं ज्ञातं भवति अपि तु तद्विज्ञानेनैव विज्ञातं भवतीति वस्तुसामर्थ्यात् । किंच दृष्टान्तेऽपि न हि मृत्पिण्डसत्तया घटादिर्विज्ञातो भवति अपि तु तद्विज्ञानेनेति दृष्टान्तसामर्थ्यात् । किंच आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञातं स्यात् कस्मिन् नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति इत्यादिश्रुत्या च, एवं दृष्टान्तसामर्थ्यात् दार्ष्टान्तिकसामर्थ्याच्च श्रुत्यन्तरकण्ठोक्त्या चैवं व्याख्यातमित्युक्तं स्यादिति कण्ठोक्त्या चाभिप्रेततया चायमेवास्याः श्रुतेरर्थ इत्यभिप्रायः । नन्वस्मिन्वाक्य उपादानत्वं हि न कण्ठोक्तं किं तु फलितं कारणत्वं ज्ञातत्वं च न कण्ठोक्तम् अत्र जगत्कारणत्वाद्यभिप्रायस्य किं प्रयोजनमित्यपेक्षायामाह निखिलजगदिति, श्रुत्यन्तरेषु यतो वा इमानि इत्यादिवाक्येषु जगत्कारणत्वलक्षणकं ब्रह्मावगतं तस्मादत्र जगत्कारणत्वगर्भं वदतः पितुस्त्वया किं ब्रह्म श्रुतमित्यभिप्राय इत्यर्थः ।

तस्य निखिलकारणतया कारणमेव नानासंस्थानविशेषसंस्थितं कार्य्यमित्युच्यत इति कारणभूतसूक्ष्मचिदचिद्वस्तुशरीरकब्रह्मविज्ञानेन कार्यभूतमखिलं जगद्विज्ञातं भवतीति हृदि निधाय येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं स्यादिति पुत्रं प्रति पृष्टवान् पिता, तदेतत् सकलस्य वस्तुजातस्यैककारणत्वं पितृहृदि निहितमजानन्पुत्रः परस्परविलक्षणेषु वस्तुष्वन्यस्य विज्ञानेन तदन्यविज्ञानस्याघटमानतां बुद्ध्वा

अप्राक्ष्य इति प्रश्नोक्तिः तत्पूर्वकश्रवणाभिप्रायेणेत्याशयत्रानाह त्वया श्रुतमिति, नात्र ब्रह्मेति कण्ठोक्तं, तस्मात् जगत्कारणत्वान्तर्भावप्रयोजन-ब्रह्मश्रवणप्रश्नः क्लृप्तो भवतीति सर्वज्ञत्वादिगुणाःकारणत्वोपयोगितयोक्ताः सृष्ट्यादयः परिपूर्णस्यैव लीलाः, अतस्सत्यकामत्वस्य कारणत्वोपयोगः। हार्दो भावः—हृदि निहितं तात्पर्यमित्यर्थः। कारणत्वे सत्यप्येकविज्ञानेन सर्वविज्ञानं नोपपद्यते कारणात्कार्यस्य द्रव्यान्तरत्वात्कारणत्वं च नोपपद्यते तथा सति ब्रह्मणोहेयास्पदत्वप्रसङ्गात्कारणत्वोपपत्तावप्येकविज्ञानेन सर्वविज्ञानं नोपपद्यते नानाजातीयकार्याणां नानाजातीयकारणकत्वदर्शनादित्यत्राह तस्येति, तस्य निखिलकारणतया कार्यभूतमखिलं जगद्विज्ञातं भवतीत्यन्वयः। कारणात्कार्यस्यानन्यत्वमाह कारणमेवेति, नानासंस्थानविशेष-संस्थितं—संस्थानविशेषविशिष्टमित्यर्थः। सूक्ष्मचिदचिद्वस्तुशरीरशब्देन ब्रह्मणोहेयास्पदत्वप्रसङ्गः परिहृतः। निर्वेदादुपसन्नाय वक्तव्यमर्थं स्वयमेव कथं वदतीत्यत्राह पुत्रं प्रति पृष्टवान् पितेति, पुत्रव्यतिरिक्तानां शुश्रूषाद्यपेक्षा पुत्रस्य तु पुत्रत्वमेव ब्रह्मोपदेशहेतुरिति शास्त्रार्थः सूचितः। पुत्र-पितृशब्दाभ्यामुद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच तं ह पितोवाचेति श्रुतिवाक्यं स्मारितम्, अनन्तरमिदं वाक्यं कथं नु भगवस्स आदेश इति इदं किं प्रश्नरूपम्? उत चोद्यरूपमिति संशये चोद्यपरमिति व्याचष्टे तदेतदित्यादिना, प्रतिवचनप्रकारेण प्रश्नार्थो विज्ञायते प्रतिवचने यथा सोम्यैकेनेत्यादिना दृष्टान्तैरुपपादनादिदं चोद्यरूपमित्यभिप्रायः। परिचोदयति इति—विवक्षितविशेषकण्ठोक्तिमकुर्वन् सामान्येन चोदयतीत्यर्थः।

परिचोदयति कथं नु भगवः स आदेश इति परिचोदितः पुनस्तदेव हृदि निहितं ज्ञानानन्दामलत्वैकस्वरूपम-परिच्छेद्यमाहात्म्यं सत्यसंकल्पत्वमिश्रैरनवधिकाति-शयासंख्येयकल्याणगुणगणैर्जुष्टमविकारस्वरूपं परं ब्रह्मैव नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुशरीरं

स्वलीलयैव स्वसंकल्पेनानन्त–विचित्र–स्थिरत्र–चराचरस्वरूपजगत्संस्थानं स्वांशेनावस्थितमिति तज्ज्ञानेनास्य निखिलस्य ज्ञाततां ब्रुवन् लोकदृष्टं कार्यकारणयोरनन्यत्वं दर्शयितुं दृष्टान्तमाह

वाक्यमुपादत्ते कथं न्विति, अथ पिता ब्रह्मणो जगत्कारणत्वं तदुपयोगिगुणजातम् उपादानत्वनिमित्तत्वप्रयुक्तदोषशङ्कापरिहारं च विवक्षन्कारणज्ञानेन कार्यविज्ञानं लोकसिद्धं दर्शयतीत्याह परिचोदितः पुनरित्यादिना, ज्ञानानन्दामलत्वैकस्वरूपमिति विज्ञानमानन्दं ब्रह्मेत्यादिशोधकवाक्यार्थो विवक्षितः स्वरूपशब्दो धर्मिस्वरूपनिरूपकधर्म्मवाची अपरिच्छेद्यमाहात्म्यमित्यनेनानन्त–शब्दार्थो विवक्षितः स्वरूपमपरिच्छिन्नमित्यर्थः । गुणतोऽप्यानन्त्यमाह सत्यसङ्कल्पत्वमिश्रैरिति । सत्यशब्दार्थमाह अविकारस्वरूपमिति, अत्र स्वरूपशब्दोविशिष्यांशपरः । एवमविकारित्वादिश्रुतेर्विषयोदर्शितः । उपादानत्वादिप्रयुक्तविकारादिविषयं दर्शयति नामरूपेति, पूर्व्वं सूक्ष्मचिदचिद्वस्तुशरीरकमित्येतावदुक्तम् अत्र नामरूपविभागानर्हशब्देन सूक्ष्मशब्दो व्याख्यातः । अनेनोपादानत्वप्रयुक्तं चोद्यं परिहृतम् । अथ निमित्तत्वप्रयुक्तं चोद्यं परिहरति स्वलीलया इति, अवाप्तसमस्तकामस्यापि लीलार्थं जगद्व्यापार उपपद्यत इत्यर्थः । महायासरूपजगद्व्यापारस्य न लीलात्वमिति चेत्तत्राह स्वसङ्कल्पेनेति, सङ्कल्पमात्रसाध्यत्वान्नायं महायास इत्यर्थः । स्वांशेन विशिष्टस्य स्वस्यांशेन ब्रुवन्वक्तुं लोकदृष्टं कार्यकारणयोरनन्यत्वं दर्शयितुं दृष्टान्तमाहेति कार्यकारणयोरनन्यत्वे दृष्टान्तमाहेत्यर्थः ।

यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति एकमेव मृद्द्रव्यं स्वैकदेशेन नानाव्यवहारास्पदत्वाद्यथा घटशरावादिनानासंस्थानावस्थारू-

पविकारापन्नं नानानामधेयमपि मृत्तिकासंस्थानविशेषत्वात् मृद्द्रव्यमेवेति व्यवस्थितं न वस्त्वन्तरमिति तथा मृत्पिण्डविज्ञानेन तत्संस्थानविशेषरूपं घटशरावादि सर्वं ज्ञातमेव भवतीत्यर्थः, ततः कृत्स्नस्य जगतो ब्रह्मैककारणतामजानन्पुत्रः पृच्छति भगवंस्त्वमेवैतद्ब्रवीत्विति,

अन्यत्वनिबन्धनचोद्यस्यानन्यत्वज्ञापनेन हि परिहार इति भावः । दृष्टान्तवाक्यमुपादत्ते यथा सोम्यैकेन मृत्पिण्डेनेति, तत्र कारणज्ञानेन कार्यविज्ञानस्य सिद्धये तयोरैक्योपपादकमुत्तरखण्डं प्रथमं व्याचष्टे एकमेवेति, तत्र वाचेति पदं व्याचष्टे नाना व्यवहारास्पदत्वायेति, वाक्शब्दोऽजहल्लक्षणया वाक्पूर्वकव्यवहारे वर्तते, वाक्पूर्वकव्यवहारश्च प्रयोजनतया हेतुरित्यर्थः । विकारशब्दार्थमाह घटशरावेत्यादिना, संस्थानमेवावस्था सैव विकारः षोडशकश्च विकार इत्यादिषु विकारशब्दस्यावस्थावद्द्रव्यपरत्वेन प्रयोगदर्शनात्तद्व्यावृत्त्यर्थमवस्थारूपविकार इत्युक्तं, नामधेयपदं व्याचष्टे नानानामधेयमिति । मृत्तिकेति पदं व्याचष्टे मृत्तिकासंस्थानविशेषत्वादित्यादिना, एवकारेण व्यावर्त्यमाह न वस्त्वन्तरमितीति, एवं कारणज्ञानेन कार्यज्ञानस्य उपपादकमुत्तरखण्डं व्याख्याय तदुपपाद्यं पूर्वखण्डं व्याचष्टे यथेति, लोके कारणज्ञानात्कार्यज्ञानं सम्भवतु तथाऽप्येकविज्ञानेन सर्वविज्ञानं नोपपद्यते विजातीयकार्याणामेककारणत्वायोगादिति बुद्ध्वा ब्रह्मैककारणत्वाज्ञानेन पुत्रः पृच्छतीत्याह तत इत्यादिना, विजातीयानामपि सर्वकार्याणां ब्रह्मैवोपादानं तदेव च निमित्तमित्युपदिदेशेत्याह ततः सर्वज्ञमिति,

ततः सर्वज्ञं सर्वशक्ति ब्रह्मैव सर्वकारणमित्युपदिशन् स होवाच सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयमिति, अत्रेदमिति जगन्निर्दिष्टम् । अग्र इति च

सृष्टेः पूर्वकालः, तस्मिन्काले जगतः सदात्मकतां सदेवेति प्रतिपाद्य तत्सृष्टिकालेऽप्यविशिष्टमिति कृत्वा एकमेवेति सदापन्नस्य जगतस्तदानीमविभक्तनामरूपतां प्रतिपाद्य तत्प्रतिपादनेनैव सतो जगदुपादानत्वं

उपदिशन् उपदेष्टुं सदेवेति वाक्योपादानम् इदमिति जगन्निर्दिष्टमिति प्रकृतमस्ति चेत् तत्परत्वमन्यथा प्रत्यक्षादिप्रमाणप्रसिद्धजगत्परत्वमेवेदं-शब्दस्योचितमिति भावः । अग्र इत्यादिना अनन्तरं सृष्टेर्वक्ष्यमाणत्वादग्रशब्दस्य प्रलयकालपरत्वमवगम्यत इति भावः, । तस्मिन्काले जगतः सदात्मकतां सदेवेति प्रतिपाद्येति सदात्मकतां-कारणात्मकतां सदेवेत्यनेन वैशेषिकोक्तं कदाचित्सत्त्वं कदाचिदसत्त्वं च व्यावृत्तं तेन प्रलयकालेऽपि सत्त्वं फलितमित्येवमुक्तं न तु वाचनिकोऽयमर्थः सदेवेदमग्र एकमेवासीदिति ह्यन्वयः । सच्छब्दः प्रमाणसंबन्धार्हत्वोपाधिना प्रकृतिपुरुषकालविशिष्टं ब्रह्माह कारणात्कार्यस्यान्यत्वेन जगतः कदाचित्सत्त्वं परैरुक्तं कारणभूतब्रह्मानन्यत्वेन जगतोनित्यसत्त्वमित्यर्थः । तत्सृष्टिकालेऽपीति जगत्सदेव चेत्प्रलये कोविशेष इत्यपेक्षायां द्रव्यं नित्यमेव तस्याविभक्तनामरूपावस्था प्रलयः विभक्तनामरूपावस्था कार्यता इति वैषम्यमेकमेवेति पदेनोक्तं भवतीत्यर्थः । अनेन ब्रह्मण उपादानत्वं फलितमित्याह तत्प्रतिपादनेनैवेति, अवस्थान्तरयोगित्वविशेषवतः प्रागवस्थायोगो ह्युपादानत्वं, तस्मात्तुल्यमानबहुत्वावस्थायाः पूर्वावस्थाकथनेनोपादानत्वमुक्तं भवतीत्यर्थः । कृत्स्नस्य कार्यस्य ब्रह्मैवोपादानमस्तु तथाऽप्येकविज्ञानेन सर्वविज्ञानं नोपपद्यते निमित्तान्तरसम्भवात् इति शङ्कायां तस्यैव निमित्तत्वेन निमित्तान्तरशङ्कामद्वितीयपदं व्यावर्तयतीत्याह स्वव्यतिरिक्तेति, ।

प्रतिपादितमिति स्वव्यतिरिक्तनिमित्तकारणमद्वितीयपदेन प्रतिषिद्धं तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं

भवतीत्यादावेव प्रशासितैव जगदुपादानमिति हृदि निहितम् इदानीं सुव्यक्तमेतदेवोपपादयति स्वयमेव जगदुपादानं जगन्निमित्तं च सत् तदैक्षत बहु स्यां प्रजायेयेति तदेतत्तच्छब्दवाच्यं परं ब्रह्मैव सर्वज्ञं सर्वशक्ति सत्यसंकल्पमवाप्तसमस्तकाममपि लीलार्थं विचित्रानन्तचिदचिन्मिश्रजगद्रूपेणाहमेव बहु स्यां तद-

कुलालस्य विविधपरिणामशक्तिवैकल्येनानुपादानत्वं मृत्पिण्डस्य ज्ञातृत्वविरहादनिमित्तत्वमत्र तूभयसद्भावाद्ब्रह्मैवोभयकारणमित्यर्थः । उक्तार्थस्योपक्रमसङ्गतत्वमाह तमादेशमिति, आदेशशब्देन प्रेरयितृत्वं कण्ठोक्तं येनाश्रुतं श्रुतम् इत्यादिप्रतिज्ञानेनोपादानत्वमभिप्रेतं तदुभयमत्र स्फुटमित्यर्थः । अत्रासत्कार्यवादोपन्यासनिरासवाक्यं द्वितीययोजनायां व्याख्यास्यत इति नात्रोदाहृतम् । अथ तदनन्तरवाक्यं पूरकपदान्तरैः सहोपादत्ते स्वयमेवेति,

र्थं प्रजायेयेति स्वयमेव संकल्प्य स्वांशैकदेशादेव वियदादिभूतानि सृष्ट्वा पुनरपि सैव सच्छब्दाभिहिता परा

सदेवेत्यादि, वाक्यं सजातीयविजातीयादिभेदनिषेधपरत्वेन परैर्व्याख्यातं तदुत्तरवाक्याननुगुणम् अस्मदुक्तार्थस्यैवोपपादकान्युत्तरवाक्यानीत्यभिप्रायेण जगदुपादानं जगन्निमित्तं सदिति विशेषणद्वयोपादानम् । एतद्व्याचष्टे तदेतदित्यादिना, वक्ष्यमाणसृष्ट्युपपादकविशेषणान्याह सर्वज्ञमित्यादिना, अवाप्तसमस्तकामस्य प्रवृत्त्यनुपपत्तिं परिहरति अवाप्तसमस्तकाममपि लीलार्थमिति, सङ्कल्पमात्रसाध्यत्वान्न जगद्व्यापार आयासरूप इत्यभिप्रायेण सत्यसङ्कल्पमित्युक्तम्, अजायमानो बहुधा विजायते इत्युक्तावताररूपबहुत्वव्यावृत्त्यर्थं जगद्रूपेणेत्युक्तं, तत्र बहुशब्दार्थोऽस्तीति दर्शयितुं विचित्रानन्तेत्याद्युक्तं, बहु स्यां तदर्थं प्रजायेयेति जायतेऽस्तीत्याद्यवस्थासु जायमानाऽवस्था जातावस्था चेत्युत्पत्तावेवावस्थाद्वयमस्ति,

तत्रास्ति–शब्दवाच्योत्पन्नावस्था उत्पाद्यमानावस्था जायत इति शब्द-वाच्या तत्र बहु स्यामिति वाक्ये स्यामिति पदेनोत्पन्नावस्था विवक्षिता, तत्पूर्व्वभाविन्युत्पाद्यमानावस्था तदर्थं प्रजायेयेत्युक्तेति विभागः । उत्पत्तौ साधनस्य पूर्व्वभावित्वं साध्यस्य पश्चाद्भावित्वं सङ्कल्पे तु साध्यं पूर्व्वभावि-साधनं पश्चाद्भावि तस्मात्स्यामिति पूर्व्वमुक्तं स्वयमेवोपादानभूतं तदेव सङ्कल्प्येत्यर्थः । स्वांशः प्रकृतिः तेजोऽबन्नसृष्टिवचनं वियदादेरपि प्रदर्शनार्थमिति वियदधिकरणसिद्धार्थाभिप्रायेणाह वियदादीति, श्रीभाष्ये महदादेरपि प्रदर्शनार्थमित्युक्तं, पुनरपीति व्यष्टिसृष्ट्यर्थमित्यर्थः । सैवेति सदेवेत्यादौ निर्विशेषं वस्तूक्तं सेयं देवतेति सगुणमुच्यते इति भ्रमापनयनार्थमेवमुक्तम् । उत्तरत्र तेजः परस्यां देवतायामिति हि वक्ष्यते तत्प्रत्यभिज्ञानाय परा देवतेत्युक्तम् । अत्र पूर्व्वापरेषु च सगुणं ब्रह्मैवोच्यते इत्यर्थः । इति व्यष्टिसृष्टिसङ्कल्पवाक्यमुपादत्ते हन्ताहमिति, अनुप्रविश्य नामरूपे व्याकरवाणीत्यत्रानुप्रवेशो न केवलं तत्तत्पदार्थमात्रपर्यन्तनामरूपव्याकरणार्थः अपि तु स्वपर्यन्तनामरूपव्याकरणार्थः अनुप्रवेशश्रवणेन मातापितृकुलादिनिर्वर्त्यदेवदत्तघटादिनामरूपव्याकरणतोव्यावृत्तताऽवगमात् बहु स्यामित्युपक्रम एव स्वपर्यन्तनामरूपभाक्त्वसङ्कल्पात्तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत इति नामरूपयोर्द्वयोर्ब्रह्मपर्यन्तत्वश्रवणात्तदनुप्रविश्य सच्च त्यच्चाभवदिति च श्रवणात् व्यष्टिसृष्टिसङ्कल्पवाक्ये

देवतैक्षत हन्ताऽहमिमास्तिस्रो देवताः अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति, अनेन जीवेनात्मनेति । जीवस्य ब्रह्मात्मकत्वं प्रतिपाद्य ब्रह्मात्मकजीवानुप्रवेशादेव कृत्स्नस्याचिद्वस्तुनः पदार्थत्वम् । एवंभू*तस्यैव सर्वस्य वस्तुनो नामरूपभा-

अनुप्रवेशपूर्व्वकनामरूपव्याकरणोक्तिराद्यसृष्टेरप्युपलक्षणार्था महदहङ्कारादिनारूपयोर्ब्रह्मत्वपर्यन्तत्वात् यस्य बुद्धिः शरीरं यस्याहङ्कारः शरीरमिति

* एवंभूतस्यैवाचिद्वस्तुन इति पा॰ ।

हि श्रूयते अत एव हि । प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः । क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययाविति स्मृतम् । एवं व्यष्टिसृष्टिसङ्कल्पवाक्येऽपि नामरूपव्याकरणयोर्ब्रह्मपर्यन्तत्वस्य विवक्षितत्वमाद्यसृष्टिसङ्कल्पवाक्यानुरोधात् तद्वेदमिति श्रुत्यन्तरानुगुण्यात् तदनुप्रविश्य सच्च त्यच्चाभवदित्यनुप्रवेशपूर्वकब्रह्मपर्यन्तनामरूपव्याकरणोक्तेश्चावगम्यते बहु स्यामित्युक्तं नानानामरूपभाक्त्वं मृत्पिण्डस्य घटादिनामरूपभाक्त्ववत् किमद्वारकं जीवस्य देवादिनामरूपभाक्त्ववत् । किं सद्वारकमिति संशये अनेन जीवेनेत्यादिश्रुतिः सद्वारकमाह ब्रह्मणस्समष्टिनामरूपभाक्त्वमद्वारकं महदादेर्जीवम्प्रति शरीरत्वाभावात् व्यष्टिनामरूपभाक्त्वमद्वारकं सद्वारकं च तथा सति न द्विपर्यवसानहेतुता गोशब्दादिवत्, अनेन जीवेनात्मना जीवशरीरकेण मया सिंहेन भूत्वा बहवो मयाऽत्ता इतिवत् तदनुप्रविश्य सच्च त्यच्चाभवदिति जीवेऽप्यनुप्रवेशेन तन्नामभाक्त्वश्रवणात् जीवेनात्मनेति तृतीयायाः कोऽर्थः न तावत्सहयोगलक्षणेयं तृतीया कारकविभक्तौ सम्भवन्त्यामुपपदविभक्तेरन्याय्यत्वादिति न्यायेनोपपदविभक्तेरनुपपत्तेः । न च करणे तृतीया अनुप्रवेशं प्रति जीवस्य करणत्वाभावात् अनुप्रवेशस्य द्वारकर्ता हि सः जीवशब्दस्य परमात्मपर्यन्तत्वाच्च नेयं करणे तृतीया तस्मात्कर्त्तरि तृतीया । ननु तिङ्कृत्तद्धितसमासैरनभिहितं कारकं हि तृतीयाविभक्त्यभिधेयम् । अत्र तु व्याकरवाणीति तिङभिहितत्वान्न तृतीयाऽभिधेयः कर्त्ता तत्र प्रथमैव युक्तेति चेत् न व्याकरणकर्ता हि तिङभिहितः अनुप्रवेशकर्त्ता तु नाभिहित इति स तृतीयाभिधेयः नामरूपव्याकरणानुप्रवेशक्रिययोः समानकर्तृकत्वमनुप्रविश्येति क्त्वाप्रत्ययेनाभिहितमिति न तृतीयाभिधेयः कर्त्तेति चेन्न क्त्वोल्यप् कर्ता हि न क्त्वाभिधेयः अपि तु प्रत्ययान्तराभिधेयः प्रत्ययान्तरप्रतिपन्नयोः कर्त्रोरैक्यमेव क्त्वाप्रत्ययाभिधेयं यथा समानाधिकरणवाक्येषु प्रातिपदिकावगते विशिष्टार्थे विशेष्यांशैक्यमात्रं समानविभक्त्यभिधेयं न तु विशेषणान्वयो विशेष्यं वा एवमत्रापि क्त्वाप्रत्ययो न कर्त्रभिधायी अपि तु शब्दान्तरप्रतिपन्नक्रियाद्वयकर्त्रैक्यमात्राभिधायी । क्त्वाप्रत्यय एव

कर्त्रभिधायीति चेत् व्याकरवाणीति तिङ्प्रत्ययो निरर्थकः स्यात् तस्मा-च्छब्दान्तरप्रतिपन्नक्रियाद्वयकर्त्रैक्यमात्राभिधायी क्त्वाप्रत्यय इत्यनुप्रवेश-क्रियाकर्ता तृतीयाभिधेयः एव कर्त्तरि कृदिति कृत्प्रत्ययानां कर्त्तर्य्यभिहि-तत्वात् कृत्सञ्ज्ञकः क्त्वाप्रत्ययः कर्त्रभिधायीति चेन्न अर्थान्तरेष्वविहिता-नामेव कृत्प्रत्ययानां कर्त्रर्थत्वं न त्वर्थान्तरे विहितानां तव्यादीनां हि कर्म्माद्यर्थे विहितत्वात् । अयं तु क्त्वाप्रत्ययो भावे विहितः तथाऽधिका-रात् अत्र प्रातिपदिकार्थमात्रे यथा प्रथमा विभक्तिः तथा धात्वर्थमात्रे विहितो यः प्रत्ययः स भावार्थः अयं तु क्त्वाप्रत्ययो भावे विहित इति न कर्त्रभिधायी । तस्मात् तृतीयया कर्ताऽभिधीयत इति निरवद्यम् अनेनेत्यादिवाक्यं संक्षेपेण योजयति अनेनेत्यादिना, पदार्थत्वं तत्तद-वस्थावस्थितत्वं देवमनुष्याद्याकारविशिष्टत्वं न हि निराकारः पदार्थः पृथिवीत्वाकारविशिष्टो हि पृथिवीपदार्थः परमात्मपर्यन्तस्यैव वस्तु-नस्तत्तदवस्थाविशिष्टत्वं न स्वतन्त्रस्येत्यर्थः । तत्पर्यन्तस्यैव देवादिनाम-भाक्त्वं चेत्याह एवं भूतस्यैवेति, मृदात्मको घट इतिचेत् ब्रह्मात्मकत्वं स्वरूपैक्येऽप्युपपद्यते शरीरशरीरिभावेन तादात्म्यमस्तु तथा सति किं प्रयोजनं सर्वशब्दानां परमात्मपर्यन्तत्वं चेत् परमात्मनि देवत्वमनुष्य-त्वादेः प्रकृत्यर्थस्य द्वित्वादेर्विभक्त्यर्थस्य चायोगान्न तत्पर्यन्तत्वमुपपद्यते इति शङ्कायां विस्तरेण वाक्यार्थमाह एतदुक्तं भवतीत्यादिना,

त्त्वमिति च दर्शयति, एतदुक्तं भवति जीवात्मा तु ब्रह्मणः शरीरतया प्रकारत्वात् ब्रह्मात्मकः यस्यात्मा शरीरमिति श्रुत्यन्तरात्, एवं भूतस्य जीवस्य शरीर-तया प्रकारभूतानि देवमनुष्यादिसंस्थानानि वस्तू-नीति ब्रह्मात्मकानि तानि सर्वाणि अतो देवो मनुष्यो यक्षो राक्षसः पशुर्मृगः पक्षी वृक्षो लता काष्ठं शिला तृणं घटः पट इत्यादयः सर्वे प्रकृतिप्रत्यययोगेनाभि-

धायकतया प्रसिद्धाः शब्दाः लोके तत्तद्वाच्यतया प्रतीयमानतत्तत्संस्थानवस्तुमुखेन तदभिमानिजीवतदन्तर्यामिपरमात्मपर्यन्तस्य संघातस्यैव वाचका इति, एवं समस्तचिदचिदात्मकप्रपञ्चस्य सदुपादानता

शरीरत्वमस्तु ततः किं ब्रह्मपर्यन्ताभिधानस्येत्यत्राह प्रकारत्वात् इति, प्रकारत्वं दण्डकुण्डलादेरप्यस्तीति तद्व्यावृत्त्यर्थं शरीतया प्रकारत्वादित्युक्तम् एवं ब्रह्मात्मकत्वं शरीरशरीरिभावादित्युक्तम् । आत्मशब्दः स्वरूपैक्ये शरीरशरीरिभावे च साधारणः । अत्र शरीरशरीरिभाव एवेति किन्नियामकमिति चेत्तत्राह यस्यात्मेति, जीवात्मा ब्रह्मणः शरीरमस्तु ततः किमित्यत्राह एवंभूतस्येति, देवत्वादिविशिष्टशरीराणि जीवद्वारा ब्रह्मात्मकानीत्यर्थः । ततः किमित्यत्राह अत इति, देवाद्यवान्तरजातीनामपि ब्रह्मपर्य्यन्तत्वं दर्शयितुं यक्षराक्षसादय उपात्ताः अप्राणिमत्सु स्वत्पासा ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञानविजृम्भितानि भूतानां प्राणिनः श्रेष्ठा इत्यादिभिर्लोष्टकाष्ठादेर्जीवाधिष्ठितत्वश्रवणात् । काष्ठं शिलेत्याद्युक्तं छिन्नद्रुमो हि काष्ठं तत्र द्रुमात्रस्याधिष्ठातृजीवापगमेऽपि काष्ठावस्थाभिमानी जीवो विद्यत एव नामरूपभाक्त्वादिति भावः । तत्तत्संस्थानवस्तुमुखेनेत्यनेन परमात्मनि देवत्वमनुष्यत्वाद्यनुपपत्तिः परिहृता भवति । देवत्वद्वित्वादीनां परमात्मस्वरूपे अव्यवधानेनान्वयाभावेऽपि देवत्वादीनां प्रकृत्यभिधेयानां प्रत्ययाभिधेयानां द्वित्वादीनां च परमात्मनि सद्वारकान्वयः संभवतीत्यर्थः । अतएव काठिन्यवान् योबिभर्तीत्यादिरुपपद्यत इत्येतदुक्तं भवतीत्यन्वयः । अथ त्रिवृत्करणादिवाक्यानां प्रस्तुताऽर्थानपेक्षितत्वेन तानि विहायापेक्षितवाक्यानामर्थं संग्रहेणाह एवमित्यादिना, नामरूपव्याकरणार्थं हि त्रिवृत्करणं तस्मात्त्रिवृत्करणसाध्यं नामरूपव्याकरणं सङ्कल्पवाक्ये पूर्व्वभाव्यभूत्-उत्पत्तिवाक्ये तु त्रिवृत्करणस्य पूर्व्वभावित्वं युक्तं पाठक्रमेण त्रिवृत्करणस्य पश्चाद्भावित्वेऽप्यर्थक्रमेण पाठक्रमस्य बाध्यत्वात् त्रिवृत्करणं पूर्व्वभावि

यथाऽग्निहोत्रं जुहोति यवागूं पचतीत्यत्र हि यवाग्वाः पूर्व्वभावित्व पाठक्रमबाधेनाङ्गीक्रियते यवाग्वा जुहोतीति यवाग्वा होमसाधनतया विहितत्वात् । तद्वदत्रापि क्रमोऽनुसन्धेयः । सन्मूलाः सोम्येम इत्यादिवाक्यस्यार्थमाह एवमिति, सदुपादानतासन्निमित्ततासब्देन सन्मूल इत्यत्र मूलशब्दार्थः उक्तः । सदायतनशब्दार्थमाह सदाधारतेति, नियन्तृतया धारकत्वाद्धारकत्वाकृष्टमर्थमाह सन्नियाम्यतेति, अनेन शेषत्वमप्यर्थसिद्धं शरीरतया हि शरीरत्वं शेषत्वं धार्यत्वं नियाम्यत्वं च तदप्याह सच्छेषतादीति,

सन्निमित्तता सदाधारता सन्नियाम्यता सच्छेषतादि सर्वं च सन्मूलाः सोम्येमाः प्रजास्सदायतनास्सत्प्रतिष्ठा इत्यादिना विस्तरेण प्रतिपाद्य कार्यकारणभावादिमुखेनैतदात्म्यमिदं सर्वं तत्सत्यमिति कृत्स्नस्य जगतो ब्रह्मात्मकत्वमेव सत्यमिति प्रतिपाद्य कृत्स्नस्य जगतः स एवात्मा कृत्स्नं जगत्तस्य शरीरं तस्मात्त्वं–शब्दवाच्यमपि जीवप्रकारं ब्रह्मैवेति सर्वस्य ब्रह्मात्मकत्वं प्रतिज्ञातं तत्त्वमसीति जीवविशेषे उपसंहृतम् ।

आदिशब्देनानुक्तमविरुद्धमन्यतोऽग्राह्यमिति न्यायादन्यदपेक्षितं गृह्यते कार्य्यकारणभावादिमुखेनेत्यादिशब्देन सदाधारकत्वादिकं विवक्षितं तेन ब्रह्मात्मकत्वमेव सत्यमिति प्रतिपाद्यते धारकत्वादिभिस्तावच्छरीरात्मभावः सिद्धः कार्यकारणभावाच्च सिध्यति स्वरूपमात्रस्य कारणत्वायोगेन विशिष्टस्यैव कारणत्वात् ॥

ब्रह्मात्मकत्वमेवेत्येवकारेण स्वपर्यन्तत्वं प्रामाणिकमित्युक्तं भवति, एतदात्म्यमेव–एतदात्मकं स्वार्थे ष्यङ् । सम्बन्धार्थे वा एतदात्मसम्बन्धीत्यर्थः अस्यात्मनः शरीरतया सम्बन्धीत्युक्तं भवति, ऐतदात्म्यमिदं सर्वं स आत्मेति निर्देशो रामानुजं लक्ष्मणपूर्व्वजं चेति वन्मन्तव्यः । आत्मशब्देन फलि-

तार्थमाह कृत्स्नं जगत्तस्य शरीरमिति, अस्यायं पितेत्युक्ते पितृत्वप्रतियोगिनः पुत्रत्वं ह्यर्थसिद्धं भवति, तस्मादित्यादि ऐतदात्म्यमिति सामान्येन वैयधिकरण्येन प्रतिज्ञातं ब्रह्मात्मकत्वं तत्त्वमसीति सामानाधिकरण्येन जीवविशेष उपसंहृतमित्यर्थः । अनेनोद्देश्योपादेयविभागनिमित्तचोद्यं परिहृतं भवति । उद्देश्योपादेयविभागे सति त्वं-शब्द उद्देश्यसमर्पको भवति तच्छब्दावगतकारणत्वस्य प्रमाणान्तरासिद्धत्वात्, त्वं-शब्दस्तु लोकप्रसिद्धप्रकारेणोद्देश्यसमर्पकः, जीवस्य ब्रह्मात्मकत्वं च न प्रत्यक्षादिप्रमाणप्रसिद्धं तस्माज्जीवमात्रपरस्त्वं-शब्दः, त्वं-शब्दाब्दावगतजीवस्य तच्छब्दावगतस्य ब्रह्मणश्च सामानाधिकरण्येन प्रतिपाद्यमानमैक्यं स्वरूपैक्यमेव भवतीति चोद्यम् । परिहारस्तु ऐतदात्म्यमिति सर्वस्य ब्रह्मात्मकत्वस्य यथाप्राप्तमुपसंहार्यत्वात्सामान्येनोक्तस्य विशेष उपसंहारस्यापेक्षितत्वाच्च जीवविशेषे पूर्व्वोक्तब्रह्मात्मकत्वं सामानाधिकरण्येनोपसंहृतमिति । ऐतदात्म्यमित्यत्राप्यात्मशब्दो मृदात्मको घट इतिवत् स्वरूपैपरः स्यात्, तेन तत्त्वमसीत्युपसंहारेऽपि स्वरूपैक्यमेवोक्तं भवति ऐतदात्म्यमिदं सर्वमित्यत्राचिद्ब्रह्मणोरैक्यं तत्त्वमसीति जीवब्रह्मणोरैक्यं चोक्तमिति नात्रानुवाद इति शङ्काद्वयमभिप्रेत्याह एतदुक्तं भवतीति,

एतदुक्तं भवति ऐतदात्म्यमिदं सर्वमिति चेतनाचेतनप्रपञ्चमिदं सर्वमिति निर्दिश्य तस्य प्रपञ्चस्यैष आत्मेति प्रतिपादितः प्रपञ्चोद्देशेन ब्रह्मात्मकत्वं प्रतिपादितमित्यर्थः । तदिदं ब्रह्मात्मकत्वं किमात्मशरीरभावेन? उत स्वरूपेणे? ति विवेचनीयं, स्वरूपेणेति चेद् ब्रह्मणः सत्यसंकल्पत्वादयः तदैक्षत बहु स्यां प्रजायेयेत्युपक्रमावगता बाधिता भवन्ति । शरीरात्मभावेन च तदात्मकत्वं श्रुत्यन्तराद्विशेषतोऽवगतम्

चेतनाचेतनप्रपञ्चमित्यनेनाचिद्ब्रह्मणोरैक्यं प्रतिपादितमित्येतत्प्रत्युक्तं

सर्वशब्दो हि असङ्कोचेन प्रमाणान्तरगम्यं सर्वं चेतनाचेतनात्मकं जगद्वदतीत्यचिन्मात्रपरत्वे सर्वशब्दस्वारस्यभङ्गात् । श्रुत्यन्तरे च इदं सर्वमसृजतेत्यारभ्य सच्च त्यच्चाभवत् विज्ञानं चाविज्ञानं चेतीदं सर्वमिति निर्द्दिष्टस्य जगतश्चेतनाचेतनात्मकत्वेन विवृतत्वाच्च ऐतदात्म्यमित्यत्र किमुद्देश्यं किमुपादेयमित्यत्राह प्रपञ्चोद्देशेनेति, एवमेका शङ्का परिहृता । अथात्मशब्दस्य स्वरूपैक्यपरत्वं व्युदस्यति तदिदमित्यादिना, स्वरूपेणेति चेदिति, अचिद्ब्रह्मणोः स्वरूपैक्ये अचेतनत्वादेव सत्यसङ्कल्पत्वादिविरोधः । जीवब्रह्मणोरैक्ये तस्य कर्म्मवश्यत्वादेव सत्यसङ्कल्पत्वादिविरोध इत्यर्थः । एतद्विरोधपरिहाराय शरीरात्मभावः कल्प्यत इत्यभिप्रायः । न केवलमनया श्रुत्यर्थापत्त्या कल्प्यः अपि तु ब्रह्मण आत्मत्वं जगतस्तच्छरीरत्वं च कण्ठोक्तमित्याह शरीरात्मभावेन चेति, का पुनः श्रुतिः तत्र विशेषतोऽवगतिः कथमिति शङ्कायां श्रुतिवाक्यमाह अन्तरिति,

अन्तः प्रविष्टः शास्ता जनानां सर्वात्मेति प्रशासितृत्वरूपात्मत्वेन सर्वेषां जनानामन्तः प्रविष्टः, अतः सर्वात्मा सर्वेषां जनानामात्मा सर्वं चास्य शरीरमिति विशेषतो ज्ञायते ब्रह्मात्मकत्वं य आत्मनि* तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः, इति च, अत्राप्यनेन जीवेनात्मनेति इहेदमेव ज्ञायत इति पूर्वमेवोक्तम् । अतः सर्वस्य चिदचिद्वस्तुनो ब्रह्मशरीरत्वात्सर्वशरीरं सर्वप्रकारं सर्वशब्दैर्ब्रह्मैवाभिधीयत इति तत्त्वमिति सामानाधिकरण्येन जीवशरीरतया जीवप्रकारं ब्रह्मैवाभिहितम्, एवमभिहिते

* माध्यन्दिनिवृ·

सत्ययमर्थो ज्ञायते त्वमिति यः पूर्वं देहाधिष्ठातृया

तत्र वाक्ये विशेषतोऽवगतिं दर्शयति प्रशासितृत्वेति, सर्वात्मेति उक्तमात्मत्वं प्रशासितृत्वलक्षणमिति दर्शयितुं प्रशासितृत्वरूपात्मत्वेनेत्युक्तम् । अन्तः प्रविष्ट–शब्देन राजादिव्यावृत्तिः, शास्तेति पदेन गगनादिव्यावृत्तिः । अतः–अन्तः प्रविश्य प्रशासितृत्वादित्यर्थः । कथं विशेषतोऽवगतमित्यपेक्षायामेवं विशेषतोऽज्ञायत इत्युक्तमिति न पुनरुक्तिः । अस्मिन्वाक्ये प्रशासितृत्वविशेषितात्मस्वरूपत्वस्य कण्ठोक्तिः । शरीरत्वं गम्यम् ॥

य आत्मनीति । अथात्मत्वशरीरत्वकण्ठोक्त्यन्वितं वाक्यमाह य आत्मनीति, यद्यपि शरीरशरीरिभावः श्रुत्यन्तरसिद्धः स्यात् तथाऽप्येतत्प्रकरणे स्वरूपैक्यं गम्यत इत्यत्राह अत्रापीति, ततः किं सामानाधिकरण्यसिद्धिरित्यत्राह अत इति, सामानाधिकरण्येनोपसंहारे किं प्रयोजनमित्यत्राह एवमभिहिते सतीति,

प्रतीतः स परमात्मशरीरतया परमात्मप्रकारभूतः परमात्मपर्यन्तः पृथक्स्थितिप्रवृत्त्यनर्हः अतस्त्वमिति त्वत्प्रकारविशिष्टं त्वदन्तर्यामिणमेवाचष्ट इति, अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति ब्रह्मात्मकतयैव जीवस्य शरीरिणः स्वनामभाक्त्वात् तत्त्वमिति सामानाधिकरण्यप्रवृत्तयोर्द्वयोरपि पदयोर्ब्रह्मैव वाच्यं, तत्र तत्पदं जगत्कारणभूतं सकलकल्याणगुणगणाकरं निरवद्यं निर्विकारमाचष्टे, त्वमिति च तदेव ब्रह्म जीवान्तर्यामिरूपेण स्व*शरीरजीवप्रकारविशिष्टमाचष्टे, तदेवं प्रवृत्तिनिमित्तभेदेनैकस्मिन् ब्रह्मण्येव तत्त्वमिति द्वयोः पदयोर्वृत्तिरुक्ता, ब्रह्मणो निरवद्यत्वं निर्विकारत्वं सर्वकल्याणगुणाकरत्वं

* सशरीरजीवेति पा· ।

थासिद्धत्वादित्यभिप्रायः । तत्र कथमन्यथासिद्धिरित्यत्राह तत्र लौकिका इति,

णीत्य त्र, तत्र लौकिकास्तु पुरुषाः शब्दं व्याहरन्तो शाब्दवाच्ये प्रधानांशस्य परमात्मनः प्रत्यक्षाद्यपरिच्छेद्यत्वाद्वाच्यैकदेशभूते वाच्यसमाप्तिं मन्यन्ते । वेदान्तश्रवणेन च व्युत्पत्तिः पूर्यते । एवमेव वैदिकास्सर्वे शब्दाः परमात्मपर्यन्तान् स्वार्थान् बोधयन्ति वैदिका एव सर्वे शब्दा वेदादेवोद्धृत्योद्धृत्य परेणैव ब्रह्मणा सर्वपदार्थान्पूर्ववत्सृष्ट्वा तेषु परमात्मपर्यन्तेषु पूर्ववन्नामतया प्रयुक्ताः ।

तत्तत्पदार्थानां ब्रह्मपर्यन्तत्वग्रहणे तत्तत्पर्यन्तशब्दव्युत्पत्तौ च ब्रह्मस्वरूपग्रहणमवश्यापेक्षितं यथा नैल्यपीतिमादीनां द्रव्यपर्यन्तत्वग्रहणे नीलपीतादिशब्दव्युत्पत्तौ च तत्तद्वस्तुग्रहणमपेक्षितं तस्य च प्रत्यक्षाद्यगोचरत्वात्तत्तद्वस्तुमात्रपर्यन्तत्वग्रहणं तत्तत्पर्यन्तव्युत्पत्तिश्चोभयमन्यथासिद्धमित्यर्थः । तर्हि व्युत्पत्त्या वेदान्तश्रवणं वेदान्तश्रवणेन च व्युत्पत्तिरित्यत्राह वेदान्तेति, एकदेशव्युत्पत्त्या वेदान्तश्रवणमुपपद्यते वेदान्तश्रवणेन व्युत्पत्तिपूर्तिः, न च कार्त्स्न्येनादितः प्रभृति व्युत्पत्तिरिति नान्योन्याश्रय इत्यर्थः । एवं लौकिकशब्दानां तत्तद्वस्तुमात्रपर्यन्तत्वेन व्युत्पन्नानामपि परमात्मपर्यन्तत्वमुक्तं वैदिकशब्दानां परमात्मपर्यन्तत्वमाह एवमेवेति, वैदिका एव शब्दाः परमात्मपर्यन्ताः स्युर्लौकिकास्तत्तद्वस्तुमात्रपर्य्यन्ताः स्युः, व्युत्पत्तिस्वारस्यसिद्ध्यर्थमित्यत्राह वैदिका एवेति, लौकिकशब्दानामपि वेदशब्देभ्यः उद्धृत्य तत्तद्वस्तुषु प्रयुक्तत्वात्सर्वे शब्दा वैदिका एवेति सर्वे परमात्मपर्यन्ता एवेत्यर्थः । तत्र प्रमाणमाह तदाहेति,

तदाह मनुः सर्वेषां तु स नामानि कर्म्माणि विविधानि च । वेदशब्देभ्य एवादौ पृथक्संस्थाश्च

नि*र्ममे इति, संस्थाः–संस्थानानि रूपाणि इति यावत् । आह च भगवान् पराशरः नामरूपं† च भूतानां कृत्यानां च प्रपञ्चनम् । वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥ इति, श्रुतिश्च सूर्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयदिति सूर्यादीन् पूर्व्ववत्परिकल्प्य नामानि च पूर्व्वञ्चकारेत्यर्थः । एवं जगद्ब्रह्मणोरनन्यत्वं प्रपञ्चितं, तेनैकेन ज्ञातेन सर्वस्य ज्ञाततोपपादिता भवति सर्वस्य ब्रह्मकार्यत्वप्रतिपादनेन तदात्मतयैव सत्यत्वं नान्यथेति तत्सत्यमित्युक्तम्,

संस्थाशब्दस्य स्थित्यर्थताव्यावृत्त्यर्थमाह संस्थाः–संस्थानीति, आह चेति, अत्र मनुपराशरयोरैककण्ठ्यं दर्शितं, श्रुतिश्चेति, सूर्याचन्द्रमसाविति निर्द्देशेन नामकल्पनं चार्थसिद्धमित्यभिप्रायात्पूर्व्वोक्तोपबृंहणवचनानुगुण्याच्च नामानि च पूर्ववच्चकारेति व्याख्यातं शब्दाः सर्वे वैदिका एव आनुपूर्व्वीभेदमात्रात् लौकिकत्वं तत एव लक्षणभेदश्च । तस्मात्सर्वशब्दा-ब्रह्मपर्यन्ता इति । ततः किमयमर्थः इत्यारभ्य प्रतिपिपादयिषितस्यार्थस्येत्यत्राह एवमिति, ब्रह्मण एवोपादानत्वनिमित्तत्वोपपादनेन जगद्ब्रह्मणोरनन्यत्वमुक्तमित्यर्थः । तेनेति जगतः सत्यत्वेन सत्यमिथ्यार्थयोरैकताप्रसङ्गाद्यभावादेकविज्ञानेन सर्वविज्ञानमुपपादितं भवतीत्यर्थः । सर्वस्येत्यादि तत्सत्यमिति वाक्ये ब्रह्मात्मकतयैव जगत् सत्यं स्वनिष्ठत्वमेवासत्यमिति जगतो ब्रह्मात्मकत्वेन सत्यत्वोपपादनान्महावाक्यस्वारस्यमपि जगत्सत्यत्वानुगुणमित्यर्थः ॥

यथा दृष्टान्ते सर्वस्य मृद्विकारस्य मृदात्मनैव सत्यत्वं, शोधकवाक्यान्यपि निरवद्यं सर्वकल्याणगुणाकरं परं ब्रह्म शोधयन्ति सर्वप्रत्यनीकाकारताबोधनेऽपि

* मनुस्मृ· १ । † वि· पु· १ । ५ । ६३ ।

यथेति लोकदृष्टप्रकारेण दृष्टान्तस्य कथनीयत्वाद् दृष्टान्तस्य च लोके सत्यत्वेन सम्प्रतिपन्नत्वाद्दार्ष्टान्तिकस्य च दृष्टान्तानुगुणत्वात्तत्सत्यमित्यादिवाक्यान्यपि जगत्सत्यत्वपराणीति महावाक्यस्वारस्यं जगत्सत्यत्वानुगुणमित्याशयः । किञ्च मृत्पिण्डादिदृष्टान्तत्रयमपि परिणामपक्षानुगुणमेव दार्ष्टान्तिकब्रह्मैककारणत्वपराणि तत्तेजोऽसृजत तदात्मानं स्वयमकुरुतेत्यादिवाक्यान्यपि परिणामानुगुणान्येव । न हि रज्जुसर्पादिदृष्टान्तः श्रूयते व्यवर्तत अभ्रमदित्यादिकमपि पदं न श्रूयते । सूत्रं च परिणामात् । सू· आत्मकृतेः । सू· पटवच्चेत्यादि न तु विवर्तनादिति रज्जुसर्पवदिति च उपबृंहणवचनान्यपि परिणामानुगुणान्येव निस्सरन्ति यथा लोहपिण्डात् कटकमुकुटेत्यादीनि, एवं सकलश्रुतिस्मृतिसूत्रानुगुण्यात्परिणामपक्षे सुस्थे सति स च सद्वारकोऽद्वारकोवा परिणाम इति विवेके ब्रह्मणोनिर्दोषत्वाविकारत्वादिश्रुतिबाधप्रसङ्गात्सद्वारकत्वमेव युक्तं, यस्यात्मा शरीरमित्यादिश्रुतयश्च शरीरशरीरिभावं वदन्त्यः परिणामादिकं सद्वारकं ज्ञापयन्ति । उपबृंहणेष्वपि काठिन्यवान् यो बिभर्ति तस्मै भूम्यात्मने नम इति ब्रह्मणोनिर्देशात्सद्वारकत्वमेव स्पष्टं सद्वारकमुपादानत्वं ब्रह्मणो मुख्यमेव शरीरवाचिपदानां शरीरिपर्यन्तत्वात् । मीमांसकैरपि सद्वारकस्यापि मुख्यत्वमभ्युपगम्यते यथा परमापूर्वं प्रति प्रोक्षणादेः शेषत्वं तत्र हि यज्ञशेषत्वं व्रीह्यादिद्वारकम् । अपूर्वशेषत्वं व्रीहियागद्वारकम् । अरुणया क्रीणाति गवा यजेतेत्यादिषु गुणस्य जातेश्च क्रययजनसाधनत्वं सद्वारकमपि मुख्यमेवाभ्युपगतम् । एवं विशिष्टस्य ब्रह्मणः शरीरद्वारकमुपादानत्वं मुख्यमेव एवं विशिष्टस्यैवोपादानत्वं सर्ववेदान्तिभिरभ्युपगतम् । अविद्योपाधिशक्तिविशिष्टस्यैवोपादानत्वोपपादनात् । तस्माच्चिदचिद्विशिष्टमेव ब्रह्म कारणं परिणामित्वेन न तु विवर्ताधिष्ठातृत्वेन सद्विद्यायां षड्विधतात्पर्यलिङ्गं चास्मत्पक्ष एवास्ति । षड्विधतात्पर्यलिङ्गमद्वैतविषयमित्येतदभ्युपेतं तत्तु न निर्विशेषाद्वैतविषयम् । अपि तु विशिष्टाद्वैतविषयम् उपक्रमे सदेवेति वाक्यं च निमित्तत्वोपादानत्वतदुपयोगिसार्वज्ञ्यसर्वशक्तित्वादिपरत्वात्सविशेषविषयम् । उपसंहारगतं तत्त्वमसीति सामानाधिकरण्यं प्रवृत्तिनिमित्तभेदेनै-

कार्थविषयत्वाद् विशिष्टाद्वैतविषयं विशिष्टैकार्थपरस्य तत्त्वमसीति वाक्यस्यावृत्तत्वादभ्यासोऽस्ति चिदचिदात्मकप्रपञ्चस्य ब्रह्मविशेषणत्वं प्रमाणान्तरागोचरमित्यपूर्वता चास्ति । एतदर्थज्ञानवतस्तस्य तावदेव चिरमिति मोक्षोपदेशात्फलं चास्ति । एतद्विषयस्य पितापुत्रसंवादरूपत्वादर्थवादश्च अस्मिन्नेवार्थे मृत्कार्यदृष्टान्तोपन्यासादुपपत्तिश्चास्तीति षड्विधतात्पर्यलिङ्गं विशिष्टाद्वैतविषयमित्याशय इत्यन्वयः । एवं सद्विद्यायास्सविशेषपरत्वमुक्तम् । अथ शोधकवाक्यानां सविशेषपरत्वमुच्यते शोधकेत्यादिना,

तत्तत्प्रत्यनीकाकारतायां भेदस्यावर्जनीयत्वान्न निर्विशेषवस्तुसिद्धिः । ननु च ज्ञानमात्रं ब्रह्मेति प्रतिपादिते निर्विशेषज्ञानमात्रं ब्रह्मेति निश्चीयते नैवं स्वरूपनिरूपणधर्म्मशब्दा हि धर्म्ममुखेन स्वरूपमपि प्रतिपादयन्ति गवादिशब्दवत् तदाह सूत्रकारः तद्गुणसारत्वात् तद्व्यपदेशः प्राज्ञवदिति, ज्ञानगुणसारत्वादात्मनो ज्ञानमिति व्यपदेशः यथा प्राज्ञेन ब्रह्मणा विपश्चिता यः सर्वज्ञः सर्वविदिति सर्वज्ञे एव ज्ञानगुणसारत्वात्सत्यं ज्ञानमिति व्यपदिश्यते यावदात्मभावित्वाच्च न दोष इति ज्ञानेन धर्म्मेण स्वरूपमपि निरूपितं न तु ज्ञानमात्रं ब्रह्मेति । कथमिदमवगम्यत इति चेत् यः सर्वज्ञः सर्वविद् इत्यादिज्ञातृत्वश्रुतेः, पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च विज्ञातारमरे केन विजानीयादित्यादिश्रुतिशतसमधि-

तत्र श्रौतगुणनिषेधं द्विधा परिहरति निरवद्यं सर्वकल्याणगुणाकरमिति पदद्वयेन सामान्यनिषेधो विशेषोपस्थापके सति तत्र पर्यव-

स्यति छागो वा मन्त्रवर्णादिति न्यायात् तस्मादपहतपाप्मेत्यादिभिः हेयगुणानां निषिध्यमानत्वात् गुणसामान्यनिषेधस्तत्पर्यवसायीति निरवद्यमिति पदस्याभिप्रायः । विशेषविधाने सति सामान्यनिषेधस्तद्व्यतिरिक्तविषय एव यथाऽग्निषोमीयहिंसाव्यतिरिक्तविषयो न हिंस्यात्सर्वाभूतानीति सामान्यनिषेधः । तस्मात्सत्यकामस्सत्यसङ्कल्प इत्यादिभिर्मङ्गलगुणविधाने सति गुणनिषेधस्तु तद्व्यतिरिक्तविषय इति सर्वकल्याणगुणाकरमिति पदस्याभिप्रायः । आर्थभेदनिषेधः परिहरिष्यते सामानाधिकरण्यान्यथानुपपत्त्या निर्विशेषवस्तुसिद्धिं दूषयति सर्वेत्यादिना, विशेषणभेदविवक्षायां विशेषणभेदेन विशेष्यभेदात् युगपदभिधाने विशेषणानामप्यैक्यप्रसङ्गात् क्रमेणाभिधाने विशेषणानामन्योन्यविशेषणविशेष्यभावप्रसङ्गाच्च वस्तुमात्रैक्यपरमेव सामानाधिकरण्यं तत्र प्रतियोगिरूपप्रवृत्तिनिमित्तभेदसम्भवान्न सामानाधिकरण्यलक्षणहानिः । वाक्यतात्पर्यानुगुणा लक्षणा तद्विरुद्धमुख्यवृत्तेर्बलीयसी । सर्वपदलक्षणा च न दोषः विषं भुङ्क्ष्वेत्यादिषु दर्शनात्सर्वपदलक्षणायामपि समानविभक्त्या तात्पर्यनिश्चयः शौक्ल्यादेः कार्ष्ण्यादिव्यावृत्तिवच्च न व्यावृत्तिर्धर्म्मः स्वरूपमेव व्यावृत्तिः । न च पर्यायता कार्ष्ण्यादिव्यावृत्तपीतिमव्यावृत्तादिशब्दवदिति हि पूर्व्वपक्षशरीरं विरुद्धविशेषणानामेव विशेष्यभेदापादकत्वान्न विशेषणभेदे विशेष्यभेदः युगपदभिधानेऽपि समानविभक्त्या विशेष्यमात्रैक्यप्रतिपादनान्न विशेषणैक्यप्रसङ्गः । पदजातं श्रुतं सर्वमित्यादिन्यायेन सर्वैः पदैर्युगपदेवानेकविशेषणविशिष्टैकार्थाभिधानान्न विशेषणानामन्योन्यविशेषणविशेष्यभावप्रसङ्गः । उद्देश्योपादेयविभागस्तु परामर्शदशायामेवावगम्यते इति न विशेषणविवक्षायाः काचिदनुपपत्तिरित्येतावदभिप्रेतं श्रीभाष्यकारैः श्रीभाष्येऽभिहितत्वात् । अत्र शौक्ल्यादिदृष्टान्तव्यावृत्तिं द्विधाह सर्वेत्यादिना, सर्वप्रत्यनीकाकारताबोधनेऽपीति, कार्ष्ण्यव्यावृत्तमित्यादिषु प्रतियोगितद्व्यावृत्ती शब्दस्वारस्यादेव सम्प्रतिपन्ने अत्र त्वन्वयरूपार्थाभिधायिनः शब्दस्य व्यतिरेकमुखार्थपरत्वक*ल्पनमयुक्तमित्यपि-शब्दस्य भावः ।

* अर्थपरिकल्पनमयुक्तमिति पा० ।

गतमिदं ज्ञानस्य धर्म्ममात्रत्वाद्धर्म्ममात्रस्यैकस्य वस्तुत्वप्रतिपादनानुपपत्तेश्च, अतः सत्यज्ञानादिपदानि स्वार्थभूतज्ञानादिविशिष्टमेव ब्रह्म प्रतिपादयन्ति तत्त्वमिति द्वयोरपि पदयोः स्वार्थप्रहाणेन निर्विशेषवस्तुस्वरूपोपस्थापनपरत्वे मुख्यार्थपरित्यागश्च । ऐक्ये तात्पर्यनिश्चयान्न लक्षणा दोषः सोऽयं देवदत्त इतिवत् । यथा सोऽयमित्यत्र तच्छब्देन देशान्तरकालान्तरसंबन्धिपुरुषः प्रतीयते अयमिति च सन्निहितदेशवर्तमानकालसम्बन्धी तयोस्सामानाधिकरण्येनैक्यं प्रतीयते तत्रैकस्य युगपद् विरुद्धदेशकालसंबन्धितया प्रतीतिर्न घटत इति द्वयोरपि पदयोः स्वरूपमात्रोपस्थापनपरत्वं स्वरूपस्य चैक्यं प्रतिपाद्यत इति चेत्, नैतदेवं सोऽयं देवदत्त इत्यत्रापि लक्षणा गन्धो न विद्यते विरोधाभावात्, एकस्य भूतवर्तमान-

एवं शौक्ल्यादिदृष्टान्ताच्छब्दवैषम्यमुक्तम् । अथार्थवैषम्यमभिप्रेत्याह तत्तत्प्रत्यनीकता भेद*स्यावर्ज्जनीयत्वादिति शौक्ल्यस्य कस्यचिद्धर्मत्वात्स्वरूपमेव व्यावृत्तिः स्वरूपे प्रतिपन्ने अध्यासासहत्वाच्च, ब्रह्म तु न कस्यचिद्धर्म्मभूतं स्वरूपे प्रतिपन्ने ऽध्याससहं च तस्मात्स्वरूपातिरेकेण व्यावृत्तिरभ्युपगन्तव्येति भावः । अथार्थगुणनिषेधं परिचोदयति नन्विति, न हि ज्ञानं ज्ञानान्तराश्रयो भवति तस्मात् ज्ञानस्वरूपत्वप्रतिपादनेन गुणनिषेधः सिद्ध इत्यर्थः । परिहरति नैवमिति, । स्वरूपेत्यादि स्पष्टं, तथाहेति धर्मवाचिशब्दस्य धर्मिपर्यन्तत्वे लक्षणा स्यादिदि शङ्कापरिहाराय

* तत्तत्प्रत्यनीकाकारभेदस्येति पा० ।

यावदात्मेति सूत्रमुदाहृतम् । जातिगुणयोर्व्यक्तिगुणिपर्यन्तत्वस्य लोके प्रत्यक्षसिद्धत्वात्तद्वाचिशब्दानां तत्पर्यन्तत्वमाश्रितम् अत्र तु ज्ञानस्य धर्म्यन्तरनिष्ठत्वं कथमित्यभिप्रायेण चोदयति ज्ञानेनेति, तत्र प्रमाणं दर्शयति यः सर्वज्ञस्सर्ववित् इति, ज्ञानस्वरूपत्वश्रुत्यनुगुणं ज्ञातृत्वस्वरूपताश्रुतिर्नेया न तु ज्ञातृत्वश्रुत्यनुगुणं ज्ञानस्वरूपताश्रुतिर्नेयेत्यत्राह परास्य शक्तिरिति, ज्ञातृत्वश्रुतीनां भूयस्त्वात् बहुस्वारस्यानुगुणङ्कतिपयश्रुतिर्नेयेत्यर्थः । द्वैधे बहूनां वचनमिति हि स्मृतिः भूयसां स्याद्बलीयस्त्वमिति हि मीमांसकाः । स्वाभाविकीति श्रुत्या ज्ञातृत्वादेराविद्यकत्वं च परिहृतं भवति । ज्ञानशब्दस्य ज्ञातृत्वपर्यन्तत्वे तु न कस्यचिच्चैरर्थक्यं ज्ञातृशब्दस्य ज्ञानपरत्वे तृच्प्रत्ययोर्निरर्थकः स्यादिति अयमर्थोऽर्थसिद्ध इति न कण्ठोक्तः । ज्ञानस्य ज्ञानाश्रयत्वं व्याप्तिविरुद्धमित्यत्राह ज्ञानस्येति,

क्रियाद्वयसंबन्धो न विरुद्धः, देशान्तरस्थितिर्भूता, सन्निहितदेशस्थितिर्वर्त्तते, अतो भूतवर्त्तमानक्रियाद्वयसंबन्धितयैक्यप्रतिपादनमविरुद्धं, देशद्वयविरोधश्च कालभेदेन परिहृतः । लक्षणायामपि न द्वयोरपि पदयोर्लक्षणा समाश्रयणम्, एकेनैव लक्षितेन विरोधपरिहारात् लक्षणाभाव एवोक्तः देशान्तरसंबन्धितया भूतस्यैवान्यदेशसंबन्धितया वर्तमानत्वाविरोधात् । एवमत्रापि जगत्कारणभूतस्यैव परस्य ब्रह्मणो जीवान्तर्यामितया जीवात्मत्वमविरुद्धमिति प्रतिपादितं, यथाभूतयोरेव हि द्वयोरैक्यं सामानाधिकरण्येन प्रतीयते तत्परित्यागेन स्वरूपमात्रैक्यं न सामानाधिकरण्यार्थः, भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे

वृत्तिस्सामानाधिकरण्यमिति हि तद्विदः, तथा भूतयोरेवैक्यं *सम्पादितमस्माभिः,

एकस्य धर्मरहितस्य ज्ञानस्य ज्ञानान्तराश्रयत्वे तु न श्रुतिविरोधः उपपादितप्रकारात् व्याप्तिविरोधश्चेत् ज्ञानङ्कस्यचिद्धर्मत्वेन दृष्टमिति तत्रापि तुल्यं, श्रुतिबलात् स्वतन्त्रत्वं चेत् तत एव ज्ञानाद्याश्रयत्वसम्भव इति प्रतिबन्दिमुखेन व्याप्तिविरोधः परिहृतः। परपक्षस्य धर्म्मभूतस्य स्वतन्त्रवस्त्वन्तरत्वकल्पनानुपपत्तिर्दूषणं चोक्तं भवति। अत इत्यादि स्पष्टम् अथ प्रस्तुतेऽर्थे दूषणान्तरमाह तत्त्वमित्यादिना, लक्षणा स्यादित्यर्थः तात्पर्यविरुद्धमुख्यवृत्तेरपि तात्पर्यानुगुणा लक्षणा प्रबलेति चोदयति ऐक्येति, दृष्टान्तं विशदयति यथेति, परिहरति नैतदित्यादिना, अन्यतरपदस्यापि न लक्षणेत्यभिप्रायेण गन्धशब्दः। विरोधाभावं विवृणोति एकस्येति, क्रियाद्वयं किमित्यत्राह देशान्तरेति, तथाऽपि देशद्वयसम्बन्धो विरुद्ध इत्यत्राह देशद्वयेति, कालद्वयसम्बन्धविरोधे क्षणिकत्वप्रसङ्गाद्देशद्वयसम्बन्धाविरोध इत्यर्थः। देशद्वयसम्बन्धविरोधे तीर्थयात्रादिविधानानुपपत्तिश्चाभिप्रेता। अथ पदद्वयलक्षणायां दूषणमाह लक्षणायामपीति, लक्षणाभाव एवेत्यादि स्पष्टं सोऽयं देवदत्त इत्यादौ लक्षणा न स्यात् अत्र तु तत्त्वम्पदावगतार्थविरोधाल्लक्षणैव स्यादित्यत्राह एवमत्रापीति, जीवात्मत्वं जीवतादात्म्यं स्वरूपैक्ये शरीरशरीरीभावे च साधारणमिति तद्विशेषितं जीवान्तर्यामितयेति, यदुक्तं तात्पर्यविरुद्धमुख्यवृत्तेरपि तात्पर्यानुगुणा लक्षणा प्रबलेति तच्छ्रुत्या परिहरन्नर्थाद्दूषणान्तरं चाह यथाभूतयोरिति, यथाभूतयोर्यद्विशेषणविशिष्टयोः तत्परित्यागेन तद्विशेषणपरित्यागेन शब्दप्रतिपन्नविशेषणपरित्यागस्य सामानाधिकरण्यप्रतिपाद्यत्वे सति हि तदनुगुणलक्षणाया बलीयस्त्वं यद्विशेषणं प्रवृत्तिनिमित्ततयाऽपेक्षितं तद्विशेषणपरित्यागे सामानाधिकरण्यस्य तात्पर्यमेव नास्ति, प्रत्युतसामानाधिकरण्यापेक्षित एव विशेषणस्वीकारः। अतस्तात्पर्यानुगुण्याभा-

* रैक्यमुपपादितमिति पा०।

वाल्लक्षणा न बलीयसीत्यर्थः । विशेषणान्वयापेक्षा कुत इत्यत्राह भिन्नेति, विशेषणपरित्यागरूपानुपपत्तिर्नास्मत्पक्ष इत्याह तथा भूतयोरिति, एवं शङ्कापरिहारः कृतः । प्रवृत्तिनिमित्तभेदाभावात्सामानाधिकरण्यलक्षणहानिरूपं दूषणमुक्तं च भवति ।

उपक्रमविरोध्युपसंहारवाक्यतात्पर्यनिश्चयश्च न घटते, उपक्रमे हि तदैक्षत बहु स्यामित्यादिना सत्यसङ्कल्पत्वं जगदेककारणत्वमप्युक्तं तद्विरोधि चाविद्याश्रयत्वादि ब्रह्मणः, अपि चार्थभेदतत्संसर्गविशेषबोधनकृतपदवाक्यस्वरूपतालब्धप्रमाणभावस्य शब्दस्य निर्विशेषवस्तुबोधनासामर्थ्यान्न निर्विशेषवस्तुनि शब्दः प्रमाणं, निर्विशेष इत्यादिशब्दास्तु केनचिद्विशेषेण विशिष्टतयाऽवगतस्य वस्तुनोवस्त्वन्तरावगतविशेषनिषेधकतया बोधकाः, इतरथा तेषामप्यनवबोधकत्वमेव प्रकृतिप्रत्ययरूपेण पदस्यैवानेकविशेषगर्भितत्वात्, अनेकपदार्थसंसर्गबोधकत्वाच्च वाक्यस्य ।

उपक्रमविरोधं दूषणमाह उपक्रमेति, तदेवोपपादयति उपक्रमे हीत्यादिना, ततः किमित्यत्राह तद्विरोधि चेति, एवं प्रकृतपरामर्शितच्छब्दावगतगुणगणबाधः, पदद्वयलक्षणा, सामानाधिकरण्यलक्षणहानिरुपक्रमविरोधश्चेति चत्वारि दूषणान्युक्तानि । अथ निर्विशेषवस्तुनि प्रमाणाभावो निरूप्यते अपि चेत्यादिना, अर्थभेदेति प्रकृतिप्रत्ययार्थभेदबोधनकृतं पदत्वम् अनेकपदार्थसंसर्गविशेषबोधनकृतं वाक्यत्वमित्यर्थः । न केवलं प्राबल्यदौर्बल्यनिरूपणेन सविशेषनिर्विशेषविषयत्वनिश्चयः स्वरूपसिद्धिरेव सविशेषविषयत्वेनेति स्वरूपशब्दस्य भावः । प्रमाणभावः प्रमितिजनकत्वं निर्विशेषवस्तुनि न शब्दः प्रमाणमिति न वाच्यं निर्विशेष-

शब्दो हि तत्प्रतिपादकः । निर्विशेषशब्देन निर्विशेषवस्तु प्रमितं चेन्न तद्दूष्यम् । अप्रमितं चेन्नतरां, तस्मान्निर्विशेषवस्तुनि शब्दः प्रमाणमेवेत्यत्राह निर्विशेष इत्यादि शब्दास्त्विति, न हि निर्विशेषशब्दो निर्विभक्तिकः पदान्तरानन्वितः प्रतिमिजनकः किं तु सविभक्तिकः पदान्तरान्वित एव प्रमितिजनकः । तस्माद्विभक्तिपदान्तरावगतविशेषा अपि न निर्विशेषशब्देन निषेध्यास्तस्मात् कतिपयविशेषनिषेधपरतया बोधका निर्विशेषादिशब्दा न कृत्स्नविशेषनिषेधपराः । तथा सति माता मे वन्ध्येतिवद् व्याहतिः स्यात् तस्मान्निर्विशेषशब्दो निर्विशेषवस्तुनि न प्रमितिजनक इत्यर्थः । बोधकत्वं प्रमितिजनकत्वम् अनवबोधकत्वमेवोपपादयति प्रकृतिप्रत्ययरूपेणेति, प्रमिताप्रमितविकल्पोऽतिदुःस्थः तथा सति सर्वदर्शनेषु पूर्वपक्षोपन्यासतन्निरसनानुपपत्तेः । पूर्वपक्षः प्रमितश्चेन्न दूष्य इति अप्रमितश्चेन्न दूष्य इति पूर्वपक्षस्तु प्रतीत एव न तु प्रमितः प्रतीतिसिद्धत्वाच्च दूषणमपि युक्तमिति चेत् तर्हि अङ्कुन्यग्र इत्यादिवाक्यवत् निर्विशेषशब्देन प्रतीतिर्जायते न तु प्रमितिः । तस्मान्निर्विशेषवस्तुप्रतीतं दूष्यमेवेत्यभिप्रायेण न निर्विशेषे वस्तुनि शब्दः प्रमाणमित्युक्तं, निर्विशेषवस्तुविषयप्रतीतिजनकत्वं नास्माभिर्निषिध्यते किं तु प्रमितिजनकत्वमेव निषिध्यते तस्मान्न प्रमिताप्रमितविकल्पाकाशः ।

अथ स्यात् नास्माभिर्निर्विशेषे स्वयम्प्रकाशे वस्तुनि शब्दः प्रमाणमित्युच्यते स्वतः सिद्धस्य प्रमाणानपेक्षत्वात् सर्वैः शब्दैस्तदुपरागविशेषा ज्ञातृत्वादयः सर्वे निरस्यन्ते, सर्वेषु विशेषेषु निवृत्तेषु वस्तुमात्रमनवच्छिन्नं स्वयम्प्रकाशं स्वत एवावतिष्ठत इति, नैतदेवं केन शब्देन तद्वस्तु निर्दिश्य तद्गता विशेषा निरस्यन्ते ज्ञप्तिमात्रशब्देनेति चेन्न सोऽपि सविशेषमेव वस्त्ववलम्बते प्रकृतिप्रत्ययरूपेण विशेष* गर्भितत्वात् । ज्ञा

* विशेषगर्भत्वादिति पा० ।

अवबोधन इति सकर्म्मकः सकर्तृकः क्रियाविशेष क्रियान्तरव्यावर्त्तकस्वभावविशेषश्च प्रकृत्याऽवगम्यते प्रत्ययेन लिङ्गसङ्ख्यादयः स्वतः सिद्धावप्येतत्स्वभाव-विशेषविरहे सिद्धिरेव न स्यात् । अनन्य*साधनस्वभा-वतया हि ज्ञप्तेः स्वतः सिद्धिरुच्यते ब्रह्मस्वरूपं कृत्स्नं सर्वदा स्वयमेव प्रकाशते चेत् न तस्मिन्नन्यधर्म्मा-ध्यासः सम्भवति । न हि रज्जुस्वरूपे ऽवभासमाने सर्पत्वादिरध्यस्यते,

अतो निर्विशेषादिशब्दाः कतिपयविशेषनिषेधपराः कृत्स्ननिषेधपरत्वे व्याघातादेव न प्रमितिजनका इत्यर्थः । एवं निर्विशेषवस्तुनोनिष्प्रमा-णकत्वमुक्तं स्वयम्प्रकाशस्य वस्तुनः प्रमाणानपेक्षत्वाच्छब्दो भेदनिषे-धपर एवेति शङ्कते अथ स्यादित्यादिना, प्रमाणानपेक्षत्वे वेदान्त-वैयर्थ्यमित्यत्राह सर्वैः शब्दैरिति, तदुपरागविशेषाः-तदारोपितविशेषा इत्यर्थः । अनवच्छिन्नम् अवच्छेदकज्ञातृज्ञेयादिनिवृत्त्या अनवच्छि-न्नमित्यर्थः । स्वत एव प्रमाणान्तरनिरपेक्षम्परिहरति नैतदित्यादिना, केन शब्देनेति केनचित्पदेन ब्रह्म निर्दिश्य तद्विशेषा निरसनीयाः अनिर्दिश्य विशेषनिरसने ब्रह्मणोऽपि स्वेतरव्यावृत्तत्वेन विशेषत्वाद्विशेषनिषेधे ब्रह्मापि निषिद्धं स्यादिति तत्परिहाराय ब्रह्म केनचित्पदेन निर्देष्टव्यमेव वेदान्तेषु श्रूयमाणानां ब्रह्मवाचिपदानां निर्वाहार्थं च केनचित्पदेन ब्रह्मणो निर्देश्यत्वमभ्युपगन्तव्यमित्यभिप्रायेण केन शब्देनेत्युक्तं, ज्ञप्तिमात्रेत्यादि स्पष्टं कथं सविशेषवस्त्ववलम्बत इत्यत्राह प्रकृतिप्रत्यययोगेनेत्यादि, तदेव विवृणोति ज्ञा अवबोधन इति, ज्ञप्तिमात्रशब्दस्य प्रस्तुतत्वात् ज्ञा अवबोधन इति धातुरुक्तः । इदं ब्रह्मवाचिसर्वपदानां प्रकृतिप्रत्ययविभागस्य प्रदर्शनार्थं क्रियाविशेष इति धात्वर्थत्वाद्धर्म्यन्तरनिष्ठत्वाच्च क्रियाविशेष

* अन्यसाधनस्वभावतया हि इति पा० ।

इत्युक्तं न तु स्पन्दनात्मकत्वात् क्रियान्तरव्यावर्तकस्वभावविशेषश्चेति व्यावर्तकस्वभावः स्वयम्प्रकाशत्वं क्रियान्तराणि हि जडरूपाणि लिङ्गसङ्ख्यादय इति ज्ञानज्ञप्त्यादिशब्दानां लिङ्गस्य शब्दसाधुत्वमात्रार्थत्वेऽपि देवेश्वरपुरुषोत्तमादिशब्दानां लिङ्गस्यार्थवत्त्वात् लिङ्गसंख्यादय इत्युक्तं, स्वयंप्रकाशत्वसिद्धिरपि सविशेषत्वादेवेत्याह स्वतः सिद्धावपीति, एतत्स्वभावविशेषविरहे—सकर्म्मकत्वसर्तृकत्वविरहे, सिद्धिरेव—प्रमाणमेव न स्यादित्यर्थः कुत इत्यत्राह अन्यसाधनस्वभावतयेति, ज्ञातुर्विषयव्यवहारहेतुतया हि स्वयंप्रकाशत्वं त्वया साधितमित्यर्थः । स्वसम्बन्धादर्थान्तरे तद्व्यवहारहेतुत्वं हि स्वयं प्रकाशत्वानुमानहेतुः । एवं निर्विशेषत्वे स्वयंप्रकाशत्वानुपपत्तिरुक्ता । निर्विशेषत्वे आच्छादिकाऽविद्यानिवृत्त्यनुपपत्तिमाह ब्रह्मस्वरूपमित्यादिना, कृत्स्नं- ज्ञात*व्यविशेषरहितम् । असम्भवः कथमित्यत्राह न हीति, कृत्स्नावभासे ऽध्यासायोगात् अनवभासमानांशः स्वीकार्य इत्यर्थः ।

अत एव हि भवद्भिराच्छादिकाऽविद्याभ्युपगम्यते ततश्च शास्त्रीयनिवर्तकज्ञानस्य ब्रह्मणि तिरोहितांशो विषयः । अन्यथा तस्य निवर्त्तकत्वं च न स्यात् । अधिष्ठानातिरेकिरज्जुत्वप्रकाशनेन हि सर्पत्वं बाध्यते । एकश्चेद्विशेषो ज्ञानमात्रे वस्तुनि शब्देनाभिधीयते स च ब्रह्मविशेषणं भवतीति सर्वश्रुतिप्रतिपादितसर्वविशेषणविशिष्टं ब्रह्म भवति, अतः प्रामाणिकानां न केनापि प्रकारेण निर्विशेषवस्तुसिद्धिः । निर्विकल्पकप्रत्यक्षेऽपि सविशेषमेव वस्तु प्रतीयते, अन्यथा सविकल्पके सोऽयमिति पूर्व्वावगतप्रकारविशिष्टप्रत्ययानुपपत्तेः, वस्तुसंस्थानविशेषरूपत्वाद्गोत्वादेर्निर्विकल्प-

* ज्ञातव्यावशेषरहितमिति पा० ।

कदशायामपि ससंस्थानमेव वस्त्वित्थमिति प्रतीयते । द्वितीयादिप्रत्ययेषु तस्यैव संस्थानविशेषस्यानेकवस्तुनिष्ठतामात्रं प्रतीयते संस्थानरूपप्रकाराख्यस्य पदार्थस्यानेकवस्तुनिष्ठतयाऽनेकवस्तुविशेषणत्वं द्वितीयादिप्रत्ययावगम्यमिति द्वितीयादिप्रत्ययास्सविकल्पका इत्युच्यन्ते । अत एवैकस्य पदार्थस्य भिन्नाभिन्नरूपेण द्व्यात्मकत्वं विरुद्धं प्रत्युक्तं, संस्थानस्य संस्थानिनः प्रकारतया पदार्थान्तरत्वं प्रकारत्वादेव पृथक्सिद्ध्यनर्हत्वं पृथगनुपलम्भश्चेति न द्व्यात्मकत्वसिद्धिः ।

अत एवेति अत एव–अज्ञातांशसम्भवादेव, न ह्याच्छाद्याभावे आच्छादनमुपपद्यते, तस्मादज्ञातांशो ऽभ्युगन्तव्य इत्यर्थः । ततश्चेति, न हि पुरोवर्तिमात्रविषयमिदमिति ज्ञानं भ्रमनिवर्तकम् अपि त्वज्ञातशुक्त्यंशविषयज्ञानमेव भ्रमनिवर्तकं, तस्माद्ब्रह्मणि पूर्वमज्ञातांशसम्भव एव निवर्तकज्ञानस्य निवर्तकत्वमित्यर्थः । तिरोधाननिवृत्तिसिद्ध्यर्थमेकविशेषाभ्युपगतिं शङ्कते एकश्चेदिति, स च ब्रह्मविशेषणं भवति इति,उपलक्षणत्वव्यावृत्त्यर्थं विशेषण–शब्दः, ज्ञाप्यत्वसिद्धये ब्रह्मगताध्यासनिवर्तकत्वसिद्धये च विशेषणमित्युक्तं, न ह्यन्यगतधर्मज्ञानेनान्यविषयभ्रमनिवृत्तिः पुरोवर्तिगतशुक्तित्वधर्मज्ञानेनैव हि तद्गतरूप्यत्वभ्रमनिवृत्तिरित्यभिप्रायः । अत इति स्पष्टम् । अथ निर्विकल्पकप्रत्यक्षस्य निर्विशेषविषयत्वमाशङ्क्य व्युदस्यति निर्विकल्पप्रत्यक्षेऽपीत्यादिना, बौद्धादयःसर्वविशेषशून्यविषयं निर्विकल्पकमाचक्षते तदयुक्तं योग्यानुपलम्भनिरस्तत्वात् यत्किञ्चिदपि वस्तु कतिपयव्यावृत्तं प्रतीयते, सर्वस्माद् व्यावृत्तं वा प्रतीयते इति तेनाकारेण सविशेषत्वान्न सर्वविशेषशून्यत्वं जातिगुणद्रव्यादीनामन्योन्यसम्बन्धं विना पृथक्पृथगुपलम्भो निर्विकल्पकप्रत्यक्षमिति केचिदाचक्षते तच्च योग्यानुपलम्भनिरस्तं, कल्प्यते चेत् तत्र कोहेतुः दण्डदेवदत्तादिषु

विशेषणविशेष्ययोः पृथगुपलम्भपूर्वकसहोपलम्भदर्शनादिति चेत् तत्किं सम्बन्धवेलायामुतासम्बन्धवेलायाम्, असम्बन्धवेलायां पृथग्ग्रहणमसम्बन्धप्रयुक्तं न विशेषणविशेष्यभावप्रयुक्तं, सम्बन्धवेलायां तु विशेषणविशेष्यभावेनैव ग्रहणं, तस्मान्नियमेन सम्बन्धिनां जातिव्यक्त्यादीनामसम्बन्धप्रयुक्तं पृथग् ग्रहणं नास्ति। नियमेन सम्बन्धेऽपि गन्धस्य पृथिव्यादिषु पृथगुपलम्भ इति चेत् तद्भिन्नसामग्रीवेद्यत्वान्न तु विशेषणविशेष्यभावात्, तस्माज्जातिव्यक्त्यादेरेकसामग्रीवेद्यत्वे सति सम्बन्धनियमान्न पृथग् ग्रहणमुपपद्यत इति विशिष्टविषयमेव प्रत्यक्षं, तस्मात्प्रथमपिण्डग्रहणं निर्विकल्पकं द्वितीयादिपिण्डग्रहणं सविकल्पकमित्यस्यार्थस्य सिद्धवत्कारेण निर्विकल्पकस्य सविशेषविषयतां दर्शयति निर्विकल्पकेत्यादिना, कुतः सविशेषविषयत्वमित्यत्राह अन्यथेति, प्रथमपिण्डग्रहणेऽनुवृत्त्यग्रहणाद्गोत्वादिग्रहणं नोपपद्यत इत्यत्राह वस्तुसंस्थानेति, न ह्यनुवृत्तिर्ज्जातिरपि तु अनुवृत्तेव जातिरनुवृत्ता जातिर्नानुवृत्तिरिति हि पञ्चिकाकारः, तस्मादनुवृत्त्यग्रहणेऽपि इदमित्थमिति ग्रहणे इत्थमंशो गोत्वादिर्गृहीत एव। अनेकव्यक्तिसम्बन्धरूपानुवृत्त्यग्रहणमनेकव्यक्तिग्रहणरूपसामग्र्यभावात्। तस्मान्निर्विकल्पकं सविशेषविषयमित्यर्थः। निर्विकल्पकेऽपि गोत्वादिर्गृह्यते चेत् निर्विकल्पकसविकल्पकयोः को विशेषः कतिपयविशेषग्रहणं कतिपयविशेषाग्रहणं च उभयत्र तुल्यमित्यत्राह द्वितीयादिप्रत्ययेष्विति, अनेकवस्तुनिष्ठता नाम तत्तद्वस्तुसंस्थानसादृश्यं प्रथमपिण्डग्रहणस्य द्वितीयादिपिण्डग्रहणस्य च निर्विकल्पसविकल्पशब्दौ कथं वाचकावित्यत्राह संस्थानरूपेति, संस्कारप्रमोषवता पुरुषेण द्वितीयादिग्रहणेऽपि नानुवृत्तिग्रहणमिति चेन्न द्वितीयादित्वेन ग्रहणं द्वितीयादिग्रहणं विवक्षितं तस्मान्न दोषः संस्कारसचिवत्वतद्रहितत्वसामग्रीभेदेनानुवृत्तिधर्म्मविशिष्टत्वतद्रहितत्वग्राह्यभेदेन च सविकल्पकनिर्विकल्पयोर्वैषम्यमित्यभिप्रायः। प्रसङ्गाद्भेदाभेदं व्युदस्यति अत एवेत्यादिना, एकस्य द्व्यात्मकत्वं चेन्न विरुद्धम् अपि तु भिन्नाभिन्नरूपेण द्व्यात्मकत्वं विरुद्धमित्यर्थः। अत एवेत्यत्र गर्भितमर्थं विवृणोति संस्थानस्येति, भेदाभेदे चत्वारो हेतवः सहोपलम्भ-

नियमः, सामानाधिकरण्यप्रत्ययः, एकशब्दानुविद्धप्रत्ययः, प्रथमपिण्डग्रहणे भेदकाकाराग्रहणादभेदप्रतिपत्तिश्चेति, एते परिह्रियन्ते संस्थानस्येत्यादिना, प्रकारत्वादेव–नियतप्रकारत्वादित्यर्थः । अपृथक्सिद्धधर्म्मत्वात्पृथक्प्रतिपत्त्यनर्हत्वमिति यावत् तत्कृतः पृथगनुपलम्भः, सहोपलम्भनियमस्तावत्संप्रतिपन्नैक्येषु भिन्नेषु च न दृष्टः, तत्र सहभावो भेदसाधकः द्वयोरेव हि सहभावः नियमांशस्तु नोभयत्र। किञ्च भेदसाधकसहभावस्य नियमो भेदनियमसाधकः एकसामग्रीवेद्यत्वे सति पृथक्स्थितेः अपृथक्स्थितत्वे सति भिन्नसामग्रीवेद्यत्वाद्वा सहोपलम्भनियमाभावः। अत्र त्वपृथक्स्थितत्वे सत्येकसामग्रीवेद्यत्वात्सहोपलम्भनियमः न त्वभेदात्, मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यमप्यपृथक्सिद्धप्रकारत्वादेवोपपद्यते, एकशब्दानुविद्धप्रत्ययोऽपि धर्म्यैकत्वान्न तु धर्म्मधर्म्मिणोरैक्यात् इति हेतुत्रयपरिहारः। प्रकारत्वादेवेत्यादिनाऽभिप्रेतः प्रथमपिण्डग्रहणे भेदाग्रहः संस्थानस्येत्यादिना परिहृतः। कथमुच्यते व्यावृत्त्यनुवृत्त्यग्रहेण हि भेदाग्रह उच्यते न केवलं व्यावृत्त्यनुवृत्ती एव भेदकधर्म्मौ विशेषणविशेष्यभावोऽपि भेदकः प्रथमपिण्डग्रहणेऽपीदमित्थमिति विशेषणविशेष्यभावेनैव ग्रहणाद्भेदोऽपि गृहीत एवेति।

अपि च निर्विशेषवस्तुवादिना स्वयम्प्रकाशे वस्तुनि तदुपरागविशेषाः शब्दैः सर्वैर्निरस्यन्त इति वदता के ते शब्दा निषेधका इति वक्तव्यं, वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति विकारनामधेययोर्वाचारम्भणमात्रत्वात् यत्तत्र कारणतयोपलक्ष्यते वस्तुमात्रं तदेव सत्यमन्यदसत्यमितीयं श्रुतिर्वदतीति चेत् नैतदुपपद्यते एकस्मिन् विज्ञाते सर्वं विज्ञातं भवतीति प्रतिज्ञाते अन्यज्ञानेनान्यज्ञानासम्भवं मन्वानस्यैकमेव वस्तु विकारा-

द्यवस्थाविशेषेण पारमार्थिकेनैव नानारूपमवस्थितं चेत् तत्रैकस्मिन् विज्ञाते तस्माद्विलक्षणसंस्थानान्तरमपि तदेव वस्त्विति तत्र दृष्टान्तोऽयं निदर्शितः नात्र कस्यचिद्विशेषस्य निषेधकः कोऽपि शब्दो दृश्यते वाचारम्भणमिति वाचा व्यवहारेण आरभ्यत इति आरम्भणं पिण्डरूपेणावस्थितताया मृत्तिकाया नाम चान्यत् व्यवहारश्चान्यः घटशरावादिरूपेणावस्थितताया़स्तस्या एव मृत्तिकाया अन्यानि नामधेयानि व्यवहाराश्चान्यादृशाः तथाऽपि सर्वत्र मृत्तिकाद्रव्यमेकमेव नानासंस्थाननानानामधेयाभ्यां नानाव्यवहारेणारभ्यत इत्येतदेव सत्यमित्यनेनान्यज्ञानेनान्यज्ञानसम्भवो निदर्शितः । नात्र किञ्चिद्वस्तु निषिध्यत इति पूर्व्वमेवायमर्थः प्रपञ्चितः ।

एवं प्रसङ्गाद्भेदाभेदनिरासः कृतः । पूर्वप्रस्तुतं हि वेदान्तवाक्यानां भेदनिरासपरत्वं तत्र वेदान्तवाक्यानां भेदनिरासपरत्वेऽपि केनचिच्छब्देन ब्रह्मणो निर्देश्यत्वात्स्वयंप्रकाशत्वात्तिरोधानादध्यासतन्निवृत्तिभ्यां च सविशेषत्वमुक्तमत्र वेदान्तवाक्यानां भेदनिरासपरत्वमेवानुपपन्नमित्युच्यते अपि चेत्यादिना, तदुपरागविशेषाः—तदारोपितविशेषाः । के ते शब्दा निषेधका इति चोद्ये उत्तरं वक्तव्यं तत्त्ववाक्यमेवेत्यर्थः । पूर्वं निर्विशेषपरत्वनिरासाय सद्विद्या व्याख्याता इदानीं तस्या भेदनिरासपरत्वमाशङ्क्य निराक्रियते वाचेत्यादिना, वाचारम्भणमात्रत्वात्—वागालम्बनमात्रत्वात्, व्यावहारिकत्वादपारमार्थिकत्वादित्यर्थः । यत्तत्र कारणतयोपलक्ष्यते वस्तुमात्रमिति कार्येष्वनुवर्तमानं कारणं सन्मात्रं यद्वस्तु तदेवेत्यर्थः । शङ्कितमर्थं दूषयति नैतदित्यादिना, वाचारम्भणमिति वा-

क्यस्यार्थः पूर्वापरसङ्गतो वाच्यः स च त्वन्मते नोपपद्यत इति वक्तुं पूर्वोक्त शङ्कामनुवदति एकस्मिन्नित्यादिना, विकाराद्यवस्थाविशेषेणेति विकार: कार्य्यावस्था आदिशब्देन कारणावस्था विवक्षिता नानारूपं नानावस्थं वाचारम्भणमिति पदस्यास्पष्टार्थत्वात्तद्व्याचष्टे वाचेति, कर्म्मणि ल्युडित्यर्थः व्यवहारेणेति प्रयोजनतया हेतुत्वमित्यर्थः। नामभेदात्कार्यभेदाच्च वैशेषिकोक्तं द्रव्यान्तरत्वमाशङ्क्य तच्च परिहरन् वाक्यार्थं योजयति पिण्डरूपेणेत्यादिना, पूर्वं हि फलितार्थ उक्तः। अत्रान्वयार्थ उच्यते नानासंस्थाननानानामधेयाभ्यामिति अन्वितमित्यर्थः । इत्थम्भावे तृतीया कर्तरि वा ताभ्यामारभ्यते आलभ्यते सम्बध्यत इत्यर्थः रलयोरविशेषः प्रसिद्धः आलम्भःस्पर्शहिंसयोरिति नैघण्टुकाः। व्यवहारेण चेति पाठे नानासंस्थाननानाधेयव्यवहारैरित्थंभूतमिति वा तैः सम्बध्यत इति वार्थः । भेदनिरासपरत्वे दूषणान्तरमाह–

अपि च येनाश्रुतं श्रुतमित्यादिना ब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वं प्रतिज्ञातं चेद्यथा सोम्यैकेन मृत्पिण्डेनेत्यादिदृष्टान्तः साध्यविकलः स्यात् । रज्जुसर्पादिवन्मृत्तिकाविकारस्य घटशरावादेरसत्यत्वं श्वेतकेतोः शुश्रूषोः प्रमाणान्तरेण युक्त्या चासिद्धमिति एतदपिसिषाधयिषितमिति चेत् यथेति दृष्टान्ततयोपादानं न घटते, सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यत्र सदेवैकमेवेत्यवधारणद्वयेनाद्वितीयमित्यनेन च सन्मात्रातिरेकिसजातीयविजातीयसर्वे विशेषा निषिद्धा इति प्रतीयते इति चेत् नैतदेवं कार्यकारणभावावस्थाद्वयावस्थितस्यैकस्य वस्तुनः एकावस्थावस्थितस्य ज्ञानेनावस्थान्तरावस्थितस्यापि वस्त्वै-

क्येन ज्ञाततां दृष्टान्तेन दर्शयित्वा श्वेतकेतोरप्रज्ञातं सर्वस्य ब्रह्मकारणत्वं च वक्तुं सदेव सोम्येदमित्यारब्धम्, इदमग्रे सदेवासीदिति अग्र इति कालविशेषः इदं–शब्दवाच्यस्य प्रपञ्चस्य सदापत्तिरूपां क्रियां सद्द्रव्यतां च वदति, एकमेवेति चास्य नानानामरूपविकारप्रहाणम् ।

अपि चेति, प्रमाणान्तरेण युक्त्या चेति प्रत्यक्षेण बाधःदर्शनान्मिथ्यात्वासिद्धिः । व्यावर्त्तमानत्वादियुक्तेराभासत्वाच्च न मिथ्यात्वसिद्धिरिति भावः । एतदित्यादिस्पष्टं सदेवेत्यादिवाक्यस्य भेदनिरासपरत्वमाशङ्क्य दूषयति सदेवेत्यादिना, सर्वं इत्यनेन स्वगतभेदा विवक्षिताः तेषामपि विजातीयभेदान्तर्गतत्वात् नैतदिति दृष्टान्तवाक्यानुगुण एव दार्ष्टान्तिकवाक्यस्यार्थोवर्णनीय इत्यभिप्रायेण दृष्टान्तवाक्यस्यार्थमनुवदति कार्यकारणेत्यादिना, सदेवेत्यादिवाक्ये तत्तत्पदोपस्थापितानेकविशेषान् दर्शयितुं विशेषोपस्थापकपदान्युपादत्ते इदमग्रे सदेवासीदिति, नायमन्वयक्रमः सदेवेदमग्रएकमेवासीदिति समन्वयः तस्मात्फलितान्विशेषान् वक्तुं तदुपस्थापकपदान्युपात्तानि । उपस्थापितविशेषानाह अग्र इतीति, सदापत्तिरूपां क्रियामित्यनेनासीदिति पदस्यार्थ उक्तः । सच्छब्दार्थमाह सद्द्रव्यतां चेति, सदेव चेत्तदानीं कोविशेष इत्यत्राह–

एतस्मिन्नुपपादिते अस्य जगतस्सदुपादानता प्रतिपादिता भवति । अन्यत्रोपादानकारणस्य स्वव्यतिरिक्ताधिष्ठात्रपेक्षादर्शनेऽपि सर्वविलक्षणत्वादस्य सर्वज्ञस्य ब्रह्मणः सर्वशक्तियोगो न विरुद्ध इति अद्वितीयपदमधिष्ठात्रन्तरं वारयति सर्वशक्तियुक्तत्वादेव ब्रह्मणः काश्चन श्रुतयः प्रथममुपादा-

नकारणत्वं प्रतिपाद्य निमित्तकारणमपि तदेवेति प्रतिपादयन्ति यथेयं श्रुतिः अन्याश्च श्रुतयो ब्रह्मणो निमित्तकारणत्वमनुज्ञाय अस्यैवोपादानतादि कथमिति परिचोद्य सर्वशक्तियुक्तत्वादुपादानकारणं तदितराशेषोपकरणं च ब्रह्मैवेति परिहरन्ति किंस्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुर्मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद् भुवनानि धारयन् ब्रह्मवनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुर्मनीषिणो मनसा विब्रवीमि वः ब्रह्माध्यतिष्ठद् भुवनानि धारयन्निति सामान्यतो दृष्टेन विरोधमाशङ्क्य ब्रह्मणः सर्वविलक्षणत्वेन परिहार उक्तः ।

एकमेवेति, एतस्मिन् प्रतिपादिते विभक्तनामरूपत्वेन भविष्यतोऽविभक्तनामरूपत्वे प्रतिपादिते भाव्यवस्थाविशेषवतः प्रागवस्थायोग उपादानत्वमिति लक्षणादुपादानत्वं प्रतिपादितं भवतीत्यर्थः । अद्वितीयपदं व्याचष्टे अन्यत्रेति, सर्वविलक्षणत्वादिति विलक्षणधर्मित्वाद्विलक्षणधर्म्मयोग उपपन्नः, यथा जलादिविलक्षणधर्म्मित्वादग्नेरुष्णत्वधर्मयोग इत्यर्थः । ब्रह्मणश्चेतनत्वात्प्रथमं निमित्ततां प्रतिपाद्य पश्चादुपादानान्तरनिषेधः कार्यः तस्मात्प्रथममेवोपादानत्वप्रतिपादनमनन्तरं निमित्तान्तरनिषेधश्च नोपपद्यते तस्मादस्य वाक्यस्य नायमर्थ इति शङ्कायामाह सर्वशक्तीति, असद्वा इदमग्र आसीत्ततो वै सदजायत तदात्मानं स्वयमकुरुतेति वाक्यं सर्वशक्तियुक्तत्वादेवेत्यादिग्रन्थे हृदि निहितं किं स्विद्वनमित्यादिवाक्यकटाक्षेणाह निमित्तकारणतामनुज्ञायेति, अन्याश्चेति, अध्यतिष्ठद् भुवनानि धारयन्नित्यस्यार्थोऽभिप्रेतः अयमर्थः जगदुपक्रमेण ब्रह्मप्रतिपादयन्त्यः श्रुतय उपा-

दानत्वपूर्वकं निमित्ततां वदन्तीति ब्रह्मोपक्रमेण तत्प्रतिपादयन्त्यः श्रुतयो ब्रह्मणश्चेतनत्वेन निमित्तत्वपूर्वकमुपादानतां वदन्तीति किंस्विद्वनमित्यादि वनशब्देनाधिकरणकारकं विवक्षितं वृक्षशब्देनोपादानत्वं निष्टतक्षुरिति बहुवचने न तात्पर्यम् अदितिः पाशानितिवत् हे मनीषिणः किं यूयमेवं पृच्छतेत्यर्थः। यदध्यतिष्ठदिति निमित्तत्वस्य संप्रतिपन्नत्वात्तदनुवादः अधिकरणमुपादानं तद्व्यतिरिक्तसकलकारकवर्गश्च ब्रह्मैवेत्युत्तरमाह ब्रह्मवनमिति, अधिकरणकारकं सर्वकारकोपलक्षणार्थं चोद्यपरिहाररूपेण ब्रह्मण एव सर्वविधकारणतोपपादने किं प्रयोजननित्यत्राह सामान्यतोदृष्टेनेति, तस्मात्सदेवेत्यादिवाक्यस्यास्मदुक्त एव वाक्यार्थ इत्याह अत इति, निषेधार्थं विशेषणानामनुवादः।

अतस्सदेव सोम्येदमग्र आसीदित्यत्राप्यग्र इत्याद्यनेकविशेषा ब्रह्मणः प्रतिपादिता भवदभिमतविशेषनिषेधवाची कोऽपि शब्दो न दृश्यते प्रत्युत जगद्ब्रह्मणोः कार्य्यकारणभावज्ञापनाय अग्र इति कालविशेषसद्भावः आसीदिति च क्रियाविशेषः जगदुपादानता जगन्निमित्तता च निमित्तोपादानयोर्भेदनिरसनेन तस्यैव ब्रह्मणस्सर्वशक्तियोगश्चेत्यप्रज्ञातास्सहस्रशो विशेषा एव प्रतिपादिताः, यतो वास्तवकार्य्यकारणभावादिज्ञापने प्रवृत्तमिदमत एवासदेवेदमग्र आसीदित्यारभ्यासत्कार्य्यवादनिषेधश्च क्रियते कुतस्तु खलु सोम्यैवं स्यादिति।

स्यादिति शङ्कायामादिशब्दोपात्तविशेषान् वदन् परिहरति प्रत्युतेत्यादिना, अप्रज्ञाता इत्यनेन निषेधार्थमनुवाद इत्येतत्परिहृतं पूर्वयोजनायामसत्कार्यवादोपन्यासनिरासवाक्यस्याव्याख्यातत्वात्तदिदानीं

योगस्य द्रव्यान्तरोत्पत्तिवादिनः सम्प्रतिपन्नस्यैवैकत्वनामान्तरव्यवहारान्तरादेरुपपादकत्वात् द्रव्यान्तरादर्शनाच्चेति कारणमेवावस्थान्तरापन्नं कार्य्यमित्युच्यत इत्युक्तम् ।

एतदुक्तं भवति इति, असत्कार्यवादः कीदृशः तस्मिन्सति प्रतिज्ञातार्थासिद्धिः कथमित्यत्राह तथा हीति, दण्डचक्रादेरपि निमित्तत्वेऽपि निमित्तशब्दस्याधिष्ठातरि प्रसिद्धिप्राचुर्य्यात्तद्व्यतिरिक्तं कारणं प्रभृतिशब्देनोच्यते अवयव्याख्यमिति अवयवा बहवोऽल्पपरिमाणाः अवयव्येकं वृहत्परिमाणमित्यनेन सङ्ख्याभेदपरिमाणभेदादिद्रव्यान्तरत्वसाधका हेतवो विवक्षिताः, अन्यस्य कार्यस्य कथमप्यवस्यातोद्रव्यतश्च ज्ञातता न सम्भवतीत्यर्थः । द्रव्यभेदहेतवः कथं निरस्यन्त इति चोदयति कथमिति, परिहरति कारणेति, संप्रतिपन्नस्यैवेति, असमवायिकारणत्वेन सम्प्रतिपन्नस्येत्यर्थः । द्रव्यान्तराभ्युपगतिः किं दर्शनादुत कल्पनेन न तावद्दर्शनं कल्पका बुद्धिशब्दकार्यान्तरादयोऽवस्थाविशेषेणान्यथा सिद्धाः । आस्ते शेते गच्छति तिष्ठत्येकोऽयं समाज इत्यादिषु बुद्धिशब्दान्तरादेरवस्थाविशेषहेतुकत्वदर्शनात् घटपटादिषु द्रव्यभेदहेतुकत्वं च दृष्टम् । आस्ते शेत इत्यादिष्ववस्थाभेदहेतुकत्वं च दृष्टमित्यत्र किं नियामकमिति चेत् आस्ते शेत इत्यादिषु हि द्रव्यप्रत्यभिज्ञया अवस्थाभेदहेतुकत्वं ज्ञायते एवं मृद्घटादिष्वपि द्रव्यप्रत्यभिज्ञया अवस्थाभेदहेतुकत्वं बुद्धिशब्दान्तरादेर्ज्ञायत इत्यर्थः । कथं निरस्यत इति शङ्कायां द्रव्यान्तरादर्शनाच्च निरस्यत इत्यन्वयः । इति कारणमेवेति, इति—तस्मादित्यर्थः, एवं नात्र क्षणिकमतनिरासः क्रियते अपि तु वैशेषिकमतनिरास इत्युक्तम् ।

ननु निरधिष्ठानभ्रमासम्भवज्ञापनायासत्कार्य्यवादनिरासः क्रियते । तथा हि एकं चिद्रूपं सत्यमेवावि*द्याऽऽच्छादितं जगद्रूपेण विवर्तत इति अविद्या-

* अविद्याप्रबलमिति पा० ।

श्रयत्वाय मूलकारणं सत्यमित्यभ्युपगन्तव्यमित्यसत्कार्यवादनिरासः । नैतदेवम् एकविज्ञानेन सर्वविज्ञानप्रतिज्ञादृष्टान्तमुखेन सत्कार्यवादस्यैव प्रसक्तत्वादित्युक्तं, भवत्पक्षे निरधिष्ठानभ्रमासंभवस्य दुरुपपादत्वाच्च यस्य हि चेतनगतदोषः पारमार्थिकः दोषाश्रयत्वं च पारमार्थिकं तस्य पारमार्थिकदोषेण युक्तस्यापारमार्थिकगन्धर्वनगरादिदर्शनमुपपन्नं, यस्य तु दोषश्चापारमार्थिकः दोषाश्रयत्वं चापारमार्थिकं तस्यापारमार्थिकेनाप्याश्रयेण तदुपपन्नमिति ।

अथ माध्यमिकमतनिरासपरत्वमाशङ्क्य निराक्रियते नन्वित्यादिना, निरधिष्ठानेति स्पष्टं । कथं निरधिष्ठानभ्रमासम्भवः अधिष्ठानं च किन्तस्य पारमार्थ्यं कथं भ्रमसम्भव इत्यत्राह तथा हीति, एक-शब्देन सजातीयादिभेदनिषेधः सत्यमेवेत्येवकारेणाधिष्ठानापारमार्थ्यव्यावृत्तिः । अधिष्ठानापारमार्थ्ये तस्याप्यपरमार्थत्वादधिष्ठानान्तरापेक्षेत्यनवस्था स्यात्तस्मात्सत्यमधिष्ठानमित्यभिप्रायः । परिहरति नैतदित्यादिना, प्रसक्तत्वादसत्कार्यवादनिरासः क्रियत इत्युक्तमित्यन्वयः । प्रतिज्ञादृष्टान्ताभ्यां सत्कार्यवादस्य प्रस्तुतत्वात्तदुपयोगित्वेनासत्कार्यवादनिरासः क्रियते न तु निरधिष्ठानभ्रमासम्भवज्ञापनायासत्कार्यवादनिरासः क्रियत इत्यर्थः । हेत्वन्तरं चाह भवत्पक्ष इति, तदेवोपपादयति यस्य ही ति, यस्य मते इत्यर्थः । दोषाश्रयत्वं च दोषसम्बन्धश्चेत्यर्थः । तस्य-तस्य मते इत्यर्थः अधिष्ठानापारमार्थ्ये भ्रमासम्भवः किं दर्शनादुच्यते उत युक्तिभिस्तथा कल्प्यते दर्शनाच्चेत् दोषदोषाश्रयत्वादेरप्यपारमार्थिकत्वेऽपि न क्वचिद्भ्रमो दृष्ट इति दोषादेरपि पारमार्थ्यमभ्युपगन्तव्यं स्यात्, युक्त्या पारमार्थ्यं कल्प्यते चेत् तर्हि दोषस्यापारमार्थ्ये दोषान्तरापेक्षित्वेनानवस्थाप्रसङ्गात्तस्यापि पारमार्थ्यं स्यात् । तत्रानवस्थादोषपरिहाराय स्वरूपाना-

ब्रह्मणस्तावन्मात्रता प्रतिषिध्यत इति सूत्रार्थः । नेह नानास्ति किञ्चनेत्यादिना नानात्वप्रतिषेध एव दृश्यत इति चेत्

नेह नानास्तीत्यादिष्वियत्तानिषेधपरत्वं दुर्वचमिति कृत्स्नभेदनिषेधपरत्वं शङ्कते नेहेत्यादिना, परिहरति अत्रापीति, वशित्वं गुणेन वशीकारः ईशानः नियन्ता वशित्वादीनां सत्यसङ्कल्पत्वविशेषरूपत्वात्सत्यसङ्कल्पत्वमत्रोक्तं सर्वस्याधिपतिरिति वाक्योक्तं स्वामित्वं सर्वेश्वरत्वशब्देनोच्यते अस्य प्रदर्शनार्थत्वात्प्रकरणोक्तस्य सर्वमिदं प्रशास्ति इत्युक्तं नियमनं भवति एष सेतुर्विधरण इत्युक्तं धारकत्वं चोक्तं भवति । एवं पतित्व–नियन्तृत्व-धारकत्वैरीश्वरस्य तं प्रत्यशेषनियाम्यधार्यभूतस्य जगतः शरीरत्वाच्चेतनाचेतनवस्तुशरीर इत्युक्तं सर्वप्रकारसंस्थितः सर्वप्रकारविशिष्टः । एवं प्रकार्यैकत्वस्य विहितत्वान्निषेधस्य विहितव्यतिरिक्तविषयकत्वाच्च प्रकारिनानात्वनिषेधपरमिदं वाक्यमित्यर्थः । न भवदभिमतमिति सजातीयविजातीयस्वगतरूपकृत्स्ननानात्वं न प्रतिषिध्यत इत्यर्थः । उक्तन्यायकलापेन सर्वाः श्रुतयो निर्वाह्या इत्याह सर्वास्विति, निषेधवाचकः कोऽपि शब्दो न दृश्यत इति के ते शब्दा इति हि प्रक्रान्तम्, अतस्तदेवोपसंहृतम् । एवं ब्रह्माज्ञानपक्षस्य श्रुत्यपेतत्वं दर्शितम् ॥

अत्राप्युत्तरत्र सर्वस्य वशी सर्वस्येशान इति सत्यसङ्कल्पत्व–सर्वेश्वरत्वप्रतिपादनाच्चेतनाचेतनसर्ववस्तुशरीर ईश्वर इति सर्वप्रकारसंस्थितः सर्वेश्वरः स एक एवेति तत्प्रत्यनीकाब्रह्मात्मकनानात्वं प्रतिषिद्धं न भवदभिमतं, सर्वास्वेवम्प्रकारासु श्रुतिष्वियमेव स्थितिरिति न क्वचिदपि ब्रह्मणः सविशेषत्वनिषेधकः को ऽपि शब्दो दृश्यते ।

अथ न्यायापेतत्वं दर्शयति अपि चेत्यादिना, श्रुतिन्यायापेतमिति हि पूर्वमुक्तम् । अपि चेति—न केवलं श्रुत्यपेतत्वमेव अपि तु न्यायापेतत्वं चेत्यर्थः । तिरोहितस्वरूपस्य हि भेददर्शनं तत्र तिरोधानदूषणेनैव परमतं समूलमुन्मूलितं भवतीति तिरोधिं दुदूषयिषुस्तन्मतमुपन्यस्य तदनुपपत्तिं प्रतिजानीते निर्विशेषेत्यादिना, कथमित्यत्राह तिरोधानं नामेति, प्रकाशनिवृत्तिस्तिरोधानमस्तु ततः किमित्यत्राह स्वरूपेति, नित्यं विभुमित्यादिश्रुतयो नित्यत्वं वदन्ति अनृतेन हि प्रत्यूढा इत्यादयस्तिरोधानं वदन्ति, एवं नित्यत्वतिरोधानयोरुभयोरपि श्रुतिप्रतिपन्नत्वाच्चानित्यत्वमिति शङ्कायां श्रुतिरप्ययोग्यार्थं वक्तुं नालमित्यभिप्रायेणाह प्रकाशपर्यायमिति, वाह्यन्तरैरिव ज्ञानस्य जडत्वमङ्गीकृतं चेत्प्रकाशस्य तद्व्यतिरिक्तत्वात् तन्निवृत्तिः स्वरूपनाशो न स्यात्

अपि च निर्विशेषज्ञानमात्रं ब्रह्म तच्चाच्छादिकाविद्या*तिरोहितस्वस्वरूपं स्वगतनानात्वं पश्यतीत्ययमर्थो न घटते—तिरोधानं नाम प्रकाशनिवारणं स्वरूपातिरेकिप्रकाशधर्म्मानभ्युपगमेन प्रकाशस्यैव स्वरूपत्वात्स्वरूपनाश एव स्यात्, प्रकाशपर्यायं ज्ञानं नित्यं स च प्रकाशोऽविद्यानि†वारित इति बालिशभाषितमिदम्

न च तथाऽभ्युपगतं, ब्रह्म ज्ञानस्वरूपं ज्ञानं च स्वयंप्रकाशमित्येवाभ्युपगतमित्यभिप्रायेण प्रकाशपर्यायमित्युक्तं, तिरोधानं प्रकाशनिवृत्तिः तस्मात्स्वयम्प्रकाशरूपं ज्ञानं नित्यं, तच्चाविद्यातिरोहितमिति व्याहतमितीममर्थं श्रुतिर्न प्रतिपादयतीत्यर्थः । एवं स्वयम्प्रकाशत्वश्रुतिं तिरोधानश्रुतिमुभयं श्रद्दधानेन त्वया व्याहतार्थ उक्तः स्यादित्युक्तम् ।

* आच्छादिकाऽविद्यातिरोहितस्वस्वरूपमित्येव मूलटीकयोः प्रामाणिकः पाठः तत्र पुँव्वद्भावाप्रवृत्तिमूलं तु श्रीभाष्यटिप्पण्यां निरवोचमिति तत्र द्रष्टव्यम् ।

† अविद्यातिरोहित इति पा० ।

उक्तार्थं च विवृण्वन् अन्यतरपरिग्रहे अन्यतरत् त्याज्यमित्याह अविद्ययेति, अविद्यया प्रकाशस्तिरोहित इत्यस्यार्थः प्रकाशस्य प्रागभावः प्रध्वंसाभावो वा इत्यर्थः । तत्रानुत्पाद्यस्य प्रकाशस्य प्रध्वंसाभाव एव तिरोधिः स्यादित्याह प्रकाशस्येति, एवं तिरोधानश्रुतिं श्रद्दधानेन त्वया स्वयम्प्रकाशत्वश्रुतिस्त्याज्या स्यात्स्वरूपनाशप्रसङ्गादित्युक्तम् । अथ स्वप्रकाशत्वाभ्युपगमे तिरोधानश्रुतिस्त्याज्या स्यादित्याह प्रकाशोनित्य इति, सत्स्वनिर्वचनीय एवेति–व्याहतत्वादयमर्थो विद्वत्सन्निधौ वक्तुमयोग्य इत्युपालम्भः । उक्तदोषः सिद्धान्तिनोऽपि प्रसजतीति चोदयति ननु चेत्यादिना, भवतोऽपीति, सत्यं ज्ञानमनन्तं ब्रह्म विज्ञानघन एव प्रज्ञानघन एव इत्यादिभिर्ज्ञानस्वरूपत्वं त्वयाऽभ्युपगन्तव्यं, स चेति,

अविद्यया प्रकाशस्तिरोहित इति प्रकाशोत्पत्तिप्रतिबन्धो वा विद्यमानस्य विनाशो वा प्रकाशस्यानुत्पाद्यत्वाद्वि* नाश एव स्यात्, प्रकाशो नित्यो निर्विकारस्तिष्ठतीति चेत् सत्यामप्यविद्यायां ब्रह्मणि न किञ्चित्तिरोहितमिति† नानात्वं पश्यतीति भवतामयं व्यवहारः सत्स्वनिर्वचनीय एव ॥

अत्रायं पुरुषः स्वयंज्योतिर्भवति आत्मा ज्योतिः सम्राडिति होवाचेत्यादिभिः स्वयम्प्रकाशत्वमभ्युपेत्य, तस्मैति, तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसञ्ज्ञिता इत्यादिभिस्तिरोधानमभ्युपेत्य देवत्वाद्यध्याससिद्ध्यर्थमित्यर्थः । त्वत्पक्षे दोषाधिक्यमस्तीत्याह किञ्चेति, प्रयोजकं तुल्यं चेत्कथं दोषाधिक्यमिति चेत् उच्यते भेदवादिना सुखित्वदुःखित्वशिष्याचार्य्यबद्धमुक्तादिव्यवस्थाः प्रामाणिकत्वेनाभ्युपेताः तिरोधानेन सर्वात्मना स्वरूपनाशे सति प्रामाणिकानेकव्यवस्थाभङ्गः स्यात्, अस्मत्पक्षे तु व्यवस्थानां काल्पनिकत्वान्न तद्भङ्गाद्दोषः । त्वत्पक्षे तु स्वरूपनाशप्रसङ्गात्प्रामाणिकत्वेनाभ्युपग-

* स्वरूपनाश एव स्यादिति पा० ।
† य एव नानात्वमिति पा० ।

तानेकव्यवस्थाभङ्गप्रसङ्गाच्च दोषाधिक्यमिति भावः । परिहरणीय इत्यस्यायमभिप्रायः सर्वत्र हि प्रतिवन्दीप्रयोगः परिहारसाम्याभिप्रायेण, अन्यथा प्रतिवन्दी निष्प्रयोजना, न हि त्वं चोर इत्यत्र त्वमपि चोर इत्युक्ते दोषपरिहारः स्यात् । तस्मात्परिहारतुल्यत्वमेव प्रतिवन्दीं वदतोऽभिप्रेतमित्यत्रापि यस्त्वया परिहार उच्यते सोऽस्मत्पक्षेऽपि समान इति परिहरति—

ननु च भवतोऽपि विज्ञानस्वरूप आत्माऽभ्युपगन्तव्यः स च स्वयम्प्रकाशः तस्य च देवादिस्वरूपात्माभिमाने स्वरूपप्रकाश–तिरोधानमवश्यमाश्रयणीयं, स्वरूपप्रकाशे सति स्वात्मन्याकारान्तराध्यासायोगादतो भवतश्चायं समानो दोषः ।

अत्रोच्यते इत्यादिना, प्रतिवन्दीं वदता पूर्वपक्षिणाऽयमर्थोऽभिप्रेतः, न हि वचनविरोधे न्यायः प्रवर्तत इति न्यायाज्जीवस्वरूपनित्यत्वे तस्य च तिरोधाने शास्त्रसिद्धे सति तद्विरुद्धस्तर्को न प्रवर्तत इति परिहारं वदसि चेत्सोऽस्मत्पक्षेऽपि तुल्य इति एतत्प्रतिवक्ति स्वभावत इति, वचनविरोधे केवलतर्को यद्यपि न प्रवर्तते तथाऽपि वचनान्तरविरोधो दुर्वारः । ब्रह्मणो हेयप्रत्यनीकत्वकल्याणगुणाकरत्ववचनैर्जगतस्तद्विभूतित्वविधायिवचनैश्च ब्रह्मणो भ्रमाश्रयत्वादिकं जगतो भ्रमविषयत्वं च विरुद्धमिति ब्रह्मणस्तिरोधानादिकं वचनं न प्रतिपादयितुमलम् । एवं वचनविरोधेन भवदभिमतार्थस्य व्याहतस्य श्रुत्या प्रतिपादयितुमशक्यत्वात् अस्मदुक्तस्तर्कस्त्वन्मते प्रवर्त्तते एवेति । अस्मत्पक्षे तु जीवस्वरूपतिरोधानादेर्वचनान्तरविरोधाभावाज्जीवस्वरूपतिरोधानादिकं वचनं प्रतिपादयत्येवेति तद्विरोधे न तर्कः प्रवर्तत इति न परिहारसाम्यमित्यभिप्रायेण स्वभावत इत्यादिकमुच्यते

किञ्चास्माकमेकस्मिन्नेवात्मनि भवदुदीरितं दुर्घटत्वं

भवतामात्मानन्त्याभ्युपगमात्सर्वेष्वयं दोषः परिहरणीयः। अत्रोच्यते स्वभावतो मलप्रत्यनीकानन्तज्ञानान-

न केवलं मलराहित्यम् अपि तु मलविरोधीत्यभिप्रायेण मलप्रत्यनीकेत्युक्तं, पञ्चगव्यादिव्यावृत्त्यर्थं स्वभावत इत्युक्तम्। अनन्तम्—अपरिच्छिन्नं स्वरूपं-धर्मिस्वरूपं, प्रदेशभेदेन जडत्वाननुकूलत्वाशङ्काव्यावृत्त्यर्थं एकशब्दः। स्वाभाविकशब्देन स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतिरभिप्रेता सावधिकातिशयव्यावृत्त्यर्थमनवधिकातिशयशब्दः। अपरिमितः-असंख्येयः उदारगुणसागरो यस्येति बहुव्रीहिः। एवमुभयलिङ्गत्ववचनविरोधादर्शितः अनेन भ्रमाश्रयत्वं दुर्वचमित्युक्तं भवति। अथ विभूतेर्भ्रमविषयत्वानुपपत्तिरुच्यते, तत्र नित्यविभूतिमत्त्वमुच्यते निमेषेत्यादिना, अपरिमितव्यवच्छेदस्वरूपेति निमेषकाष्ठाद्यवच्छेदाः कालस्यासाधारणधर्मा इत्यर्थः। अन्यथा व्यवच्छेदवदिति हि वक्तव्यं न तु व्यवच्छेदस्वरूपेति, कालो हि स्वयं परिणामी प्रकृतेः परिणामहेतुः, निमेषादयः कालपरिणामविशेषाः सर्वे निमेषा जज्ञिरे इति श्रुतेः, एवं स्वयं परिणामित्वमुक्तम्।

न्दैकस्वरूपं स्वाभाविकानवधिकातिशयापरिमितोदारगुणसागरं निमेषकाष्ठाकलामुहूर्तादिपरार्द्धपर्यन्तापरिमितव्यवच्छेदस्वरूपसर्वोत्पत्तिस्थितिविनाशादिसर्वपरिणामनिमित्तभूतकालकृतपरिणामास्पृष्टान-

अथ प्रकृतिपरिणामहेतुत्वमुच्यते सर्वोत्पत्तीति, आदि-शब्देन जायमानाद्यवस्थात्रयं विवक्षितं सर्वशब्देन विशदाविशदपरिणामाश्च विवक्षिताः। निमित्तशब्देनोपादानत्वाधिष्ठातृत्वव्यावृत्तिः, यथा ब्रह्मण उपादानत्वं प्रकृतिद्वारकं तथा ब्रह्मण एवोपकरणत्वमपि कालद्वारकमित्यभिप्रायः। एवं सर्गस्थितिनाशानां जगतो योजगन्मयः मूलभूतो नमस्तस्मै इति वचनस्य कलामूहूर्त्तादिमयश्च काल इत्यस्य चार्थो विवक्षितः। जगन्मय आदित्यचन्द्राद्यवच्छेद्यतया सर्गाद्यवच्छेदकतया जगत्प्रचुर इत्यर्थः। एवंविधकालापरिणाम्या नित्यविभूतिरित्याह कालकृतपरिणा-

मास्पृष्टेति, कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुरित्यस्याऽर्थोऽभिप्रेतः । अनन्तत्वेऽभिहितेऽपि महच्छब्देन विशेषणं लीलाविभूत्यपेक्षया महत्त्वाभिप्रायम्, आनन्त्यं हि विभूतिद्वयसाधारणं भोगोपकरणाद्यानन्त्यपरो वा महच्छब्दः । अस्पृष्टानन्तमहाविभूतीति ब्रह्मविशेषणं, महाविभूतिसंस्थानं शुद्धे महाविभूत्याख्ये इति वचने महाविभूति-शब्देन स्मारिते ।

न्तमहाविभूतिस्वलीलापरिकर-स्वांशभूतानन्तबद्धमुक्तनानाविधचेतन-तद्भोग्यभूतानन्तविचित्रपरिणाम-

अथ लीलाविभूतिमत्त्वमुच्यते स्वलीलेत्यादिना, मुक्तस्य लीलापरिकरत्वं मोचनलीलापरिकरत्वात् स्वांशभूतशब्देन विशेषणतयांऽशत्वं विवक्षितं मुक्तेषु नानाविधत्वं स एकधा भवतीत्यादिश्रुत्युक्तं, भगवल्लीलान्तर्गतस्वसङ्कल्पगृहीतदेहवैविध्यरूपं चेतनेतर-शब्देनाचेतनशब्दार्थो व्याख्यातः । वस्तुजात-शब्देन प्रधानाव्यक्तकाला विवक्षिताः पूर्वं कालकीर्तनं नित्यविभूतेस्तादधीन्यव्यावृत्त्यै, एवंविधस्य वस्तुजातस्यान्तर्यामित्वेन कृतं सर्वशरीरत्वसर्वप्रकारावस्थानं सर्वशरीरतया सर्वप्रकारत्वेनावस्थानमन्तर्यामित्वकृतं तेनावस्थानेनावस्थितं-विशिष्टमित्यर्थः । एवं शरीरशरीरिभावकथनेन ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः । तमेवार्थं स्वरूपेण भ्रान्तिदर्शनतः स्थितमित्यादिवाक्योक्तं भ्रान्तिदर्शनं ब्रह्मणश्शरीरभूतजीवद्वारकमित्युक्तं भवति । शरीरवाचिशब्दानां शरीरिपर्यन्तत्वे हेतुर्विवक्षितः सर्वप्रकारशब्देन ।

शक्तिचेतनेतरवस्तुजातान्तर्यामित्वकृतसर्वशरीरत्वसर्वप्रकारावस्थानावस्थितं परं ब्रह्म च वेद्यं, तत्साक्षात्कारक्षमभगवद्द्वैपायन-पराशर-वाल्मीकि-मनु-याज्ञवल्क्य-गौतमापस्तम्बप्रभृतिमुनिगणप्रणीत-विध्यर्थवादमन्त्ररूपवेदमूले-तिहासपुराणधर्म्म-

एवं जगतो भगवद्विभूतित्वविधायिवाक्यैर्विरोधाज्जगतो भ्रमविषयत्वमयुक्तमित्युक्तं भवति, एवंविधं परं ब्रह्म वेद्यमभ्युपगच्छतामित्यन्वयः स्वाभिमतार्थवाचिनो वचनस्य तत्प्रामाण्यस्य मिथ्यात्वं वदता त्वया न हि वचनविरोधे न्यायः प्रवर्त्तत इति परिहारो दुर्वचः । वचनस्य प्रामाण्यस्य च मिथ्यात्वादित्यभिप्रायेण प्रमाणस्वरूपं दर्शयति तत्साक्षादित्यादिना, तत्साक्षात्कारतमशब्देन भगवद्द्वैपायनादिपरमर्षिगणपरिगणनेन चेतरेषां चानुपलब्धेरित्युक्तस्मृत्यधिकरणस्यार्थोऽभिप्रेतः । तत्र कपिलस्य वेददर्शनयोगिप्रत्यक्षाख्यपरिकरद्वयसम्भवादाप्तिः पूर्वपक्षिता । सिद्धान्ते तु परिकरद्वयं तुल्यं वक्तृबहुत्वमधिकहेतुरिति ह्युक्तं तदत्र स्मारितम् । तद्व्याख्यानां प्रामाण्यं कथमित्यत्राह विध्यर्थवादेति, विधिमूलं धर्म्मशास्त्रं, मन्त्रार्थवादमूलमितिहासपुराणमित्यर्थः । धर्म्मशास्त्रेतिहासपुराणेषु सर्वेष्वपि विध्यर्थवादमन्त्रार्थेषु सत्स्वपि प्राचुर्य्यादेवमुक्तम् । अनधीतशाखार्थैः सहाधीतशाखार्थविशदीकरणमुपबृंहणं, परमार्थभूत-शब्देन परपक्षे वचनविरोधे तर्काप्रवृत्तिरूपपरिहारो दुर्वचः वचनतत्प्रामाण्यादेरपारमार्थ्यादिति सूचितम् ॥

शास्त्रोपबृंहितपरमार्थभूतानादिनिधनाविच्छिन्नपाठसम्प्रदाय ऋग्यजुस्सामाथर्वरूपानन्तशाखं वेदं चा-

अनादिनिधनादिशब्देन वेदप्रामाण्यं विवक्षितं, किमर्थमुपबृंहणापेक्षा अनन्ता वै वेदा इति वेदानामानन्त्यादिति चेत् न ऋग्यजुःसामाथर्वाख्यानां वेदानां चतुःसङ्ख्यासङ्ख्यातत्वेनानन्त्याभावादिति चेत् तत्राह ऋग्यजुःसामाथर्वरूपानन्तशाखमिति, यथा देवमनुष्यादिचतुष्कोटिनिविष्टाः प्राणिनोऽसंख्येया एवमृग्यजुस्सामादिचतुष्कोटिनिविष्टा अपि वेदाः शाखाभेदेनानन्ता इत्यर्थः । वेदं चाभ्युपगच्छतामिति प्रमाणं प्रमेयं च परमार्थत्वेनाभ्युपगच्छतामित्यर्थः । उक्तार्थेषु ऋषिवचनानि परिगणनक्रमेणोपादत्ते यथोक्तमित्यादिना, यो मामिति, अजमिति अचेतनबद्धव्यावृत्तिः । अनादिमजमिति मुक्तव्यावृत्तिः, लोकमहेश्वरमिति नित्यसिद्धव्या-

वृत्तिः लोक्यत इति व्युत्पत्त्या, एवं विजानतामुक्तिरुक्ता असम्मूढः स मर्त्ये-ष्वित्यादिना तदप्यत्राभिप्रेतम्। चिदचिद्वैलक्षण्यायाह द्वाविमाविति, अत्र व्यापनभरणस्वाम्यादयः प्रतिपन्नाः। तत्रैव नित्यविभूतिमत्त्वे प्रमाणमाह कालमिति, लीलाविभूतिमत्त्वे वचनमाह अव्यक्तादीति, तदायत्तोत्प-त्त्यादिकत्वे तच्छेषत्वे च प्रमाणमाह–

भ्युपगच्छतामस्माकं किन्न सेत्स्यति, यथोक्तं भगवता द्वैपायनेन महाभारते–

कृष्ण एवेति, व्याख्येयं पदं व्याचष्ट कृष्णस्येति, उक्तमर्थं विशदीकर्त्तु-मनुक्तं च दर्शयितुमाह भगवता पराशरेणेति, सर्वशब्दानां वस्तुमात्रमुप-लक्ष्यमिति न मुख्यार्थो ब्रह्मेति वादश्चात्र परिहृतो भवति। भगवच्छब्द-निर्वचनात् महाविभूत्याख्ये सर्वकारणकारणे इत्युभयविभूतिमत्त्वं सिद्धं, शुद्धे इति, ज्ञानशक्तीति, विना हेयैरित्यादिभिरुभयलिङ्गत्वं ब्रह्मणस्सिद्धं त्यनिविभूतेरकालकाल्यत्वे वचनमाह कलेति, मनुनापीति, प्रशासितृत्वा-दिगुणा उक्ता इत्यभिप्रायः। याज्ञवल्क्येनापीति उक्तमित्यन्वयः। ईश्वरज्ञा-नान्न तु निर्विशेषज्ञानादिति भावः। आपस्तम्बवचनं व्याचष्टे सर्वं इत्या-दिना, अङ्गं वपुर्वर्ष्म पुरं प्रतीकमिति हि नैघण्टुकाः।

यो मामजमनादिं च वेत्ति लोकमहेश्वरम्। द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥ उत्तमः पुरुषस्त्वन्यः परमात्मे-त्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्त्यव्यय ईश्वरः॥ कालं स पचते तत्र न कालस्तत्र वै प्रभुः। एते वै निर-यास्तात!स्थानस्य परमात्मनः॥ अव्यक्तादिविशेषान्तं परिणामर्द्धिसंयुतम्। क्रीडा हरेरिदं सर्वं क्षरमित्यवधा-र्य्यताम्॥ कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः॥

कृष्णस्य हि कृते भूतमिदं विश्वं चराचरमिति ॥ कृष्णस्य हि कृते इति कृष्णस्य शेषभूतं सर्वमित्यर्थः । भगवता पराशरेणाप्युक्तं—शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते। मैत्रेय! भगवच्छब्दः सर्वकारणकारणे ॥ ज्ञानशक्तिबलैश्वर्य्यवीर्य्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥ एवमेष महाशब्दो मैत्रेय! भगवानिति । परमब्रह्मभूतस्य वासुदेवस्य नान्यगः ॥ तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः । शब्दोऽयं नोपचारेण त्वन्यत्र ह्युपचारतः ॥

एवमुभयलिङ्गत्वोभयविभूतिमत्त्वप्रतिपादकवचनैर्विरोधात् वचनं ब्रह्मणस्तिरोधानादिकं न प्रतिपादयतीति हेतोश्च वचनतत्प्रामाण्यादेर्मिथ्यात्वाभ्युगपमाच्च । न हि वचनविरोधे न्यायः प्रवर्तत इति परिहारस्त्वत्पक्षे वक्तुमशक्यः । अस्मत्पक्षे तु जीवस्वरूपतिरोधानादेर्वचनान्तरविरोधाभावात् तद्वाक्यं प्रतिपादयतीत्यनेन वचन—तत्प्रामाण्यादेर्मिथ्यात्वाभावाच्च न हि वचनविरोधे न्यायः प्रवर्त्तत इति परिहारः सुवच एवेत्यभिप्रायः ।

एवम्प्रकारममलं स*त्यं व्यापकमक्षयम् । समस्तहेयरहितं विष्णवाख्यं परमं पदम् ॥ कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः । क्रीडतो बालकस्येव चेष्टास्तस्य निशामयेत्यादि ॥ मनुनाऽपि प्रशासितारं सर्वेषामणीयांसमणीयसामित्यादिनोक्तं, याज्ञवल्क्येनापि क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मतेति, आप-

* नित्यमिति पा॰ ।

स्तम्बेनापि पूः प्राणिनः सर्वगुहाशयस्येति, सर्वे प्राणिनः गुहाशयस्य परमात्मनः पूः—पुरं शरीरमित्यर्थः। प्राणिन इति जीवात्मकभूतसंघाताः ।

एवमभिप्रेतस्य परिहारस्यास्फुटत्वात्तमजानन्नुपपत्त्यैव परिहारमपेक्षमाणः पूर्व्वपक्षी सोपालम्भं चोदयति ननु चेति, परिहरति उच्यत इत्यादिना, न केवलं वचनविरोधादेव परिहारः केवलतर्केणापि परिहारो विद्यत एवेत्यभिप्रायेणाह एवमिति, एवमभ्युपगच्छतां—तत्त्वप्रमाणं तत्त्वप्रमेयं च पारमार्थिकत्वेनाभ्युपगच्छतामित्यर्थः । आत्मधर्मभूतस्येत्यनेन स्वरूपव्यावृत्तिः पारमार्थिकं सङ्कोचं विकासं ब्रुवतामिति न हि ब्रह्माज्ञानवादिना सङ्कोचविकासौ वक्तुं शक्यौ तथा सति तावपि व्यावहारिकौ स्यातां न परमार्थौ सङ्कोचविकासयोरप्यपारमार्थ्ये सङ्कोचविकासविषयभ्रमहेतुतया तिरोधानं वक्तव्यं तत्रापि व्यावहारिकसङ्कोचाभ्युपगमे तद्विषयभ्रमहेतुतया पुनरपि तिरोधानमित्यनवस्था स्यादित्यभिप्रायेण पारमार्थिकं सङ्कोचं विकासञ्चेत्युक्तं, सर्वमिदं परिहृतमिति

ननु च किमनेनाडम्बरेण चोद्यं तु न परिहृतम्, उच्यते एवमभ्युपगच्छतामस्माकमात्मधर्म्मभूतस्य चैतन्यस्य स्वाभाविकस्यापि कर्म्मणा पारमार्थिकं सङ्कोचं विकासं च ब्रुवतां सर्वमिदं परिहृतं, भवतस्तु प्रकाश एव स्वरूपमिति प्रकाशो न धर्म्मभूतस्तस्य सङ्कोचविकासौ वा नाभ्युपगम्येते। प्रकाशप्रसरानुत्पत्तिमेव तिरोधानभूताः कर्म्मादयः कुर्वन्ति। अविद्या चेत् तिरोधानं तिरोधानभूतया तया स्वरूपभूतप्रकाशनाश इति पूर्व्वमेवोक्तः ।

देवादिभ्रमस्याधिष्ठानस्फुरणसापेक्षत्वादत्र धर्म्मिस्वरूपं स्वयम्प्रकाश-

रूपमधिष्ठानतया स्फुरति नात्र ज्ञानान्तरापेक्षा अजडत्वात् जड़त्वाद्धि शुक्त्यादेर्ज्ञानान्तरापेक्षा एवं धर्म्मिस्वरूपमधिष्ठानं स्फुरति भ्रमविरोधिनोऽणुत्वनित्यत्वाद्याकारास्ते ज्ञानान्तरवेद्या इति तत्तिरोधानाद् भ्रम उपपद्यते, तिरोधानं च प्रकाशनिवृत्तिः प्रकाशश्च न ज्ञानस्वरूपः अपि तु प्रसराख्योज्ञानधर्म्मः प्रकाशरूपप्रसराभावश्च सङ्कोचः, भावान्तरस्यैवाभावत्वात्सङ्कोचाभावः प्रसरः, स एव तिरोधाननिवृत्तिरिति न तदा भ्रमः, एवं सति ज्ञानं धर्म्मिस्वरूपं च नित्यं ज्ञानधर्म्मभूतप्रसरस्यैव प्रकाशत्वात्, तदभावस्य च सङ्कोचत्वात्प्रसराख्यप्रकाशनिवृत्तिरूपं तिरोधानम् उपपद्यत इत्यर्थः । अयं च परिहारो भवत्पक्षे वक्तुमशक्य इत्याह भवतस्त्विति, स्वरूपेऽपि प्रकाशे तस्य सङ्कोचविकासावभ्युपगतौ चेत् न स्वरूपनाशः । तथा च नाभ्युपेतमित्याह तस्येति, त्वन्मते सङ्कोचविकासावभ्युपगतौ स्यातां ततः कथं प्रकाशनिवृत्तिरित्यत्राह—

अस्माकं त्वविद्यारूपेण कर्म्मणा स्वरूपनित्यधर्म्मभूतज्ञानप्रकाशः सङ्कुचितः । तेन देवादिस्वरूपात्माभिमानोभवतीति विशेषः, यथोक्तम् अविद्या कर्म्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते । यया क्षेत्रज्ञशक्तिस्सा वेष्टिता

प्रकाशप्रसरे इति, प्रकाश एव प्रसरः प्रकाशप्रसरः । यद्वा प्रकाशशब्दवाच्यस्य ज्ञानस्य प्रसरः तस्यानुत्पत्तिरित्यर्थः । प्रकाशशब्दो हि धर्म्मिपरो धर्म्मपरश्च भानुर्भानुमाँस्तेजस्तेजस्वीतिवत् । एवकारेण स्वरूपाभावधर्म्मभूतज्ञानाभावौ च व्यावर्त्तितौ । तिरोधानभूतास्तिरोधायकभूताः, कर्म्मोदय इत्यादिशब्देन प्रकृतिर्वासना च गृह्यते । वासनारेणुकुण्ठितः, गुणमायासमावृतः इत्यादिवचनात् । एवं स्वपक्षे परपक्षेऽपि स्वरूपनाशप्रसङ्गतदप्रसङ्गरूपं वैषम्यं वक्तुं तदुपयोग्यर्थशिक्षा कृता । अथ स्वरूपनाशप्रसङ्ग—तदप्रसङ्गरूपवैषम्यं दर्शयति अविद्या चेदिति, प्रकाशनिवृत्तिर्हि तिरोधानं स्वरूपस्य प्रकाशरूपत्वात् प्रकाशनिवृत्तिरूपतिरोधानं स्वरूपनाशःस्यात् त्वन्मते । अस्मन्मते आत्मधर्म्मभूतज्ञानसङ्कोचस्तिरोधिरिति धर्मिस्वरूपस्य ज्ञानस्य च

नित्यत्वमुपपद्यते तेन सङ्कोचेन भ्रमविरोध्याकाराग्रहणाद्भ्रमोऽप्युपपद्यते इत्यर्थः । ननु भ्रमविरोध्याकारो नामासाधारणधर्म्मः आत्मनोऽसाधारणबुद्धिसुखेच्छादयो गृह्यन्त इति भ्रमो नोपपद्यत इति चेन्न असाधारणधर्म्मस्य भ्रमविरोधित्वे द्वयमपेक्षितं स्वरूपज्ञानमसाधारणत्वेन ज्ञानं च, शुक्तित्वादयोऽप्यन्यत्रासाधारणत्वेन ज्ञाता एव हि भ्रमविरोधिनः अध्यासादसाधारणत्वाग्रहणम्—

नृप! सर्वगा ॥ संसारतापानखिलानवाप्नोत्यतिसन्ततान् । तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता ॥ सर्वभूतेषु भूपाल! तारतम्येन वर्त्तते ॥ इति, क्षेत्रज्ञानां स्वधर्म्मभूतस्य ज्ञानस्य कर्म्मसंज्ञयाऽविद्यया सङ्कोचं विकासं च दर्शयति।

असाधारणत्वाग्रहणादध्यास इति परस्पराश्रयो न दोषः स्यात्, बीजाङ्कुरन्यायादिति एवं तर्केणैव परिहार उक्तः । स्वोक्ता तर्कसरणिः प्रमाणानुसारिणीति दर्शयति यथोक्तमिति, तारतम्येन वर्तत इत्यनेन ज्ञानस्य सङ्कोचविकासौ सिद्धौ । न ह्यणुमात्रस्य स्वरूपस्य तारतम्यं, तस्माद्धर्म्मभूतज्ञानद्वारकमेवात्मनस्तारतम्यमिति, ज्ञानद्वारकत्वं च तत्रैवोपरितनश्लोकैर्विवृतमप्राणिमत्सु स्वल्पा सा स्थावरेष्वित्यादिभिः । उदाहृतश्लोकार्थमाह क्षेत्रज्ञानामिति, अत्रोच्यत इत्यादिग्रन्थस्यायमर्थः प्रतिपाद्यः स्वरूपनाशप्रभृतीनि यानि दूषणानि त्वन्मते लक्ष्यन्ते तेषामस्मन्मते ऽपि साम्यापादनमनुपपन्नं निर्विशेषत्वजीवब्रह्मैकत्वजगन्मिथ्यात्वप्रयुक्तत्वात्तेषां दूषणानामित्यभिप्रायेण स्वभावत इत्यादिग्रन्थजातमुक्तम् । एवं सामान्येनोक्ते सति प्रस्तुतचोद्यविशेषस्य कः परिहार उक्त इत्यभिप्रायेण ननु च किमनेनाऽऽडम्बरेणेत्यादि चोद्यम् उक्तम् । उच्यत इत्यादिना प्रस्तुतचोद्यविशेषपरिहारश्चोक्त इति ॥

अथ स्वरूपानुपपत्तिमाह अपि चेति, अच्छादिकेत्यादिना तदभ्युपगमप्रकारमाह अच्छादिकाविद्याशब्दार्थविवरणार्थं ब्रह्मस्वरूपतिरोधानहेतु-

स्यात् तस्य नित्यत्वादनिर्मोक्ष एव, अत एवेदमपि निरस्तम्—

किं निरस्तमिति शङ्कायां निरसनीयमुपन्यस्यति एकमेवेति, स्वप्नदृष्टशरीराणां निर्जीवत्वे कथमेकस्य सजीवत्वमितरेषां निर्जीवत्वं चेति शङ्कायामेकस्य सजीवत्वमितरेषां निर्जीवत्वं चाह तत्रेत्यादिना ग्रन्थद्वयेन तेषां मिथ्यात्वं कथमित्यत्राह अनेनैकेनैवेति, इतिः समाप्तौ, एतत्कथं निरस्तं भवतीति शङ्कायामत एवेत्यभिप्रेतमर्थं विवृणोति ब्रह्मणेति, जीवभावो जीवत्वं किं प्रातिभासिकजीवैकत्वमुच्यते? उत पारमार्थिकजीवैकत्वं? प्रातिभासिकजीवैकत्वं चेत्स्वप्नजागरयोर्जीवबहुत्वप्रतिभासाद् दृष्टान्तदार्ष्टान्तिकयोर्जीवबहुत्वप्रतिभासः सार्वलौकिको विरुध्येत, पारमार्थिकजीवैकत्वं चेदेकोऽपि जीवो न पारमार्थिकतयाऽभ्युपगत इति तत्सुतरामनुपपन्नमित्यभिप्रायः । ब्रह्मणा कल्पितत्वादित्यन्वयः । स्वस्वरूपव्यतिरिक्तस्येति हेतुगर्भविशेषणं न कश्चिद्विशेष इति ।

एकमेव शरीरं जीववत् निर्जीवानीतराणि शरीराणि स्वप्नदृष्टनानाविधशरीराणां यथा निर्जीवत्वं तत्र स्वप्ने द्रष्टुः शरीरमेकमेव जीववत् तस्य स्वप्नवेलायां दृश्यभूतनानाविधानन्तशरीराणां निर्जीवत्वमेव अनेनैकेनैव परिकल्पितत्वाज् जीवा मिथ्याभूता इति ब्रह्मणा स्वस्वरूपव्यतिरिक्तस्य जीवभावस्य सर्वशरीराणां च कल्पितत्वादेकस्मिन्नपि शरीरे शरीरवज्जीवसद्भावस्य च मिथ्यारूपत्वात् सर्वाणि शरीराणि मिथ्यारूपाणि, तत्र जीवभावश्च मिथ्यारूप इत्येकस्य शरीरस्य तत्र जीवसद्भावस्य च न कश्चिद्विशेषः । अस्माकं तु स्वप्ने द्रष्टुः स्वशरीरस्य तस्मिन्ना-

आदिमत्त्वं नित्यवैलक्षण्यं न तु सद्वैलक्षण्यं प्रतिपन्नोपाधावबाध्यत्वं हि सत्यत्वं तदेव हि सत्त्वं त्वन्मते प्रतिपन्नोपाधौ बाधात् सद्व्यावृत्तिरित्युक्तेः तत्र सत्त्वपक्षे किं काल्पनिकं सत्? उताकल्पनिकं सदिति? विकल्पमभिप्रेत्याकाल्पनिकसत्त्वे च ब्रह्मव्यतिरिक्तत्वपक्षे अद्वैतहानिप्रसङ्गः । अव्यतिरिक्तत्वपक्षे दूषणं वक्ष्यते । काल्पनिकसत्त्वे दूषणमाह ब्रह्मव्यतिरेकेणेति, व्यावहारिकसद्धि अनिर्वचनीयं तस्मादविद्या न निवृत्ता स्यात् । असत्त्वपक्षेऽपि दूषणमिदमेव । निवृत्तिरसती चेत् द्वौ नञौ प्रकृतमर्थं सूचयत इति

ब्रह्मव्यतिरेकेणैतदभ्युपगमे पुनरविद्या न निवृत्ता स्यात् । ब्रह्मैव चेन्निवृत्तिः तत्प्रागप्यविशिष्टमिति वेदान्तज्ञानात् पूर्व्वमेव निवृत्तिः स्यात्, ऐक्यज्ञानं निवर्तकं तदभावात् संसार इति भवद्दर्शनं विहन्यते ।

न्यायादविद्या ह्यनिवृत्ता स्यात् । द्विरूपत्वपक्षेऽपि सदंशेनाद्वैतहानिः, असदंशेन निवृत्तेरसत्त्वादविद्या स्थितिरेवेत्यर्थः । सदंशेऽपि काल्पनिकत्वाकाल्पनिकत्वविकल्पः पूर्व्ववत्, अकाल्पनिकसत्त्वे च ब्रह्मस्वरूपानतिरिक्तत्वपक्षमाशङ्क्य दूषयति ब्रह्मैवेति, तत्त्वज्ञानात्पूर्व्वमेव निवृत्तिरस्तु ततः किमित्यत्राह ऐक्यज्ञानमिति, ननु यथा भावान्तराभाववादपक्षे भूतलमेव घटाभावोऽभ्युपपगतः तथा स्वरूपमेवाविद्याविनिवृत्तिः स्यादिति चेत् न भूतले वैलक्षण्यमस्त्येव कालविशेषविशिष्टदेशविशेषत्वं तत् तदेव घटाभावः, तच्चाभाववादिनाभ्युपगतम् । एकस्मिन्देशे कालभेदेन घटभावाभावसम्भवात्, एकस्मिन्काले देशभेदेन घटभावाभावसम्भवाच्च । अनेनाभाववादिभिरुक्तो विकल्पः परिहृतः । केवलभूतलमेवाभाव इति वाक्ये केवल–शब्दार्थः किं भूतलातिरिक्तः तर्ह्यभावाङ्गीकारः, भूतलमेव चेत्सघटेऽप्यभावप्रसङ्ग इति हि तैर्विकल्प्य दूषणमुक्तं तत् परिहृतमनेन वैलक्षण्येन । एवं वैलक्षण्यानभ्युपगमाद् ब्रह्मस्वरूपमेव निवृत्तिर्भवितुं नार्हति स्वरूपमेवाविद्यानिवृत्तिश्चेदविद्याऽनुदय एव स्यात् ।

किं च निवर्तकज्ञानस्याप्यविद्यारूपत्वात्तन्निवर्तनं केनेति वक्तव्यं, निवर्तकज्ञानं स्वेतरसमस्तभेदं निवर्त्य क्षणिकत्वादेव स्वयमेव विनश्यति दावानल–विष-नाशनविषान्तरवदिति चेन्न निवर्तकज्ञानस्य ब्रह्मव्यतिरिक्तत्वेन तत्स्वरूपतदुत्पत्तिविनाशानां मिथ्यारूपत्वात् तद्विनाशरूपाऽविद्या तिष्ठत्येवेति–

निवृत्तौ सत्यां निवर्त्त्यस्थित्यनुपपत्तेर्ब्रह्मस्वरूपमेव निवृत्तिश्चेत्यज्ञमकोटित्वं च न स्यात् स्वरूपस्य सत्त्वात् । एवं निवृत्तिदूषणेनैव निवर्तकेऽपि दूषिते सति मुखान्तरेणापि दूषणमस्तीत्यभिप्रायेणाह किञ्चेति, किं–शब्दः क्षेपार्थः । तदभ्युपगमप्रकारं शङ्कते निवर्त्तकेति, दूषयति नेति, वस्तुत उत्पन्नस्यैव हि वस्तुतो विनाशः उत्पत्त्यादेः काल्पनिकत्वेन विनाशोऽपि काल्पनिक इति तद्विनाश–तद्विषयभ्रम -भ्रान्तभ्रमहेतुरू*पाऽविद्यादौ स्थिते* सति तन्निवर्तकं वक्तव्यमित्यर्थः । स्वरूपतदुत्पत्तीत्यत्र स्वरूपशब्दः स्थितिवाची । तद्विनाशरूपेति, विनाशानुबन्धिनां भ्रमतदाश्रयतद्धेतूनामपि विनाशशब्देन विवक्षा तद्विनाशदर्शनस्येत्यत्रापि तदाश्रयतत्कल्पकाऽविद्या–तत्कल्पनीयानां च प्रदर्शनं कृतम् । मुखान्तरेण दूषयति दावाग्न्यादीनामपीति, दावाग्न्यादीनां विनाशो नाम पूर्व्वावस्थाविरोध्यवस्थान्तरप्राप्तिर्न तु द्रव्याभावः । एवमविद्याया अवस्थान्तरप्राप्तौ सा न निवृत्ता स्यादित्यर्थः । ज्ञात्रनुपपत्तिं दर्शयति अपि चेति, निषेध्यतया–निवर्त्यतया । किमध्यासरूपो ज्ञाता उत ब्रह्मैव ज्ञात्रिति विकल्पोऽभिप्रेतः

तद्विनाशदर्शनस्य निवर्त्तकं मन्त†व्यमेव । दावाग्न्यादीनामपि पूर्व्वावस्थाविरोधिपरिणामपरम्पराऽवर्ज्जनीयैव ।

---

* भ्रान्तभ्रमरूपाऽविद्या स्थितेति पा॰ ।

† वक्तव्यमेवेति पा॰

अपि च चिन्मात्रब्रह्मव्यतिरिक्तकृत्स्ननिषेधविषयज्ञानस्य कोऽयं ज्ञाता अध्यासरूप इति चेन्न तस्य निषेध्यतया निवर्तकज्ञानकर्म्मत्वात् तत्कर्त्तृत्वानुपपत्तेः । ब्रह्मस्वरूपमेवेति चेन्न ब्रह्मणो निवर्त्तकज्ञानं प्रति ज्ञातृत्वम्–

ब्रह्मैवेति पक्षे ज्ञातृत्वधर्म्मे विकल्पः । ज्ञातृत्वं किं स्वरूपम् उताध्यस्तमिति, तस्यापि त्रिरूपतयेति, निवर्त्तकज्ञानस्य त्रिरूपत्वं ज्ञातृज्ञेयानुबन्धित्वकृतं निवर्तकज्ञानस्य त्रिरूपत्वाभावे दूषणमाह सर्वस्येति, ज्ञानस्य–प्रमाणजन्यज्ञानस्य, न तु स्वरूपभूतज्ञानस्येत्यर्थः । कथं ज्ञानत्वं हीयते इत्यपेक्षायामन्वयव्याप्तिं दर्शयति कस्यचिदिति, सिद्धिरूपत्वात्प्रकाशरूपत्वात् । दूषणान्तरमाह । यद्वा व्यतिरेकव्याप्तिं दर्शयति त्रिरूपत्वविरह इति, ज्ञातृत्वमध्यस्तमिति पक्षो दूषितः । अथ स्वरूपमिति पक्षाङ्गीकारेऽपसिद्धान्तप्रसङ्ग इत्याह ब्रह्मेति, निवर्त्तकज्ञानस्य निवर्त्तकान्तरापेक्षत्वे हि अनवस्था । न चान्यापेक्षा स्वयं च ज्ञातृत्वं विषयश्च सर्वं स्वनिवर्त्यमिति चेत्तत्राह निवर्तकेति, ज्ञातृत्वादिकं सर्वं स्वयं च स्वनिवर्त्त्यान्तर्गतमिति वचनमङ्गुल्यग्रादिवाक्यवदयोग्यार्थत्वान्न प्रमितिजनकमिति भावः ॥

किं स्वरूपम्? उताध्यस्तम्,? अध्यस्तं चेत् अयमध्यासस्तन्मूलाविद्यान्तरं च निवर्तकज्ञानाविषयतया तिष्ठत्येव तन्निवर्तकान्तराभ्युपगमे तस्यापि त्रिरूपत्वादनवस्थैव, सर्वस्य हि ज्ञानस्य त्रिरूपकत्वविरहे ज्ञानत्वमेव हीयते, कस्यचित्कंचनार्थविशेषं प्रति सिद्धिरूपत्वात्, ज्ञानस्य त्रिरूपत्वविरहे

अथ सामग्र्यनुपपत्तिमाह अपि चेति, केन ज्ञातं–न केनापीति भावः । श्रुतेस्सामग्रीत्वमाशङ्क्य दूषयति श्रुत्यैवेति, अविद्याकल्पितवाक्यजन्यं

ज्ञानं न भ्रमनिवर्तकमित्यर्थः । निवर्त्त्यं दुष्टकारणजन्यत्वाद् दुष्टकारणजन्येनापि ज्ञानेन बाध्यत इति चेत्तत्राह तथा हीति, तदेव विवृणोति रज्जुसर्पेति, बाधकस्य दुष्टकारणजन्यत्वे ज्ञाते सति हि तदनिवर्त्तकम् । अत्र तु न दुष्टकारणजन्यत्वं ज्ञातमिति चेत्तत्राह प्रयोजकेति, प्रयोजकज्ञानवतः–ब्रह्मव्यतिरिक्तं कृत्स्नं मिथ्येति मिथ्यात्वे प्रयोजकं ब्रह्मव्यतिरिक्तत्वमिति ज्ञानवत इत्यर्थः । निदिध्यासनेन निरस्तसमस्तभेदवासनस्य निवर्तकज्ञानोत्पत्तिरित्यभ्युपगमात् श्रवणवेलायामेव श्रुतेर्भ्रान्तिमूलत्वज्ञानाच्च न सा बाधकज्ञानहेतुरित्यर्थः ।

भवतां स्वरूपभूतज्ञानवन्निवर्तकज्ञानमप्यनिवर्तकं स्यात्, ब्रह्मस्वरूपस्यैव ज्ञातृत्वाभ्युपगमे अस्मदीय एव पक्षः परिगृहीतः स्यात् । निवर्तकज्ञानस्वरूपज्ञातृत्वं च स्वनिवर्त्यान्तर्गतमिति वचनं भूतलव्यतिरिक्तं कृत्स्नं छिन्नं देवदत्तेनेत्यस्यामेव छेदनक्रियायामस्याश्छेदनक्रियायाश्छेत्तृत्वस्य च छेद्यान्तर्भाववचनवदुपहास्यम् ।

अपि च निखिलभेदनिवर्तकमिदमैक्यज्ञानं केन जातमिति विवेचनीयं, श्रुत्यैवेति चेन्न तस्या ब्रह्मव्यतिरिक्ताया अविद्यापरिकल्पितत्वात् प्रपञ्चबाधकज्ञानस्योत्पादकत्वं न सम्भवति, तथा हि दुष्टकारणजन्यमपि रज्जुसर्पज्ञानं न दुष्टकारणजन्येन रज्जुरियं न सर्प्प इति ज्ञानेन बाध्यते, रज्जुसर्प्पज्ञानभये वर्तमाने केनचिद् भ्रान्तेन पुरुषेण रज्जुरियन्न सर्प्प इत्युक्ते ऽप्ययं भ्रान्त इति ज्ञाते सति तद्वचनं रज्जुसर्प्प-

ज्ञानस्य बाधकं न भवति भयं च न निवर्तते, प्रयोजकज्ञानवतः श्रवणवेलायामेव हि ब्रह्मव्यतिरिक्तत्वेन

भ्रान्तिमूलत्वं ज्ञातमिति बाधकज्ञानोत्पादकत्वं न सम्भवतीति पूर्व्वेणान्वयः । सामग्रीदूषणप्रसङ्गात् ज्ञानज्ञातृत्वमिथ्यात्वेऽप्यनुगतदूषणमाह निवर्तकेति, न हि विरुद्धद्वयस्य मिथ्यात्वं सम्भवति, अपि त्वन्यतरस्यैव मिथ्यात्वं, तच्चाभ्युपगतं परेण सर्वशून्यवादिनोक्तस्याधिष्ठानमिथ्यात्वस्य बाधितत्वेऽधिष्ठानं सत्यं भवति, न ह्यधिष्ठानभूतासंवित्तिर्मिथ्यात्वम् उभयं च मिथ्या संभवतीति। तस्माद्ब्रह्मव्यतिरिक्तत्वोपाधिनिवृत्तेरप्यविशिष्ट इति निवृत्तिर्मिथ्या भवतीति तन्निवृत्तेर्निवर्त्यस्य चोभयस्य मिथ्यात्वं मातृत्ववन्ध्यात्वयोरिवानुपपन्नमित्यर्थः ।

श्रुतेरपि भ्रान्तिमूलत्वं ज्ञातमिति । किञ्च निवर्तकज्ञानस्य ज्ञातुस्तत्सामग्रीभूतशास्त्रस्य च ब्रह्मव्यतिरिक्ततया यदि बाध्यत्वमुच्यते हन्त तर्हि प्रपञ्चनिवृत्तेर्मिथ्यात्वमापततीति प्रपञ्चस्य सत्यता स्यात् स्वप्नदृष्टपुरुषवाक्यावगतपित्रादिमरणस्य मिथ्यात्वेन पित्रादिसत्यतावत् । किं च तत्त्वमस्यादिवाक्यं न प्रपञ्चस्य बाधकं भ्रान्तिमूलत्वाद् भ्रान्तप्रयुक्तरज्जुसर्पबाधकवाक्यवत् ।

ननु च स्वप्ने कस्मिँश्चिद्भये वर्तमाने स्वप्नदशायामेवायं स्वप्न इति ज्ञाते सति पूर्व्वभयनिवृत्तिर्दृष्टा तद्वदत्रापि सम्भवतीति । नैवं स्वप्नवेलायामेव सोऽपि स्वप्न इति ज्ञाते सति पुनर्भयानिवृत्तिरेव दृष्टेति न कश्चिद्विशेषः । श्रवणवेलायामेव सोऽपि स्वप्न इति

तत्र दृष्टान्तमाह स्वप्नेति, निवृत्तेर्मिथ्यात्वे निवर्त्त्यस्थितिरेव न तु निवर्त्त्यसत्यत्वमिति चेत् न निवर्त्यस्थितेर्यावत्कालं बाधानुदयात्सत्यत्वसिद्धेः अबाधिततया हि स्थितिः सत्यत्वं, तत्त्वमस्यादीति, अयमनिष्टप्रसङ्गो न त्वनुमानं व्याप्तिप्रदर्शनार्थं प्रतिज्ञाहेतुरूपेणोक्तम् । भ्रान्तिमूलस्य ज्ञानस्यापि निवर्तकत्वे दृष्टान्तमुखेन चोदयति ननु चेति, परिहरति नैवमिति, सोऽपि स्वप्न इति ज्ञाते सतीति, प्रथमस्वप्नबाधके द्वितीयस्वप्नेऽपि स्वप्न इति ज्ञाते भयानिवृत्तिदर्शनादित्यर्थः । द्वितीयस्वप्नस्य स्वप्नत्वं न स्वप्नेन ज्ञातमिति चेत् तर्हि तस्य प्रथमस्वप्नभयनिवर्तकत्वं दुष्टमूलत्वाज्ञानकृतं स्यात् एतत्परिहाराय द्वितीयस्वप्नज्ञानस्य स्वप्नता ज्ञायत इति चेत्तदा तस्य भयानिवर्तकत्वमपि दृष्टमित्यभिप्रायः । न कश्चिद्विशेष इति-बाध्यबाधकयोर्न कश्चिद्विशेष इत्यर्थः । प्रस्तुतार्थे स्वप्नत्वं किमवगतमित्यत्राह अवगतेति, स्वप्नशब्दो गौणवृत्त्या मिथ्यात्वपरः मिथ्यारूपस्यापि शास्त्रस्य निर्विशेषवस्तुबोधकत्वं पश्चात्तनबाधादर्शनेन सम्भवतीति शङ्कते यदपीति, परिहरति तदयुक्तमिति, पुनः शङ्कते इदमिति, दूषयति, सदिति, वेदस्त्वपौरुषेयस्तद्वाक्यं पौरुषेयमिति

ज्ञातमेवेत्युक्तम् । यदपि चेदमुक्तं भ्रान्तिपरिकल्पितत्वेन मिथ्यारूपमपि शास्त्रं सदद्वितीयं ब्रह्मेति बोधयति तस्य सतो ब्रह्मणो विषयस्य पश्चात्तनबाधादर्शनाद् ब्रह्म सुस्थितमेवेति । तदयुक्तं शून्यमेव तत्त्वमिति वाक्येन तस्यापि बाधितत्वात् । इदं भ्रान्तिमूलवाक्यमिति चेत्सदद्वितीयं ब्रह्मेति

चेत् ततः किं पौरुषेयत्वापौरुषेयत्ववैषम्यस्यापि भ्रान्तिसिद्धत्वेन द्वयोस्तुल्यत्वात् । किञ्च तद्वाक्यस्य पौरुषेयत्वं वदता भ्रान्तिमूलत्वादिति हेतोः किं दूषणमुक्तं स्यात् । हेतोस्सोपाधिकत्वमिति चेत् न वाक्याप्रामाण्ये पौरुषेयत्वस्योपाधित्वाभावात् आप्तवाक्ये व्यभिचरितस्य हि न

साध्यसमव्याप्तिः स्वाभिमतार्थसिद्धिः प्रमाणमिथ्यात्ववादिनो नास्तीत्याह सर्वेति, अभियुक्तैरिति–भट्टा*चार्यैरित्यर्थः । यथा सर्वदा सदुपायानां वादमार्गः प्रवर्तत इति पूर्वार्द्धम् । अधिकारोऽनुपायत्वान्न वादे शून्यवादिन इत्यत्र सर्वशून्यवादिन इत्युक्तेऽपि ब्रह्मव्यतिरिक्तवस्तुमिथ्यात्ववादिनोऽपि ग्रहणं तुल्यन्यायत्वात् । न्यायश्च स्वपक्षसाधनप्रमाणपारमार्थ्यानभ्युपगमः, अनेन सदुपायानामिति पदं व्याख्यातं, सदुपायानां–परमार्थभूतप्रमाणादीनामित्यर्थः । शून्यवादिनं प्रति अनुपायत्वाद्वादानधिकार इत्युक्ते वादः प्रवृत्त एवेति व्याहतमिदं वादानधिकारवचनमिति चेन्न ग्रन्थाभिप्रायाज्ञानकृतमिदं चोद्यं, वादो नाम स्वाभिमतार्थसाधकत्वमनुपायस्य स्वाभिमतार्थसिद्धिर्नास्ति साधकाभावात् अतो निष्प्रयोजनत्वमुक्तं, न त्वनुपायस्य वादानधिकार इति–

वाक्यमपि भ्रान्तिमूलमिति त्वयैवोक्तम् । पश्चात्तनबाधादर्शनं तु सर्वशून्यवाक्यस्यैवेति विशेषः । सर्वशून्यवादिनो ब्रह्मव्यतिरिक्तवस्तुमिथ्यात्ववादिनश्च स्वपक्षसाधनप्रमाणपारमार्थ्यानभ्युपगमेन अभियुक्तैर्वादानधिकार एव प्रतिपादितः । सर्वदा सदुपायानां वादमार्गः प्रवर्त्तते । अधिकारोऽनुपायत्वान्न वादे शून्यवादिन ॥ इति,

वाक्यप्रयोगस्याप्ययोग्यत्वम् । यद्वा अनेन ग्रन्थेन शून्यवादिनो व्याहतिरापाद्यते कथाप्रवृत्तेन त्वया कथाप्रवृत्तिविरुद्धमङ्गीकृतमिति तस्माच्चात्र चोद्यम् । शास्त्रप्रत्यक्षयोर्बाधकत्वबाध्यत्वे निरस्यति अपि चेत्यादिना, प्रत्यक्षेत्यादि स्पष्टं, काचतिमिरादेर्दोषत्वं कैश्चिदुक्तमिति तस्य सर्वभेदानुगतत्वाभावात् अयुक्तमित्यभिप्रायेणानन्तभेदविषयमित्युक्तं काचतिमिराद्यभावेऽपि क्वचिद्दर्शनादन्यत्र कल्प्यते चेत् वाक्यत्वाद्वेदस्य पौरुषेयत्वादिकं कल्प्यतामित्यभिप्रायः । उपालम्भसूचको हन्त–शब्दः,

* पराशरभट्टाचार्याः श्रीसंप्रदाये सुप्रसिद्धाचार्यास्तैरिति ।

एवं बाध्यबाधकयोस्तुल्यदोषत्वेन प्राबल्यदौर्बल्याभाव उक्तः, प्राबल्यं दौर्बल्यं चास्तां, तथाऽपि विरोधाभावान्न बाध्यबाधकभावसिद्धिरिति वक्तुं शास्त्रप्रत्यक्षयोर्विषयभेदमाह आकाशेति, तदुपासनादीत्यादि-शब्देन यागदानादयो विवक्षिताः, तत्प्राप्तिर्मोक्षः तदादिकफलविशेषस्त्रिवर्गः, तदनिष्टकरणं पापम् । एवं तुल्यदोषत्वं विरोधाभावश्चोक्तः । पूर्वमेव स्वमूलोच्छेदित्वं चोक्तं, वक्ष्यते चानादीति, प्रमाणान्तरेण सदोषत्वानवगतिश्चार्थसिद्धेति ज्वालाभेदानुमानवैषम्यचतुष्टयमनुसन्धेयम् ॥

अपि च प्रत्यक्षदृष्टप्रपञ्चस्य मिथ्यात्वं केन प्रमाणेन साध्यते । प्रत्यक्षस्य दोषमूलत्वेनान्यथासिद्धिसम्भवान्निर्दोषं शास्त्रमनन्यथासिद्धं प्रत्यक्षस्य बाधकमिति चेत् । केन दोषेण जातं प्रत्यक्षमनन्तभेदविषयमिति वक्तव्यम्, अनादिभेदवासनाख्यदोषजातं प्रत्यक्षमिति चेत् । हन्त तर्ह्यनेनैव दोषेण जातं शास्त्रमपीत्येकदोषमूलत्वात् प्रत्यक्षशास्त्रयोर्न बाध्यबाधकभावसिद्धिः । आकाशवाय्वादिभूत-तदारब्धशब्दस्पर्शादियुक्तमनुष्यत्वादिसंस्थानसंस्थितपदार्थग्राहिप्रत्यक्षं, शास्त्रं तु प्रत्यक्षाद्यपरिच्छेद्यसर्वान्तरात्मत्वसत्यत्वाद्यनन्तविशेषणविशिष्टब्रह्मस्वरूप-तदुपासनाद्याराधनप्रकार-तत्प्राप्तिपूर्व्वक-तत्प्रसादलभ्य-फलविशेष-तदनिष्टकरणमूलनिग्रहविशेषविषयमिति शास्त्रप्रत्यक्षयोर्न विरोधः । अनादिनिधनाविच्छिन्नपाठसम्प्रदाय-

अत्र मूलोच्छेदित्वप्रसङ्गाय प्रत्यक्षपारमार्थ्यं वक्तव्यमित्याह अनादीति, शब्दस्वरूपग्रहणव्युत्पत्तितात्पर्यलिङ्गग्रहणादेरपौरुषेयत्वानुमानलिङ्गस्य च प्रत्यक्षमूलत्वात् तत्पारमार्थ्यमवश्यमभ्युपेतव्यम् अन्यथा धर्म्मिस्वरूप-

तद्बलीयस्त्वहेतुभूतगुणासिद्धिरित्यर्थः । इति-शब्देनान्येषामपि कुतर्कजालानां दूषणमुक्तप्रयोजकान्तर्भूतमित्यभिप्रेतं, श्रुतिशतेति, शत-शब्दः शाखाभेदपरः, विततिशब्दः प्रतिशाखं वाक्यपरम्परापरः, वातवेगशब्देन प्राबल्यमभिप्रेतं, तूलशब्देन परमतस्य दौर्बल्यमभिप्रेतं, न हि वचनविरुद्धस्तर्कः प्रबलः स्पष्टम् । एवं ब्रह्माज्ञानपक्षः प्रतिक्षिप्तः ॥

अथ द्वितीयश्लोकोक्तक्रमेण भास्करमतं निराकरोति द्वितीये त्वित्यादिना, मिथ्यात्वप्रयुक्तानुपपत्त्यप्रसङ्गेऽपि जीवब्रह्मस्वरूपैक्यनिबन्धनदोषा भवन्त्येवेति तु-शब्दाभिप्रायः । ब्रह्मण्येवोपाधिसंसर्गस्य हेतुरुपाधिब्रह्मतादृशनेकगुणविशिष्टस्य शास्त्रस्य बलीयस्त्वं वदता प्रत्यक्षपारमार्थ्यमवश्यमभ्युपगन्तव्यमित्यलमनेन श्रुतिशतविततिवातवेगपराहतकुदृष्टिदुष्टयुक्तिजालतूलनिरसनेनेत्युपरम्यते ॥

द्वितीये तु पक्षे उपाधिब्रह्मव्यतिरिक्तवस्त्वन्तरानभ्युपगमाद्ब्रह्मण्येवोपाधिसंसर्गादौपाधिकाः सर्वे दोषा ब्रह्मण्येव भवेयुः । ततश्चापहतपाप्मत्वादिनिर्दोषत्वश्रुतयः सर्वा विहन्यन्ते । यथा घटाकाशादेः परिच्छिन्नतया महाकाशाद्वैलक्षण्यं परस्परभेदश्च दृश्यते तत्रस्था गुणा वा दोषा वाऽनवच्छिन्ने महाकाशे न सम्बध्यन्ते,

व्यतिरिक्तवस्त्वन्तरानभ्युपगमः । व्यतिरिक्तशब्द ईश्वरत्वाकाराज्जीवत्वाकारविशेषणभेदानुवादपरः । वस्त्वन्तरशब्दो धर्म्यन्तरवाची आकारभेदाभ्युपगमेऽपि धर्म्यैकत्वाभ्युपमाद्ब्रह्मण्येवोपाधिरिति तत्कृतदोषास्तत्रैव स्युरित्यर्थः । किमित्यत्राह ततश्चेति, निर्दोषत्वश्रुतिबाधं परिहरंश्चोदयति यथेति, तत्रस्था दोषा वा गुणा वेति, अल्पत्वमभिमतविनियोगवि-

शेषानर्हत्वं च घटाकाशस्य दोषः । अभिमतविनियोगविशेषार्हत्वं महत्त्वं च गुणः, तदुभयं महाकाशे न प्रसजेत् घटकरकाद्यवच्छिन्नाकारः परस्परभेदश्च दृश्यते, न हि घटावच्छिन्नाकाशकार्यं करकावच्छिन्नाकाशे संभवति । एवमुपाधिभेदकृतपरस्परभेदेन गुणदोषव्यवस्थान्विता जीवास्तद्गतगुणदोषाश्च न परब्रह्मणि सम्बध्यन्त इति निर्दोषत्वश्रुतीनां सावकाशत्वात् न तत्र बाधप्रसङ्ग इत्यर्थः । परिहरति नैतदिति, उरगतताङ्गुलिवद् ब्रह्मखण्डनार्हं चेत् ब्रह्मणि जीवगतगुणदोषास्पर्श उपपद्यते

एवमुपाधिकृतभेदव्यवस्थितजीवगता दोषा अनुपहिते परे ब्रह्मणि न सम्बध्यन्त इति चेत् । नैतदुपपद्यते निरवयवस्याकाशस्यानवच्छेद्यस्य घटादिभिश्छेदासम्भवात्तेनैव आकाशेन घटादयः संयुक्ता इति ब्रह्मणोऽप्यच्छेद्यत्वाद्ब्रह्मैवोपाधिसंयुक्तं स्यात्, घटसंयुक्ताकाशप्रदेशोऽन्यस्मादाकाशप्रदेशाद् भिद्यत इति चेत् आकाशस्यैकस्यैव प्रदेशभेदेन घटादिसंयोगाद् घटादौ गच्छति तस्य च प्रदेशस्यानियम इति तद्वद्ब्रह्मण्येव प्रदेशभेदानियमेनोपाधिसंसर्गादुपाधौ

ब्रह्मणोऽनिरवयवत्त्वेनाच्छेद्यत्वाद्ब्रह्मण्येवोपाधिसंसर्गः स्यादिति—निर्दोषत्वश्रुतिबाध एवेत्यर्थः । प्रदेशभेदेन व्यवस्थां शङ्कते घटसंयुक्तेति, त्वदुक्तदृष्टान्तेनैवानियम इत्याह आकाशस्येति, एकस्यैवेति, आकाशव्यक्तयोऽनन्ताः सन्ति चेत् उपाधीनां गमनेऽप्याकाशव्यक्त्यन्तरासम्बन्धेन गुणदोषव्यवस्था स्यात् । न च तथाऽऽकाशव्यक्तिभेदोऽस्तीति भावः । प्रदेशभेदेनेत्यादि, एको घट एकत्रैव तिष्ठति चेत् प्रदेशभेदेन व्यवस्था स्यात् । न च तथाऽस्तीति भावः इति दृष्टान्ते ऽनियमो दर्शितः । तं

दार्ष्टान्तिके निर्दिशति तद्वदिति, ब्रह्मण्येव प्रदेशभेदानियमेनोपाधिसंसर्गादुपाधौ गच्छति संयुक्तवियुक्तब्रह्मप्रदेशभेदाच्चेति हेतुद्वयस्य साध्यद्वयं क्रमादुच्यते ब्रह्मण्येवोपाधिसंसर्गः क्षणे क्षणे बन्धो मोक्षश्च भवतीति निरवयवत्वेनाच्छेद्यत्वात् व्यक्तिबहुत्वाभावादुपाधीनामेकत्रैव स्थित्यभावाच्च व्यवस्थाऽनुपपत्तिरित्यर्थः । पुनर्दृष्टान्तविशेषमुखेन व्यवस्थां शङ्कते निरवयवस्येति, यथा निरवयवस्याकाशस्यैव श्रोत्रेन्द्रियत्वेऽपि श्रोत्रेन्द्रियाणां परस्परव्यवस्था इन्द्रियानिन्द्रियव्यवस्था चोपपद्यते तथा जीवानामन्योन्यव्यवस्था जीवब्रह्मव्यवस्था चोपपन्नेत्यर्थः ।

गच्छति संयुक्तवियुक्तब्रह्मप्रदेशभेदाच्च ब्रह्मण्येवोपाधिसंसर्गः, क्षणे क्षणे बन्धमोक्षौ च स्यातामिति सन्तः परिहसन्ति । निरवयवस्यैवाकाशस्य श्रोत्रेन्द्रियत्वेऽपि इन्द्रियव्यवस्थावद् ब्रह्मण्यपि व्यवस्थोपपद्यत इति चेन्न वायुविशेषसंस्कृतकर्णप्रदेशसंयुक्तस्यैवाकाशप्रदेशस्येन्द्रियत्वात्तस्य च प्रदेशान्तराद्भेदानियमेऽपि इन्द्रियव्यवस्थोपपद्यते, आकाशस्य तु सर्वेषां शरीरेषु गच्छत्सु अनियमेन सर्वप्रदेशसंयोग इति

तत्राप्यनियमापादनेन दूषयति नेति, दार्ष्टान्तिकं दूषयितुं दृष्टान्तव्यवस्थाप्रकारं दर्शयति वाय्विति, उच्चारणप्रयत्नजनितवायुविशेषसंयोगसंस्कृतकर्णशष्कुलीसंयुक्तस्यैवाकाशस्यैव शब्दोपलम्भहेतुत्वमेव श्रोत्रेन्द्रियमिति प्रदेशभेदानियमेऽप्युपलम्भकार्यकरत्वोपपत्तेरुपलम्भहेतोः प्रदेशस्येन्द्रियत्वात्तदहेतोरनिन्द्रियत्वाच्चेन्द्रियानिन्द्रियव्यवस्थोपपत्तिः प्रदेशभेदेनाप्येकं पुरुषं प्रति वायुविशेषसंस्कृतकर्णसंयुक्तस्य प्रदेशविशेषस्य शब्दोपलम्भकार्यकरत्वात्तं प्रति वायुविशेषसंस्कृतकर्णसंयुक्तस्यापि नभःप्रदेशान्तरस्याकार्यकरत्वेनेन्द्रियाणां परस्परव्यवस्थासिद्धिश्च । एवं प्रदेशभेदेनापि कदाचित्कार्यकरत्वादिन्द्रियव्यवस्थासिद्धिरित्यर्थः । दा-

ष्टान्तिकदूषणासिद्ध्यर्थमनियमेऽपीत्युक्तमर्थमुपपादयति आकाशस्य त्विति, आकाशप्रदेशव्यवस्थित्यभावरूपवैषम्यपरस्तु-शब्दः, आकाशस्य तु सर्वशरीराणां गमनात् तत्करणप्रदेशभेदेन संयोगो विद्यत इत्यनियम इत्यर्थः। ततः किमित्यत्राह इति ब्रह्मण्यपीति, इतिर्हेतौ । उपाधिसंयोगप्रदेशानियमः-उपाधिसंयोगस्य प्रदेशानियमः । एवं ब्रह्मण्यपि प्रदेशभेदानियमेनोपाधिसंयोग इत्यर्थः ।

ब्रह्मण्यप्युपाधिसंयोगप्रदेशानियम एव, आकाशस्य स्वरूपेणैव श्रोत्रेन्द्रियत्वमभ्युपगम्यापीन्द्रियव्यवस्थो-

आकाशप्रदेशानियमेऽपि कदाचित्कार्यकरत्वरूपं श्रोत्रेन्द्रियत्वमितीन्द्रियव्यवस्थोपपद्यते। एवं ब्रह्मण्यपि प्रदेशभेदानियमेनोपाधिसंयोगाज्जीवत्वमपि कादाचित्कं स्यात् तदजत्वनित्यत्वश्रुतिविरुद्धम् । अतो जीवब्रह्मव्यवस्था नोपपद्यते इत्यभिप्रायः । परस्परव्यवस्था चानुपपन्ना उपाधीनां गमनेन सर्वजीवगतसुखादिप्रतिसन्धानप्रसङ्गात् प्रदेशभेदादप्रतिसन्धाने चैकोपाधौ गच्छति सति प्रतिसन्धानाभावप्रसङ्गाच्चेत्यनुसन्धेयं नभस इन्द्रियत्वाभ्युपगमेनायं परिहार उक्तः । नेयमर्थस्थितिरित्याह आकाशस्येति, स्वरूपेणैवेति पदेन भूतैरिन्द्रियाणामाप्यायनव्यावृत्तिः, तदप्रामाणिकं, कथमर्थतत्त्वमित्यत्राह वैकारिकादिति, अत्र प्रमाणमाह यथोक्तमिति, वैकारिकादिपदव्याख्यानार्थं पौनरुक्त्यव्याघातशङ्कापरिहारार्थं च तं श्लोकं व्याचष्टे अयमर्थ इत्यादिना, सात्त्विको राजसश्चैव तामसश्च त्रिधा महान् । वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ॥ त्रिविधोऽयमहङ्कारो महत्तत्त्वादजायत इत्यादिप्रकरणपर्यालोचनया तदनुगुणं व्याख्यातम् । अहङ्कारकार्यप्रतिपादकश्लोके तामसाहङ्कारप्रस्तावः कथं तैजसानीन्द्रियाण्याहुर्देवा वैकारिकाः स्मृता इत्येतत्कथं घटत इत्यत्राह तत्रेति, तामसाहङ्कारकार्यस्य पूर्वमेवोक्तत्वात्

क्ता, परमार्थतस्त्वाकाशो न श्रोत्रेन्द्रियं वैकारिकादहङ्कारादेकादशेन्द्रियाणि जायन्त इति हि वैदिकाः,

यथोक्तं भगवता पराशरेण तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश । एकादशं मनश्चात्र देवा वैकारिकाः स्मृताः ॥ इति, अयमर्थः वैकारिकस्तैजसोभूतादिरिति त्रिविधोऽहङ्कारः स च क्रमात्साात्त्विकोराजसस्ताम-सश्च तत्र तामसाद्भूतादेराकाशादीनि भूतानि जायन्त इति सृष्टिक्रममुक्त्वा तैजसाद्राजसादहङ्कारादेकाद-शेन्द्रियाणि जायन्त इति—

तदत्रानुक्तम् । आहुरिति परमतोपन्यासः । वैकारिकाः स्मृता इति सि-द्धान्त इत्यर्थः । इन्द्रियवाचिपदं किमित्यत्राह देवा इति, न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैर्मनसा तु विशुद्धेन सहैव सन्तं न विजानन्ति देवा इत्यादिषु प्रयोगानुसारेण देव—शब्दः इन्द्रियवाचीत्यर्थः । क्वचिदिन्द्रियाणां भौतिकत्वमुच्यत इत्यत्राह एवमिति, वैकारिकादुत्पत्तिवाचिवचनादविरो-धायापातप्रतीतार्थपरित्यागेन तदाप्यायनमेवार्थ इति मन्तव्यमित्यर्थः । आ-पातप्रतीतार्थपरत्वाभ्युपगमेन दूषयति भौतिकत्वेऽपीति, पूर्वं भूतानामे-वेन्द्रियत्वाभ्युपगमेन परिहार उक्तः । अत्र भूतपरिणामत्वाभ्युपगमेनोच्यते इति भिदा । भूतपरिणामत्वाविशेषादनिन्द्रियत्वमपि स्यात् घटवदिति शङ्कापरिहारार्थं भूतविकारत्वादेवेत्युक्तम्, आकाशादिभूतपरिणामविशेषा आकाशादिभूतविकारत्वादेव शरीरवद्व्यवस्थिता एव पुरुषाणामिन्द्रि-याणि भवन्तीत्यन्वयः । न हि शरीरस्य भूतपरिणामविशेषत्वादशरीर-त्वम् । एवं भूतपरिणामत्वेनेन्द्रियाण्यपि व्यवस्थितानि भवन्तीति जीवस्य ब्रह्मपरिणामत्वाभावाद् व्यवस्थाऽनुपपन्नेत्यर्थः ।

परमतमुपन्यस्य सात्त्विकाहङ्काराद्वैकारिकाणी-न्द्रियाणि जायन्त इति स्वमतं* सूच्यते देवा वैकारि-

* स्वमतमुच्यते इति पा० ।

काः स्मृता इति, देवाः—इन्द्रियाणि एवमिन्द्रियाणामाहङ्कारिकाणां भूतैश्चाप्यायनं महाभारत उच्यते भौतिकत्वेऽपीन्द्रियाणामाकाशादिभूतविकारत्वादेवाकाशादिभूतपरिणामविशेषा व्यवस्थिता एव, शरीरवत्पुरुषाणामिन्द्रियाणि भवन्तीति ब्रह्मण्यच्छेद्ये निरवयवे निर्विकारे त्वनियमेनानन्तहेयोपाधिसंसर्गदोषो दुष्परिहर एवेति अश्रद्दधानानामेवायं पक्ष इति—

ब्रह्मपरिणामत्वेऽपि जीवस्याजत्वनित्यत्वश्रुतिबाधः अकृताभ्यागमकृतविप्रणाशप्रसङ्गश्च ब्रह्मणो निर्विकारत्वश्रुतिबाधप्रसङ्गश्चेत्यभिप्रायः। निरवयवत्वं निर्विकारत्वं चाच्छेद्यत्वे हेतुः। अश्रद्दधानानां—न्यायनिर्णयाक्षमाणाम् उपदेशमात्रतृप्तानामित्यर्थः। एवं जीवब्रह्मैक्याभ्युपगमे निर्दोषत्वश्रुतिबाध उक्तः। अचिद्रूपेण ब्रह्मणः परिणामाभ्युपगमे दूषणमाह स्वरूपेति, अविकारत्वश्रुतिर्निर्मलत्वश्रुतिश्रुतिश्च बाध्येते इत्यर्थः। न स्वरूपेण परिणामोऽपि तु शक्तिरेव परिणमते देवात्मशक्तिमित्यादिवचनादिति शङ्कते ब्रह्मण इति, दूषयति केयमिति, ब्रह्मणोऽनन्या कापीति, ब्रह्मस्वरूपमेवेत्यर्थः। विकल्पशिरस्त्वेनात्यन्तभेदो न शङ्कितस्तदनभ्युपगमात्। शिरोद्वयेऽपि दूषणमाह उभयेति, एवं भास्करमतमपाक्षिप्तम्॥

शास्त्रविदो न बहु मन्यन्ते। स्वरूपपरिणामाभ्युपगमादविकारत्वश्रुतिर्बाध्यते निरवद्यता च ब्रह्मणः शक्तिपरिणाम इति चेत् केयं शक्तिरुच्यते किं ब्रह्मपरिणामरूपा? उत ब्रह्मणोऽनन्या काऽपीति, उभयपक्षेऽपि स्वरूपपरिणामोऽवर्जनीय एव॥

तृतीयेऽपि पक्षे जीवब्रह्मणोर्भेदवदभेदस्य चाभ्युपगमात् तस्य च तद्भावात् सौभरिभेदवच्च स्वावतारभेदवच्च सर्वस्येश्वरभेदत्वात् ।

अथ यादवप्रकाशमतं निरस्यति तृतीयेऽपीत्यादिना, भास्कर–यादवप्रकाशाभ्यां स्वाभिमतार्थसाधकप्रमाणसिद्ध्यर्थं बन्धमोक्षादिव्यवस्थासिद्ध्यर्थं च प्रपञ्चस्य पारमार्थ्यमभ्युपेतं तत्र मुक्तावभेदश्रुतेर्भेदस्यौपाधिकत्वमभेदस्य स्वाभाविकत्वं च जीवब्रह्मणोरभ्युपेतम् । अचिद्ब्रह्मणोस्तु सर्वस्य ब्रह्मात्मकत्वश्रुतेर्निर्मलत्वादिश्रुतेरुपाध्यन्तराभ्युपगमेऽनवस्थानाच्च भेदाभेदौ स्वाभाविकावभ्युपगतौ भास्करमते ॥ यादवप्रकाशमते तु मुक्तावपि भेदनिर्देशश्रुतेर्जीवब्रह्मणोश्च भेदाभेदौ स्वाभाविकावभिमताविति भिदा । तत्र भास्करमतप्रतिक्षेपानन्तरं यादवप्रकाशमतं निरस्यते तृतीयेऽपीति, तस्य च तद्भावात्–ब्रह्मणो जीवभावात्, एकजीवभेदस्य सौभरिदृष्टान्तः, ईश्वरभेदस्य स्वावतारदृष्टान्तः, न हि सौभरिशरीरभेदात् जीवभेदः, न च नृसिंहवामनादीनामनीश्वरत्वं यथा त्वन्मते भेदश्रुतिमुख्यार्थापरित्यागेन स्वाभाविकभेदाभ्युपगमात् ब्रह्मणि जीवगतदोषाद्यस्पर्शः तथाऽस्माभिरपि स्वाभाविकोभेदोऽभ्युपगतः । न त्वाविद्यक औपाधिको वेत्यस्मत्पक्षेऽपि न कश्चिद्दोषः । अभेदश्रुतेरपि मुख्यार्थस्वीकारे यो दोषः त्वयाऽऽपाद्यते स त्वत्पक्षेऽपि तुल्यः अभेदश्रुतिमुख्यार्थस्य

सर्वे जीवगता दोषास्तस्यैव स्युः । एतदुक्तं भवति ईश्वरः स्वरूपेणैव सुरनरतिर्यक्स्थावरादिभेदेनावस्थित इति–

त्वत्पक्षेऽपि स्वीकृतत्वात् । तस्मादस्मान्प्रति अयं दोष आपादयितुं न युज्यते । किञ्च चिदचिदीश्वरा ब्रह्मांशभूताः ब्रह्म तु तदंशि तस्माद्यथा मृदंशभूतघटशरावादीनामन्योन्यगुणदोषासङ्करः । एवं ब्रह्मांशभूतयोर्जीवेश्वरयोरपि गुणदोषासङ्कर इति शङ्कायामाह एतदुक्तमिति,

ईश्वरः स्वरूपेणैवेत्यनेन ईश्वरस्य ब्रह्मांशत्वं निरस्तं भवति, जगत्कारणत्वं ब्रह्मलक्षणं कारणवाक्यानि च सदेव सोम्येदमग्र आसीत् ब्रह्म वा इदमेकमेवाग्र आसीत् आत्मा वा इदमेक एवाग्र आसीत्, एको ह वै नारायण आसीत् विष्णुस्तदासीद्धरिरेव निष्कलः, तमीश्वराणां परमं महेश्वरम् इत्यारभ्य स कारणं करणाधिपाधिप इत्यादीनि ऐककण्ठ्येनेश्वरस्य जगत्कारणत्वं वदन्ति । ईश्वरस्य च न तत्समश्चाभ्यधिकश्च दृश्यते इति समाभ्यधिकराहित्यं च श्रूयते । तच्चेश्वरस्य ब्रह्मांशत्वे तु न घटते, अंशादंशिनोऽधिकत्वेनेश्वरादप्यधिकस्य सम्भवात्, तस्मात् समाऽभ्यधिकराहित्यात् जगत्कारणत्वाच्चेश्वर एव ब्रह्मेतीश्वरस्य ब्रह्मांशत्वमनुपपन्नमित्यभिप्रायेण ईश्वरः स्वरूपेणेत्युक्तं, न हि त्वयाऽस्मन्मत इवात्मशरीरभावेन तादात्म्यं वर्ण्यते अपि त्वीश्वरः स्वरूपेणैव सुरनरादिरूपेण स्थित इति हि तादात्म्यं वर्ण्यते

हि तदात्मकत्ववर्णनं क्रियते, तथा सत्येकमृत्पिण्डारब्धघटशरावादिगतान्युदकाहरणादीनि सर्वकार्याणि यथा तस्यैव भवन्ति, एवं सर्वजीवगतसुखदुःखादिसर्वमीश्वरगतमेव स्यादिति घटशरावादिसंस्थानानुपयुक्तमृद्द्रव्यं यथा कार्यान्तरानन्वितम् एवमेव सुरपशुमनुजादिजीवत्वानुपयुक्तेश्वरः

तथा सति मृत्पिण्डारब्धघटादिगतोदकाहरणादिकार्य्याणि यथा मृत्पिण्डस्यैव भवन्ति, एवं सर्वजीवगतसर्वसुखदुःखभागीश्वरः स्यादित्यर्थः । पुनः परमतं शङ्कते घटशरावादीति, यद्यपि कार्यत्वेनोपयुक्तमृदंशस्पर्शि घटादिगतोदकाहरणादि भवति तथाऽपि कार्यत्वेनानुपयुक्तमृदंशान्तरस्पर्शि न भवति तथा जीवत्वानुपयुक्तेश्वरांशे जीवगतदोषा न प्रसजन्तीत्यर्थः । परिहरति सत्यमिति, तथाऽप्यंशिन एकत्वादीश्वरस्यैव दोषः प्रसजतीत्यर्थः । जीवेश्वरांशयोर्व्यवस्थितत्वाज्जीवगतदोषो नेश्वरस्पृगिति शङ्कते द्वावंशाविति, दूषयति क इति, ईश्वरस्य चेतनत्वेन

स्वांशजीवगतसर्वदुःखप्रतिसंधातृत्वादंशान्तरेण सुखित्वं नेश्वरत्वाय भवतीत्यर्थः । तत्र दृष्टान्तमाह यथेति, ऐहिकाल्पसुखस्य मोक्षसुखस्य च स्थाने चन्दनानुलेपः केयूराद्यलङ्कारश्च, ऐहिकाल्पदुःखनारकानन्तदुःखस्थाने मुद्गराभिहतिकालाग्निप्रवेशौ । भेदाभेदपक्षस्य पापीयस्त्वमुपपादयति

सर्वज्ञस्सत्यसङ्कल्पत्वादिकल्याणगुणाकर इति चेत् सत्यं, स एवेश्वर एकेनांशेन कल्याणगुणाकरः स एवान्येनांशेन हेयगुणाकर इत्युक्तं द्वयोरंशयोरीश्वरत्वाविशेषात् । द्वावंशौ व्यवस्थिताविति चेत् कस्तेन लाभः, एकस्यैवैकेनांशेन नित्यदुःखित्वादंशान्तरेण सुखित्वमपि नेश्वरत्वाय कल्पते, यथा देवदत्तस्यैकस्मिन् हस्ते चन्दनपङ्कानुलेपः केयूरकटकाङ्गुलीयालङ्कारस्तस्यैवान्यस्मिन् हस्ते मुद्गराभिघातः कालानलज्वालानुप्रवेशश्च तद्वदेवेश्वरस्य स्यादिति ब्रह्माज्ञानपक्षादपि पापीयानयं भेदाभेदपक्षः, अपरिमितदुःखस्य पारमार्थिकत्वात् ।

अपरिमितेति, औपाधिकभेदाभेदवादिनोऽपि तुल्यमिदं पापीयस्त्वं ततोऽप्याधिक्यबुद्ध्या पश्चात्तनत्वादत्रेदं दूषणमुक्तम् । अगत्या परेण विलक्षणत्वाभ्युपगमं शङ्कते तस्मादिति, । अभ्युपगमेन प्रतिपत्तिं दूषयति आगतोऽसीति, अपसिद्धान्तप्रसङ्ग इत्यर्थः । भवत्पक्षे त्वभेदश्रुतेरमुख्यार्थः स्यात् मुख्यार्थस्वीकारे उक्तदोषापातः स्यादिति शङ्कायां तत्परिहर्तुं स्वरूपेण तादात्म्यवर्णनेन तं दोषमनुमन्यते ईश्वरस्येति, । तर्हि कथं भवता तादात्म्यं वर्ण्यत इत्यत्राह आत्मेति, न केवलं दोषाभावो मङ्गलगुणसिद्धिरित्याह प्रत्युतेति, आदि-शब्देन धारकत्वशेषित्वाद्युच्यते तर्हि मुख्यत्वं स्यादित्यत्राह सामानाधिकरण्यं चेति, एवं श्रुतेर्जीवब्रह्मणोर्भेदाभेदपरत्वं दूषितम् ॥

संसारिणामनन्तत्वेन दुस्तरत्वाच्च, तस्माद्विलक्षणोऽयं जीवांश इति चेत्, आगतोऽसि तर्हि मदीयं पन्थानम्, ईश्वरस्य स्वरूपेण तादात्म्यवर्णने स्यादयं दोषः आत्मशरीरभावेन तु तादात्म्यप्रतिपादने न कश्चिद्दोषः । प्रत्युत निखिलचेत*ननियमनादिर्महानयं गुणगणः प्रतिपादितो भवति, सामानाधिकरण्यं च मुख्यवृत्तम् ।

अपि च एकस्य वस्तुनो हि भिन्नाभिन्नत्वं विरुद्धत्वान्न सम्भवतीत्युक्तं घटस्य पटाद्भिन्नत्वे सति तस्य तस्मिन्नभावः ।

इदानीं सामान्येन सर्वस्य वस्तुनो भिन्नाभिन्नत्वं निरस्यति अपि चेति, उक्तमिति–निर्विशेषवस्तुनिरासे प्रसङ्गादुक्तमित्यर्थः । तत्र विरुद्धत्वहेतोः सिद्धवत्कारेणासम्भव उक्तः । अत्र तु तदेव विरुद्धत्वं कथमिति शङ्कायां तदुपपाद्यते घटस्येति, घटस्य पटाद्भिन्नत्वं नाम तस्य तत्राभावः । अभिन्नत्वं नाम तत्र तस्य भाव इत्यर्थः । ततः किमित्यत्राह एकस्मिन्निति, आकारभेदादविरोधं शङ्कते जात्येति, जातिमभ्युपगच्छद्भिरभिमतभेदाभेददूषणेन ताममनभ्युगच्छद्भिरभिमतभेदाभेदोऽपि प्रतिक्षिप्तः स्यादित्यभिप्रायेण जात्यात्मनेत्याद्युच्यते । अत्र जातिव्यक्त्योः किमभिन्नत्वमुत भिन्नत्वमुत भिन्नाभिन्नत्वमिति विकल्पमभिप्रेत्याभिन्नत्वपक्षे दूषणमाह जातेरिति, जातिव्यक्त्योरभेदश्चेत् खण्डमुण्डव्यक्तिद्वयेन जातेरभेदात् खण्डस्य मुण्डत्वप्रसङ्ग इत्यर्थः । तत्र भिन्नत्वपक्षे व्यक्तिगतोभेदो जातिगतश्चाभेद इति नैकस्य द्व्यात्मकतेति दूषणस्य स्पष्टत्वात्तदनुक्तम् । भिन्ना-

* निखिलभुवननियमनादिरिति पा· ।

भिन्नत्वपक्षे दूषणमाह खण्डेन चेत्यादिना, जातेर्मुण्डस्य चाभेदात् खण्डस्य *मुण्डत्वप्रसङ्गः ।

अभिन्नत्वे सति तस्य च भाव इति एकस्मिन्काले चैकस्मिन्देशे चैकस्य हि पदार्थस्य युगपत्सद्भावोऽसद्भावश्च विरुद्धः । जात्यात्मना भावो व्यक्त्यात्मना चाभाव इति चेत्, जातेर्मुण्डेन व्यक्त्या चाभेदे सति खण्डे मुण्डस्यापि सद्भावप्रसङ्गः, खण्डेन च जातेरभिन्नत्वे सद्भावः, भिन्नत्वे असद्भावः, अश्वे महिषत्वस्येवेति विरोधो दुष्परिहर एव ।

जातेर्मुण्डस्य च भेदादश्वे †गजत्वाभाववत् खण्डस्य मुण्डत्वाभावप्रसङ्ग इति विरोधः । यद्वा जातिव्यक्त्योरभेदे खण्डस्य जातिरूपत्वप्रसङ्गः, भेदे खण्डस्य जातिरूपत्वाभावप्रसङ्ग इति, एवं युगपदेकस्यैकस्य भावाभावविरोधो दुष्परिहर इत्यर्थः । जातिरूपेणाभेदो व्यक्तिरूपेण भेद इत्येवं रूपभेदाभेददूषणेनावस्थात्मना भेदो द्रव्यरूपेणाभेद इत्येवंरूपभेदाभेदश्च यादवप्रकाशाभिमतो निरस्तो भवति तुल्यन्यायत्वात् । यद्वा जाति-शब्दो द्रव्यपरः, व्यक्तिशब्दोऽवस्थापर इति योजनीयं, न हि दृष्टेऽनुपपन्नं नाम, तस्माद् भेदाभेदयोः प्रतिपन्नत्वेन नोक्तदोषप्रसङ्ग इति शङ्कायां प्रतीतिर्न तथेत्याह जात्यादेरिति, प्रथमपिण्डग्रहणे ऽभेदेन ग्रहणं भेदाभेदसाधकत्वेन हि परैरुच्यते तत्प्रत्युक्तं, प्रकारप्रकारिणोश्च पदार्थान्तरत्वमिति वस्तुसंस्थानतयेति संस्थानशब्दोऽपृथक्सिद्धधर्म्मवाची वस्तुसंस्थानतया—वस्तुनः प्रकारत्वादपृथक्सिद्धधर्मत्वेन

जात्यादेर्वस्तुसंस्थानतया वस्तुनः प्रकारत्वात् प्रकारप्रकारिणोश्च पदार्थान्तरत्वं प्रकारस्य पृथक्सि-

* तदभिन्नाभिन्नस्य तदभिन्नत्वनियमेन मुण्डव्यक्त्यभिन्नजातेः खण्डाभेदवत्त्वेन खण्डस्य मुण्डत्वप्रसङ्ग इत्यर्थः ।

† अश्वस्य गजत्वाभाववदिति पा० ।

द्ध्यनर्हत्वं पृथगनुपलम्भश्च, तस्य च संस्थानस्य चानेकवस्तुषु प्रकारतया ऽवस्थितिश्चेत्यादि पूर्वमेवोक्तं, सोऽमिति बुद्धिः प्रकारैक्यादयमपि दण्डीति बुद्धिवत्

वस्तुनो विशेषणत्वादित्यर्थः । इदमित्थमिति प्रकारप्रकारिभावेन प्रतीतेर्नात्राभेद इति स्पष्टं, पृथक्स्थि*त्यनर्हत्वमित्यनेन सहोपलम्भनियमः प्रत्युक्तः, मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यमप्यपृथक्सिद्धधर्म्मवाचित्वादित्युक्तं भवति, एकशब्दानुविद्धप्रत्ययो धर्म्यैक्यान्न तु धर्मधर्म्मिणोरभेदादिति स्फुटतरं, संस्थानस्य चानेकवस्तुषु प्रकारतया स्थितिश्चेत्यनेन प्रथमपिण्डग्रहणेऽपि संस्थानस्य ग्रहणमस्तीत्युक्तं भवति । अन्यथा द्वितीयपिण्डग्रहणेऽनुवृत्तिर्न हि बोद्धुं शक्यते । निर्विकल्पकप्रत्यक्षेणाभेदेन गृहीतमिति चेत्तदपि प्रत्युक्तमित्यादि–शब्दाभिप्रायः । अनुवृत्ता जातिर्न व्यावृत्तं संस्थानं भवतीति शङ्कायां संस्थानमेव जातिरित्युपपादयति सोऽयमितीति, प्रकारैक्यात्–एकप्रकारत्वात् तुल्यप्रकारत्वादित्यर्थः । संस्थानातिरेकेण जातिर्नाम न काचिदुपलभ्यते । अनुवृत्तव्यवहारेण कल्प्यते चेत् तदयुक्तम् अनुवृत्तव्यवहारस्यान्यथासिद्धेः । अश्वगजमहिषगवादिष्वियं जातिरियं जातिरित्यनुवृत्तव्यवहारेऽपि न हि जातिषु जात्यन्तरं कल्प्यते इयं व्यक्तिरियं व्यक्तिरिति व्यवहारेण व्यक्तिषु न हि व्यक्तित्वजातिः कल्प्यते, स हि व्यवहारः सादृश्यात्तस्मात्कल्पकस्यान्यथासिद्धत्वात् संस्थानातिरिक्तस्यादर्शनात्संस्थानमेव जातिरित्यर्थः ।

अयमेव च जात्यादिः प्रकारो वस्तुनोभेद इत्युच्यते तद्योग एव वस्तुनोभिन्नमिति व्यवहारहेतुरित्यर्थः ।

सोऽयमिति बुद्धिः–अनुवृत्तविषयव्यवहारान्विता बुद्धिः, तज्जातीयत्वबुद्धिः अयमपि गौरिति बुद्धिरित्यर्थः । दण्डीति बुद्धिवत्, अयं दण्डी अयमपि दण्डीति व्यवहारे दण्डित्वं नाम जातिर्न ह्यस्तीत्यर्थः । गुणक्रियात्मस्व-

---

* पृथक्सिद्ध्यनर्हत्वमिति पा· ।

नुवृत्तव्यवहारोऽपि प्राभाकराणां प्रतिवन्दीत्वेन वक्तव्यः प्रतियोगिबुद्धिनिरपेक्षो जात्यादिः प्रतियोगिसापेक्षोभेदो भवितुं नार्हतीति शङ्कायां जात्यादिरेव भेद इति साधयति अयमेव च जात्यादिरिति, जात्यादेर्भेद इति किं संज्ञाकरणं देवदत्तादिवदिति शङ्कायां तद्विवृणोति तद्योग एवेति, अभेदबुद्धिविरोधी हि भेदः, जात्यादिग्रहणे अभेदबुद्धिनिवृत्तेर्जात्यादिरेव भेद इत्यर्थः। जात्यादिविषयभेदव्यवहारे हेत्वन्तरापेक्षया अनवस्थाप्रसङ्ग इत्यत्राह स चेति, स्वपरनिर्वाहको जात्यादिरित्यर्थः । संवेदनवदिति संवेदनस्य स्वपरव्यवहारहेतुत्वं हि पराभ्युतगतम् । तदेव विवृणोति यथेति, उक्तार्थेनैव परोक्ताभेदस्य प्रमाणानुपपत्तिः प्रमेयानुपपत्तिश्च परिहृतेत्याह अत एवेति,

स च वस्तुनो भेदव्यवहारहेतुः स्वयं* च संवेदनवत् यथा संवेदनं वस्तुनो व्यवहारहेतुः स्वस्य व्यवहारहेतुश्च भवति, अत एव च सन्मात्रग्राहिप्रत्यक्षं न भेदग्राहीत्यादिवादा निरस्ताः । जात्यादिसंस्थानसंस्थितस्यैव वस्तुनः प्रत्यक्षेण गृहीतत्वात्,

आदि-शब्देन प्रमेयानुपपत्तिर्विवक्षिता । अत एवेत्यभिप्रेतमर्थं विवृणोति जात्यादीति, प्रत्यक्षज्ञानमेकक्षणवर्त्यपि तस्मिन्नेव क्षणे जात्यादिविशिष्टमेव वस्तु गृह्णातीत्यनेन प्रमाणानुपपत्तिर्निरस्ता, स्वरूपधर्म्मविकल्पेन हि प्रमेयानुपपत्तिः, तत्र स्वरूपव्यवहारवद् भेदव्यवहारप्रसङ्गोगोत्वादिव्यवहारादेव प्रत्युक्तः, भिन्न इति शाब्दव्यवहारविशेषस्य प्रतियोग्यपेक्षत्वं दाराः कलत्रं जलमाप इत्यादिषु स्त्रीत्वबहुत्वपुंस्त्वादिवच्छब्दस्वभावायत्तमिति नार्थः स्वरूपदोषः, हानाद्विव्यवहारे जात्यादिशब्दव्यवहारे च प्रतियोगिनिरपेक्षत्वादित्ययमर्थोऽतिस्पष्टत्वादभिप्रेतः स्वपरनिर्वाहकत्वाभ्युपगमेनानवस्था च परिहृता । जात्यादेरेव भेदत्वादन्योन्याश्रयश्च परिहृत इत्यर्थः । एवं जीवब्रह्मस्वरूपैक्ये निर्दोषत्वश्रुतिबाध

* स्वस्य च स वेदनवदिति पा० ।

उक्तः । अचिद्ब्रह्मैक्यप्रयुक्तदोषोऽपि भास्करमत इवात्राप्याप*तेदित्याह स्वरूपेति, दोषश्चाविकारत्वनिरवद्यत्वश्रुतिबाधः पूर्वमुक्तः । स एवात्र स्यादित्यर्थः । एवं द्वितीयश्लोकार्थो विवृतः ।

अथ प्रथमश्लोकार्थं पूर्वमीषद्विवृतं महाविस्तरेण वक्तुमारभते—

तस्यैव संस्थानरूपजात्यादेः प्रतियोग्यपेक्षया भेदव्यवहारहेतुत्वाच्च । स्वरूपपरिणामदोषश्च पूर्वमेवोक्तः, यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति

तत्र तत्त्वमसीति सामानाधिकरण्यस्य भेदश्रुतिघटकश्रुत्यविरोधेनार्थं वक्ष्यंस्तदुपयोगिनीर्घटकश्रुतीरुदाहरति यः पृथिव्यामिति काण्वशाखावाक्यं, य आत्मनीति माध्यन्दिनशाखावाक्यम्, अनेन वाक्यद्वयेनाचिज्जीवान्तर्यामित्वं सिद्धम् । उभयेऽपि हि भेदेनैनमधीयत इति सूत्रानुसारादुभयवाक्योपादानं, तत्र कारणावस्थस्याप्यक्षरस्यान्तर्यामित्वं वक्तुं देवताविशेषं ज्ञापयितुं च सुबालोपनिषद्वाक्यमाह यः पृथिवीमिति, योऽक्षरमित्याद्युदाहर्तव्येऽपि यः पृथिव्यामित्याद्युपादानं प्रकरणज्ञापनार्थम् अन्तर्याम्यमृत इत्यत्रामृत–शब्दस्य एष सर्वभूतान्तरात्माऽपहतपाप्मा इत्यत्रापहतपाप्मशब्दस्य चार्थस्तद्गतदोषासंस्पृष्टत्वमिति तदुक्तेः प्रदर्शनपरत्वं दर्शयितुं च द्वा सुपर्णा इत्युदाहृतं न तु भेदश्रुतित्वात्, भेदश्रुतयो हि उत्तरत्र वक्ष्यन्ते, अन्तः प्रविष्ट इति, इदमपि घटकवाक्यं सर्वात्मत्वं तदन्तर्यामित्वान्न स्वरूपैक्यादिति ह्यस्यार्थः ।

एष त आत्माऽन्तर्याम्यमृतः, य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः

* आपतीति पा० ।

यः पृथिवीमन्तरे सञ्चरन् यस्य पृथिवी शरीरं यं पृथिवी न वेदेत्यादि, योऽक्षरमन्तरे सञ्चरन् यस्याक्षरं शरीरं यमक्षरं न वेद यो मृत्युमन्तरे सञ्चरन् यस्य मृत्युः शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः, द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति, अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा, तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च

तत्तच्छब्दवाच्यत्वं तत्तदनुप्रवेशकृतं न तु स्वरूपैक्यकृतमिति स्पष्टार्थवाक्यमाह तत्सृष्ट्वेति, तत्तदनुप्रवेशेऽपि तद्गतदोषास्पृष्टत्वमाह सत्यं चानृतं च सत्यमभवदिति वाक्यं चिदचिदनुप्रवेशेन तत्तच्छब्दवाच्यमपि ब्रह्म सत्यमभवत् अप्रच्युतस्वस्वभावमभवदित्यर्थः । नामरूपव्याकरणश्रुतेरपि घटकत्वात्तामाह अनेनेति, जीवेनेति निर्देशस्यानुप्रवेशकृतत्वं पूर्वोदाहृतवाक्यैः स्पष्टम् । भेदश्रुतिमाह पृथगिति, तेन जुष्टः—ब्रह्मणाऽनुगृहीतस्ततः—पृथक्त्वज्ञानादमृतत्वमेतीत्यर्थः । भोक्तेति भोक्तारमित्यर्थः । भोक्तृभोग्यनियन्तॄन् यथावत् ज्ञात्वा त्रिविधमेतद्ब्रह्म सर्वं मया तव प्रोक्तमित्यर्थः । आत्मनां नित्यत्वं बहुत्वं च दर्शयति नित्य इति,

त्यच्चाभवदित्यादि सत्सत्यं चानृतं च सत्यमभवत्, अनेन जीवेनात्मनेत्यादि, पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनाऽमृतत्वमेति, भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म एतत्, नित्यो नित्यानां

प्रधानेत्यादिस्पष्टं, स्थैर्यं ते वसुधातलमिति वसुधातलं तव स्थैर्यं भूम्याः स्थिरत्वस्वभावत्वं च त्वदधीनमित्यर्थः। सामानाधिकरण्यप्रयोगः कार्यकारणभावाल्लाक्षणिकः। अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षण इति प्रकरणस्थवाक्यानामयमेवार्थः। यस्य प्रसादजो ब्रह्मा रुद्रश्च कोपसम्भवः, यस्य प्रसादादहमच्युतस्य भूतप्रजासर्गकरोऽन्तकारी। क्रोधाच्च रुद्र इत्यत्र देवताविशेषेषु प्रसादक्रोधतुकत्वदर्शनात् कार्यकारणभावेऽपि सामानाधिकरण्यप्रयोगो दृष्टः, ब्राह्मणोऽस्य मुखमासीदित्यादिषु पद्भ्यां भूमिरिति वाक्यैकार्थ्यात्, तस्मात् स्थैर्यं ते वसुधातलमित्यादिवाक्येन सर्वस्योत्पत्तिस्थितिप्रवृत्तयो भगवदधीना इत्युक्तं भवति, यत्किञ्चिदिति कृत्स्नकार्यवर्गस्य कारणं तत्तत्कारणान्तर्यामितया तच्छरीरकं ब्रह्मैवेत्यर्थः अहमात्मेत्यात्म-शब्देन सर्वमपि शरीरमित्यर्थात् सिद्धं, सर्वस्य चाहमित्यन्तर्यामित्वपरं हृदि ह्ययमात्मेति जीवस्य हृत्स्थत्वात् तदन्तर्यामी च हृत्स्थ* एवेत्यर्थः। आत्मशरीरभावावगमोऽस्तु ततः किं मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यस्येत्याह शरीरस्य चेति, अनेनाकृत्यधिकरणन्यायः स्मारितः। शरीरशरीरिणोश्च धर्मभेदेऽपि तयोरसङ्करादिति महापातकिनस्तत्संसर्गिणश्च धर्मभेदेऽपि संसर्गप्रयुक्तं पातकित्वमापतति काष्ठस्य रुमाया†श्च धर्मभेदे सत्येव काष्ठस्य संसर्गप्रयुक्ततल्ल‡क्षणत्वं दृश्यते

चेतनश्चेतनानाम् एको बहूनां यो विदधाति कामान् प्रधानक्षेत्रज्ञपतिर्गुणेशः, ज्ञाज्ञौ द्वावजावीशनीशावित्यादिश्रुतिशतैस्तदुपबृंहणैः—जगत्सर्वं शरीरं ते, स्थैर्यं ते वसुधातलं, यत्किञ्चित्सृज्यते येन सत्त्वजातेन वै द्विज! तस्य सृज्यस्य सम्भूतौ, तत्सर्वं वै हरेस्तनुः, अ-

* हृदि स्थित एवेत्यर्थः इति पा०।

† रुमा स्याल्लवणाकर इति लवणोत्पत्तिस्थानं रुमोच्यते।

‡ संसर्गप्रयुक्तलवणत्वमिति पा०।

हमात्मा गुडाकेश ? सर्वभूताशयस्थितः । सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं चेत्यादि-

एवं धर्म्मभेदेऽपि संसर्गप्रयुक्तो यः सङ्करस्तस्य शरीरशरीरिणोरसंभवादित्यर्थः। धर्म्मभेदेन चेति पाठः । एवमुक्तहेतुभिः सर्वशरीरं ब्रह्म, आदि-शब्देन व्यधिकरणवाक्यविशेषाः शरीरतन्वङ्गादिशब्दवन्तो विवक्षिताः सर्वशरीरत्वात्सर्वचेतनाचेतनप्रकारं ब्रह्मैव सर्वशब्दानां मुख्याभिधेयमित्यर्थः । कथं मुख्यवृत्तत्वमित्यत्राह सामानाधिकरण्यमिति, ततः किमित्यत्राह तस्य चेति, कथं स्वपक्षे मुख्यतेत्यत्राह तथा हीति, कारणत्वशङ्कितदोषव्यावर्तकशोधकवाक्यार्थमाह निरवद्यमिति, त्वमिति चेति, तच्छब्देन सामानाधिकरण्यवृत्तेन त्वमिति पदेनेत्यर्थः । त्वं-शब्दस्य जीवान्तर्यामिपरत्वे लक्षणा स्यादित्यत्राह तच्छरीरं तदात्मतयाऽवस्थितमिति,

वेदविदग्रेसरवाल्मीकि-पराशर-द्वैपायनवचोभिश्च परस्य ब्रह्मणः सर्वस्यात्मत्वावगमाच्चिदचिदात्मकस्य वस्तुनस्तच्छरीरत्वावगमाच्च शरीरस्य शरीरिणं प्रति प्रकारतयैव तत्पदार्थत्वात्, शरीरशरीरिणोश्च धर्म्मभेदेऽपि तयोरसङ्करात्सर्वशरीरं ब्रह्मेति ब्रह्मणो वैभवं प्रतिपादयद्भिः सामानाधिकरण्यादिभिर्मुख्यवृत्तैः सर्वचेतनाचेतनप्रकारं ब्रह्मैवाभिधीयते, सामानाधिकरण्यं हि द्वयोः पदयोः प्रकारद्वयमुखेनैकार्थनिष्ठत्वं, तस्य चैतस्मिन्पक्षे मुख्यता। तथा हि तत्त्वमिति सामानाधिकरण्ये तदित्यनेन जगत्कारणं

शरीरतया तादात्म्यमस्तु ततः किमन्तर्यामिपर्यन्तत्वस्येत्यत्राह तत्प्रकारमिति, पक्षान्तरेष्वमुख्यार्थत्वमाह इतरेष्विति, ब्रह्माज्ञानपक्षे प्रवृत्तिनिमित्ताभावेन सामानाधिकरण्यलक्षणहानिः अविद्याश्रयत्वदोषश्च

स्यात् । द्वितीयपक्षेऽपि ब्रह्मण एव तच्छब्दावगतकल्याणगुणविरुद्धाज्ञत्वादिप्रसङ्ग इति सर्वज्ञत्वादिव्याघातादेव त्वं-शब्दस्य जीवत्वप्रहाणेन वस्तुमात्रपरत्वे स्वाभिमुखचेतनत्वरूपप्रवृत्तिनिमित्तहानमापतति स्वाभिमुखचेतनो हि त्वं-शब्दवाच्यः । आभिमुख्यं च श्वेतकेतोर्जीवत्वविशिष्टस्यैव न तु वस्तुमात्रस्य, अतः सामानाधिकरण्यलक्षणहानिः सदोषत्वं चेत्यर्थः । तृतीयेऽपि पक्षे सर्वज्ञत्वादिगुणकत्वात्तच्छब्दवाच्यतया प्रकृत ईश्वर इति ब्रह्मांशभूतजीवेश्वरवाचिपदयोर्घटशरावं इतिवत्सामानाधिकरण्यमयुक्तं, तच्छब्दः सन्मात्रपर इति चेत्सर्वज्ञत्वादिगुणकस्यैव प्रकृतत्वाद् घटे प्रकृते मृन्मात्रस्येव सन्मात्रस्य प्रकृतत्वाभावात् तत्पदस्य प्रवृत्तिनिमित्तप्रहाणेन सामानाधिकरण्यलक्षणहानिः, सन्मात्रं च प्रकृतमिति

सर्वकल्याणगुणा*करं निरवद्यं ब्रह्मोच्यते, त्वमिति च चेतनसमानाधिकरणवृत्तेन जीवान्तर्यामिरूपि तच्छरीरं तदात्मतयाऽवस्थितम्–

चेत् सत्प्रकृतं न तु सन्मात्रं मात्रजर्थस्य तदैक्षत बहु स्यामित्याद्युक्तसार्वज्ञ्यादिविरोधात् तच्छब्दस्येश्वरपरत्वे तद्विरोधपरिहाराय त्वं-पदस्य वस्तुमात्रपरत्वे स्वाभिमुखचेतनत्वरूपप्रवृत्तिनिमित्तप्रहाणात् सामानाधिकरण्यलक्षणहानिः, दोषवत्त्वं च स्यादित्यर्थः । ननु सृष्टेः प्राक् एकत्वावधारणाद्यतः प्रधानपुरुषाविति प्रधानपुरुषयोरप्युत्पत्तिमत्त्वदर्शनाच्च तदानीं न शरीरशरीरिभावः सिद्ध्यतीति द्रव्यैकत्वमेवाभ्युपगन्तव्यमित्यत्राह एतदुक्तं भवतीति, यद्यद्विशेषणं वेदान्तवाक्येषु श्रुतं तत्तद्बाहुल्यात्तदभिप्रेत्यैवं-शब्दोऽत्र प्रयुक्तः यथा निमित्तकारणत्वं निमित्तत्वोपयोगि सर्वज्ञत्वादिसापेक्षम् एवमुपादानत्वमपि निष्कृष्टस्वरूपस्यानुपपन्नत्वात् प्रकृतिपुरुषविशिष्टत्वसापेक्षमिति कारणविषयमेकत्वावधारणत्वं न कारणत्वोपयुक्तविशेषणविरोधीति तदानीमपि चिदचिद्विशिष्टमेव ब्रह्मेत्य-

* सर्वः कल्याणगुणाकरोयस्येति बहुव्रीहिसमाश्रयणेन सर्वकल्याणगुणाकरमिति नापुंसक्यमितरथा तु पुँस्त्वनेत्र आकरशब्द अजहत्पुँस्त्वकत्वात् ।

भिप्रायेणात्र परिहार उच्यते ब्रह्मैवेत्यादिना, एवमवस्थितमित्यत्र एवं-शब्दार्थभूतप्रकारतयेति सर्वं खल्विदं ब्रह्म व्यक्तं विष्णुस्तथाऽव्यक्तं ज्योतींषि विष्णुरित्यादिनिर्देशस्य प्रदर्शनार्थमेवं-शब्दः, व्यक्तं विष्णुरित्यादिनिर्देशेषु एवं-शब्दार्थभूतप्रकारतया-तत्तच्छब्दप्रवृत्तिनिमित्तभूतप्रकारतया सर्वावस्थास्वपि चेतनाचेतनप्रपञ्चसद्भाव इत्यर्थः स्थूलस्य सूक्ष्मस्य चेत्यनेनैकत्वावधारणं व्याख्यातं, नामरूपविभागानर्हसूक्ष्मदशा-

तत्प्रकारं ब्रह्मोच्यते, इतरेषु पक्षेषु सामानाधिकरण्यहानिर्ब्रह्मणः सदोषता च स्यात्। एतदुक्तं भवति ब्रह्मैवैवमवस्थितमित्यत्रैवं-शब्दार्थभूतप्रकारतयैव विचित्रचेतनाचेतनात्मकप्रपञ्चस्य स्थूलस्य सूक्ष्मस्य

पत्तिविवक्षयैकत्वावधारणं नामरूपविभागार्हस्थूलदशापत्त्या बहुत्वनिर्देश इति भावः । तदेवोपपादयति तथा चेति, न हि बहुभवनं ब्रह्मणयद्वारकमुपपद्यते तथा सत्यविकारश्रुतिबाधः, अचिद्विशिष्टस्यैव बहुत्वं तन्नामरूपप्रहाणरूपैकत्वं चाद्वारकं नोपपद्यते, अतोविशिष्टत्वमभ्युपेत्यम्, अन्यथा प्रकृतिपुरुषयोरजत्वनित्यत्वश्रुतिविरोधः, अकृताभ्यागमकृतविप्रणाशप्रसङ्गश्च । तस्माद्बहुत्वादिकं सद्वारकमिति यथोक्त एवार्थ इत्यभिप्रायः । तर्हि कार्यं कारणं च कथं ब्रह्मैव स्यादित्यत्राह तस्यैवेति, संस्थानतया-अपृथक्सिद्धधर्म्मतया, विशिष्टं वस्त्वेकमेवावस्थाद्वयान्वितमिति कार्यकारणयोरेकत्वसिद्धिरित्यर्थः । जातिगुणयोरेव द्रव्यात् पृथक्सिद्धिरिति तयोरन्यतरवाचित्वमेव मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यप्रयोजकं, द्रव्यस्य तु दण्डकुण्डलादेरपृथक्सिद्ध्यभावात्तद्वाचिशब्दस्य मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यं नोपपद्यते इत्यभिप्रायेण चोदयति ननु चेति, संस्थानरूपेण प्रकारतया अपृथक्सिद्धविशेषणरूपेण प्रकारतया एवं-शब्दार्थत्वमिति धर्ममुखेन धर्म्मिवाचिशब्दानां प्रदर्शनार्थं एवं-शब्दः ।

च सद्भावः, तथा च बहु स्यां प्रजायेयेत्ययमर्थः सम्पन्नो भवति, तस्यैवेश्वरस्य कार्य्यतया कारणतया च नानासंस्थानसंस्थितस्य संस्थानतया चिदचिद्वस्तुजातमवस्थितमिति ॥

अपृथक्सिद्धविशेषणत्वेन तत्तच्छब्दाभिधेयत्वं जातिगुणयोरेव दृष्टं घटः पटः शुक्ल इत्यादिषु न द्रव्यस्येति अपृथक्सिद्धविशेषणत्वेन तत्तच्छब्दप्रवृत्तिनिमित्तार्थत्वं द्रव्यस्य न दृष्टमित्यर्थः। ततः किमित्यत्राह स्वतन्त्रेति, पृथक्सिद्ध्यर्हस्य चिदचित्पदार्थस्येश्वरपर्यन्तशब्दाभिधेयतया ईश्वरप्रकारत्वमयुक्तमित्यर्थः। परिहरति उच्यत इति, किं द्रव्यस्य द्रव्यान्तरं प्रति प्रकारत्वमयुक्तमित्युच्यते? उत नियतप्रकारत्वमयुक्तमिति विकल्पमभिप्रेत्य प्रथमं शिरः प्रतिवदति द्रव्यस्यापीति, द्रव्यान्तरप्रकारत्वं दृष्टमेवेति, दण्डकुण्डलादेः प्रकारत्वे दृष्टेऽपि तस्य पृथक्सिद्ध्यर्हत्वं प्रमाणान्तरसिद्धम्, अत्र तु चिदचितोर्ब्रह्मप्रकारत्वं दृष्टं, पृथक्सिद्ध्यर्हत्वे तु न प्रमाणमिति प्रकारत्वं स्थितमेवेति नियतप्रकारत्वं सिद्धमित्यभिप्रायः। एवमभिप्रायमजानन् दण्डकुण्डलादिशब्दानामिव सामानाधिकरण्यस्य मत्वर्थीयप्रत्ययसापेक्षत्वमापादयँश्चोदयति ननु चेति, द्रव्यस्य द्रव्यान्तरं प्रति प्रकारत्वे सत्यपि नियतप्रकारत्वायोगाच्च मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यमित्यर्थः। परिहरति अत्रोच्यत इत्यादिना,

ननु च संस्थानरूपेण प्रकारतयैवं-शब्दार्थत्वं जातिगुणयोरेव दृष्टं न द्रव्यस्य, स्वतन्त्रसिद्धियोग्यस्य पदार्थस्यैवं-शब्दार्थतयेश्वरस्य प्रकारमात्रत्वमयुक्तमिति चेत् उच्यते-द्रव्यस्यापि दण्डकुण्डलादेर्द्रव्यान्तरप्रकारत्वं दृष्टमेव ।

द्रव्यस्य द्रव्यान्तरं प्रति नियतप्रकारत्वं प्रभा प्रभाववत्सु दृष्टमिति हृदि निधाय द्रव्यस्य द्रव्यान्तरविशेषणत्वे मत्वर्थीयप्रत्ययनिरपेक्षसामानाधि-

करण्यप्रयोगं दर्शयति गौरश्व इति, द्रव्यत्वहेतुतया भूतसंघातरूपाणामित्युक्तं देवमनुष्यादिशब्दस्य पिण्डमात्रपर्यवसानशङ्काव्यावृत्त्यर्थं पुण्यविशेषेण पापेन कर्म्मणा पुण्यातिरेकेणेत्युक्तं, न हि पिण्डस्याचेतनस्य पुण्यपापवत्त्वं पूर्व्वं गौरश्वो मनुष्य इत्युक्त्वा पुनर्देवादिशरीराणामित्युक्तं, तत्र न पुनरुक्तिः शङ्कनीया शब्दपरत्वेनार्थपरत्वेन च प्रयुक्तत्वात् गौरश्वो मनुष्यो देव इति शब्दवाच्यानां देवत्वमनुष्यत्वादिसंस्थानविशिष्टानां शरीराणामित्यर्थः। चेतनप्रकारतया—चेतनस्य नियतप्रकारतया देवो, जात इत्यादिशब्दः प्रतिपादनविशेषणभूतः, गौरश्वोमनुष्योदेव इति शब्दवाच्यानां भूतसङ्घातरूपतया द्रव्याणां देवत्वमनुष्यत्वादिसंस्थानविशिष्टानां शरीराणां चैतनप्रकारतया लोकवेदयोर्देवदत्तोमनुष्योजातः पुण्यविशेषेणेत्यादिकं सामानाधिकरण्येन प्रतिपादनं दृष्टमित्यन्वयः । शरीराणां सामानाधिकरण्येन प्रतिपादनमित्यनेन तद्वाचिशब्दानां सामानाधिकरण्यमित्युक्तं भवति ।

ननु च दण्डादेः स्वतन्त्रस्य द्रव्यान्तरप्रकारत्वे मत्वर्थीयप्रत्ययो दृष्टः, यथा दण्डी कुण्डलीति, अतो गोत्वादितुल्यतया चेतनाचेतनस्य द्रव्यभूतस्य वस्तुन ईश्वरप्रकारतया सामानाधिकरण्येन प्रतिपादनं न युज्यते । अत्रोच्यते गौरश्वो मनुष्यो देव इति

अर्थसामानाधिकरण्याद्धि शब्दसामानाधिकरण्यं शरीरस्य चेतनसामानाधिकरण्यं नाम चैतन्यसमानाश्रयत्वं शरीरं चैतन्यं च चेतनविशेषणं तत्रौपाधिकत्वं स्वाभाविकत्वं चेति विशेषः । यद्वा शरीराणां सामानाधिकरण्येन प्रतिपादनमिति शरीराणां सामानाधिकरण्यप्रवृत्तशब्दैः प्रतिपादनमिति यावत् । नन्वद्रव्यत्वे सति विशेषणत्वमेव मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्ये प्रयोजकं, तस्मादत्र सामानाधिकरण्यं लाक्षणिकमित्यत्राह अयमर्थ इति, मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्ये प्रयोजकं

जातित्वं वा गुणत्वं अन्यद्वा तत्र सामानाधिकरण्यं मुख्यमिति नाभ्युपगतं प्रयोगाविशेषे सत्यप्यननुयायिप्रयोजककल्पनेन क्वचिदमुख्यत्वाश्रयणायोगाद्विति चेत्तर्हि द्रव्यविशेषवाचिशब्दानामपि तथा प्रयोगेऽविशिष्टे तत्राव्याप्तप्रयोजककल्पनेनामुख्यत्वाश्रयणमयुक्तमित्यर्थः । तर्हि सर्वप्रयोगानुगतं प्रयोजकं किमित्यत्राह कश्चनेति, तदपृथक्सिद्धेः तत्प्रकारतयेति तत्प्रकारकत्वेन तदपृथक्सिद्धेर्द्रव्यवाचिपदानामपि प्रकारिपर्यन्तत्वे दण्डकुण्डलादेरपि तथा प्रसज्जेदिति शङ्कायां तद्वैषम्यमाह यस्य पुनरिति,

भूतसङ्घातरूपाणां द्रव्याणामेव देवदत्तो मनुष्यो जातः पुण्यविशेषेण, यज्ञदत्तो गौर्जातः पापेन कर्म्मणा, अन्यश्चेतनः पुण्यातिरेकेण देवो जात इत्यादिदेवादिशरीराणां चेतनप्रकारतया लोकवेदयोस्सामानाधिकरण्येन प्रतिपादनं दृष्टम् । अयमर्थः जातिर्वा गुणो वा द्रव्यं वा न तत्रादरः

एवं जीवं प्रति शरीरस्य नियतप्रकारत्वेन तद्वाचिपदानां तत्पर्यन्तत्वं विवक्षितम् । ततः किं जगद्वाचिशब्दानामीश्वरपर्य्यन्तत्वस्येत्यत्राह एवमेवेति, जगद्वाचिशब्दानामीश्वरपर्यन्तत्वे प्रमाणे सति हि तदनुग्राहकन्यायापेक्षा, अतस्तत्र किं प्रमाणं व्युत्पत्तिभङ्गश्च भवेत् घटपटादेः स्वनिष्ठत्वविषयप्रत्यक्षविरोधश्चेत्यादिशङ्कायामाह तदेतदिति, एवं सद्विद्योपसंहारगतं तत्त्वमसीति सामानाधिकरण्यं न द्रव्यैक्यपरम्, अपि त्वात्मशरीरभावपरमित्युक्तम् । एवमुपक्रमगतमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञावाक्यमपि विशिष्टैक्यपरमित्याह अत इति, अतः—तत्त्वमसीति वाक्यस्य विशिष्टैक्यपरत्वोपपादनादित्यर्थः । ब्रह्मणस्तेजोऽबन्नमात्रकारणत्वे कृत्स्नकारणत्वमनुपपन्नमिति तत्परिहाराय सद्विद्यायां तेजोऽबन्नसृष्टिकथन-

कश्चन द्रव्यविशेषं प्रति विशेषणतयैव यस्य सद्भावस्तस्य

तदपृथक्सिद्धेस्तत्प्रकारतया तत्सामानाधिकरण्येन प्रतिपादनं युक्तं, यस्य पुनर्द्रव्यस्य पृथक्सिद्धस्यैव कदाचित्क्वचिद् द्रव्यान्तरप्रकारत्वमिष्यते तत्र मत्वर्थीयप्रत्यय इति विशेषः, एवमेव स्थावरजङ्गमात्मकस्य सर्वस्य वस्तुन ईश्वरशरीरत्वेन तत्प्रकारतयैव स्वरूपसद्भाव इति तत्प्रकारी ईश्वर एव तत्तच्छब्देनाभिधीयते इति तत्सामानाधिकरण्येन प्रतिपादनं युक्तं, तदेतत्सर्वं पूर्वमेव नामरूपव्याकरणश्रुतिविवरणे प्रपञ्चितम् । अतः प्रकृतिपुरुषमहदहङ्कार-तन्मात्र-भूतेन्द्रिय-तदारब्ध-चतुर्दशभुवनात्मकब्रह्माण्ड-तदन्तर्वर्त्तिदेवतिर्यङ्मनुष्यस्थावरादिसर्वप्रकारसंस्थानसंस्थितं कार्यमपि सर्वं ब्रह्मैवेति कारणभूतब्रह्मविज्ञानादेव सर्वं विज्ञातं

मन्येषामपि प्रदर्शनार्थमित्यभिप्रायेणाह प्रकृतिपुरुषेति, देवतिर्यङ्मनुष्यस्थावरादिसर्वप्रकारसंस्थानसंस्थितमिति आदि-शब्देन देवतिर्यङ्मनुष्याद्यवान्तरजातिभेदोविवक्षितः । देवतिर्यङ्मनुष्यस्थावरादीति कार्यविशेषणं सर्वप्रकारसंस्थानसंस्थितं नानाविधसंस्थानविशिष्टमित्यर्थः । यद्वा देवमनुष्यादिशब्दा भावप्रधानाः, देवत्वमनुष्यत्वादिस्सर्वः प्रकारो यस्य तद्देवतिर्यङ्मनुष्यस्थावरादिसर्वप्रकारं स एव संस्थानम् अपृथग्भूतधर्मः । तेन संस्थितं विशिष्टमित्यर्थः । विशिष्टमेव कारणं तदेव कार्यमिति कार्य्यकारणयोरनन्यत्वात्तज्ज्ञानेन तज्ज्ञानमित्यर्थः । उपपन्नतरं-मुख्यतयोपपन्नमित्यर्थः । एवमुपक्रमोपसंहारवाक्ययोर्विशिष्टैक्यपरत्वमुक्तम् । अथ मध्यगतं सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः एतदात्म्यमिदं सर्वमिति वाक्यस्यात्मशरीरभावेन तादात्म्यपरत्वमित्याह तद्देवमिति, कार्यकारणभावशब्देन सन्मूलाः सत्प्रतिष्ठा इत्यस्यार्थो विवक्षितः ।

भवतीत्येकविज्ञानेन सर्वविज्ञानमुपपन्नतरम् । तदेवं कार्य्यकारणभावादिमुखेन कृत्स्नस्य चिदचिद्वस्तुनः परब्रह्मप्रकारतया तदात्मकत्वमुक्तम् ॥

ननु च परस्य ब्रह्मणः स्वरूपेण परिणामास्पदत्वं निर्विकारत्वनिरवद्यत्वश्रुतिव्याकोपप्रसङ्गेन निवारितं, प्रकृतिश्च प्रतिज्ञादृष्टान्ताऽनुपरोधादित्ये-

आदि-शब्देन सदायतनत्वं विवक्षितं, तच्च धार्यधारकभावः परब्रह्मप्रकारतया तदात्मकत्वमुक्तमिति न तु स्वरूपैक्येन तादात्म्यमित्यर्थः । कार्य्यकारणभावाच्च प्रकारप्रकारिभावाच्च तादात्म्यं द्विविधं, तत्र कार्य्यकारणभावादेव प्रकारप्रकारिभावोऽपि सिद्धः, विशिष्टस्यैव कारणत्वकार्यत्वयोगादन्तः प्रविश्य धारकत्वेन नियन्तृत्वेन स्थितिहेतुत्वाच्च, अतः सन्मूला इति वाक्ये उभयविधं तादात्म्यमभिप्रेतमिति ग्रन्थाभिप्रायः । सर्वं खल्विदं ब्रह्म तज्जलानित्यस्याप्ययमेवार्थः । जगदुपादानत्वे निर्विकारत्वव्याघातशङ्कया चोदयति ननु चेति, स्वरूपेण परिणामास्पदत्वं निवारितमस्तु ततः किमित्यत्राह प्रकृतिश्चेति, सूत्रार्थमाह एकविज्ञानेनेति, अनेन श्रुतिश्च स्मारिता । उपादानत्वं प्रतिपादितमस्तु ततः किमित्यत्राह उपादानेति, सद्वारकमुपादानत्वमित्यविरोधमभिप्रेत्य परिहरति अत्रोच्यत इत्यादिना, अविशेषेणेति, यतोवा इमानि सन्मूलाः सोम्येमाः सर्वाः

कविज्ञानेन सर्वविज्ञानप्रतिज्ञानं मृत्तत्कार्यदृष्टान्ताभ्यां परमपुरुषस्य जगदुपादानकारणत्वं च प्रतिपादितम्, उपादानकारणत्वं च परिणामास्पदत्वमेव, कथमिदमुपपद्यते—अत्रोच्यते सजीवस्य प्रपञ्चस्याविशेषेण कारणत्वमुक्तं, तत्रेश्वरस्य जीवरूपपरिणामाभ्युपगमेन नात्मा श्रुतेर्नित्यत्वाच्च ताभ्य इति विरुध्यते, वैषम्य-

वती सा जनित्री भूतभाविनीति च, स्मृतिश्च भवति—प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि । विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥ भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो! ययेदं धार्यते जगत् ॥

द्वारभूतप्रकृतेः परिणामित्वे श्रुतिमाह अस्मादिति, अनेन माया-शब्दार्थोऽपि स्पष्टः । जनत्री—समष्टिजनित्री, भूतभाविनी—व्यष्टिहेतुरित्यर्थः उक्तार्थविषयां स्मृतिं दर्शयति स्मृतिश्चेति, प्रकृतिं पुरुषमित्यादिना प्रकृतिपुरुषयोरनादित्वं भूमिराप इत्यादिना द्वारभूतायाः प्रकृतेः परिणामित्वं च सिद्धम् । एवं जीवरूपेणाचिद्रूपेण च ब्रह्मणः परिणामे दूषणमुक्तं प्रकृतिरेव परिणामिनी चेत्कथं ब्रह्मण उपादानत्वमित्यत्राह प्रकृतेरपीति, गौरनाद्यन्तवतीत्यादिषु प्रकृतिवाचिशब्दस्तच्छरीरकब्रह्मवाचीत्यर्थः, यतः प्रधानपुरुषावित्यादिषु पुरुष-शब्दोऽपि तथैवेत्याह पुरुषेति, ब्रह्मणः कार्यत्वसिद्ध्यर्थमाह अतस्तद्विकाराणामपीति, उक्तार्थे स्मृतिमाह तदाहेति, निर्दोषत्वनिर्विकारत्वोपादानत्वश्रुत्यविरोधमाह अत इति, सत्यसङ्कल्पत्वपदेनापहतपाप्मेत्यादिवाक्यं स्मारितम्

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः । मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ॥ इत्यादिका, एवं च प्रकृतेरपीश्वरशरीरत्वात्प्रकृति-शब्दोऽपि तदात्मभूतस्येश्वरस्य तत्प्रकारसंस्थितस्य वाचकः, पुरुषशब्दोऽपि तदात्मभूतस्येश्वरस्य पुरुषप्रकारसंस्थितस्य वाचकः, अतस्तद्विकाराणामपि तथैवेश्वर आत्मा, तदाह व्यक्तं विष्णुस्तथाऽव्यक्तं पुरुषः काल एव च ।

स एव क्षोभको ब्रह्मन्! । क्षोभ्यश्च परमेश्वरः ॥ इति, अतः प्रकृतिप्रकारसंस्थिते परमात्मनि प्रकारभूतप्रकृत्यंशे विकारः प्रकार्यंशे चाविकारः, एवमेव जीवप्रकारसंस्थिते परमात्मनि च प्रकारभूतजीवांशे सर्वे चापुरुषार्थाः ।

उपादानत्वश्रुतिर्विशिष्टविषया निर्विकारत्वादिश्रुतिर्विशेष्यांशमात्रविषयेत्यर्थः । विशिष्ट एवायमीश्वरः कारणं, विशिष्टः स एव कार्यमिति कार्यकारणयोरनन्यत्वसिद्धिरित्याह तथा च सतीति, कार्यकारणयोरनन्यत्वं कारणात् कार्यस्य द्रव्यान्तरत्वं वारयति न तु कारणस्य विशिष्टत्वविरोधि अविशिष्टत्वे कारणत्वायोगादित्यर्थः । सर्वेति, उपपादितप्रकारेण निर्दोषत्वोपादनत्वादिपरश्रुत्यविरोध इत्यर्थः । चिदचिद्विशिष्टस्य ब्रह्मणोनित्यत्वात्सृष्टिप्रलयायोगः, ब्रह्मणः कारणत्वं कार्यत्वं चायुक्तमित्यत्राह तदेवमिति, तदापत्तिः-सूक्ष्मदशापत्तिः-द्रव्यनित्यत्वेऽप्यवस्थाभेदेन सर्गाद्युपपत्तिरित्यर्थः । वस्तुस्वरूपनित्यत्वेऽप्यवस्थाभेदेन कारणत्वाद्युपपत्तौ प्रमाणमाह यथोक्तमिति, अजयोरित्यनेन कारणत्वावस्थायां सत्त्वं सूचितं, कार्यभूतयोरित्यनेन कार्यावस्थां प्रति कारणत्वमित्युक्तं, तर्हि कार्यत्वकारणत्वे प्रकृतिपुरुषयोरेवेति परमात्मनः कारणत्वादिनिर्देशोऽमुख्यः स्यादित्यत्राह तस्मादिति,

प्रकार्यंशो नियन्ता निरवद्यः सर्वकल्या*णगुणाकरः सत्यसङ्कल्प एव, तथा च सति कारणावस्थ ईश्वर एवेति तदुपादानकजगत्कार्यावस्थोऽपि स एवेति कार्यकारणयोरनन्यत्वं, सर्वश्रुत्यविरोधश्च भवति । तदेवं नामरूपविभागानर्हसूक्ष्मदशापन्नप्रकृतिपुरुषश-

* कल्याणगुणाश्रय इति पा· ।

रीरं ब्रह्म कारणावस्थं जगतस्तदापत्तिरेव च प्रलयः, नामरूपविभागविभक्तस्थूलचिदचिद्वस्तुशरीरं ब्रह्म कार्यावस्थम्—

चिदचिद्द्रव्ययोः परमात्माख्यद्रव्येण सहोपलम्भनियमाभावाज्जातिगुणवत्प्रकारतैकस्वभावत्वप्रयुक्तमित्यत्राह जीवात्मेति, सहोपलम्भनियमोऽपृथक्सिद्धप्रकारत्वे प्रयोजकः अतस्तदभावाद्देवादिशब्दानामपि जीवपर्यन्तत्वममुख्यमिति शङ्कायामाह यथेति, सहोपलम्भनियम एकसामग्रीवेद्यत्वप्रयुक्तः, न तु नियतप्रकारत्वप्रयुक्तः, गन्धादिषु व्यभिचारात् तस्मात्तदेकाश्रयत्व तदेकप्रयोजनत्वं च नियतप्रकारत्वे प्रयोजकम्। किञ्च मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यप्रयोगो यत्रास्ति तत्र सर्वत्रानुगतं प्रयोजकं कल्प्यम् अन्यथा जातित्वं गुणत्वं वा प्रयोजकं स्यात्, तस्माद्देवादिशरीरस्य चेतनप्रकारतैकस्वभावत्वात् तद्वाचिशब्दानां तत्पर्यन्तत्वं मुख्यमित्यर्थः। एवं दृष्टान्तोक्तमर्थं दार्ष्टान्तिकेऽतिदिशति वक्ष्यमाणशरीरलक्षणसङ्गत्यर्थं। तस्मादिति,

ब्रह्मणस्तथाविधस्थूलभाव एव जगतः सृष्टिरित्युच्यते, यथोक्तं भगवता पराशरेण—प्रधानपुंसोरजयोः कारणं कार्यभूतयोरिति, तस्मादीश्वरप्रकारभूतसर्वावस्थप्रकृतिपुरुषवाचिनः शब्दास्तत्प्रकारविशिष्टतयाऽवस्थिते परमात्मनि मुख्यतया वर्तन्ते जीवात्मवाचिदेवमनुष्यादिशब्दवत्, यथा देवमनुष्यादिशब्दा देवमनुष्यादिप्रकृतिपरिणामविशेषाणां जीवात्मप्रकारतयैव पदार्थत्वात् प्रकारिणि जीवात्मनि मुख्यतया वर्तन्ते,

चिदचिद्वस्तुनोः शरीरत्वं परमात्मनः शरीरित्वं चानुपपन्नं शरीर-

शरीरिलक्षणाभावात् चेष्टाभोगेन्द्रियाश्रयो हि शरीरमित्यत्राह अयमेवेति, पृथक्सिद्ध्यनर्ह—शब्दः प्रतिपदमन्वेति तेन पदेन गृहक्षेत्रघटपटादिव्यावृत्तिः, अत्र शरीरात्मभावलक्षणयोः सहोक्त्या शरीरमात्मा च प्रतिसम्बन्धिनिरूप्यपदार्थ इति दर्शितं भवति, तत्र किं शरीरत्वं किमात्मत्वमिति शङ्कायां विभज्य दर्शयति सर्वात्मनेति, सर्वात्मना—यावद्द्रव्यभावितयेत्यर्थः । आत्मशब्दावयवार्थस्य च शरीरशरीरिलक्षणौपयिकत्वमभिप्रेत्याह आप्नोतीति, द्रव्यत्वे सत्याधेयतयेत्यध्याहारेण योजयितव्यम् आधेयत्वं नियाम्यत्वं शेषत्वविशेषणं सर्वात्मनेति पदम् अपृथक्सिद्धमिति पदं प्रकारविशेषणं सर्वात्मनाऽऽधेयत्वादिभिरपृथक्सिद्धप्रकारत्वादित्यर्थः । आकारः शरीरमिति चोच्यत इति, जातिगुणयोरप्याकारत्वम् अपृथक्सिद्धप्रकारत्वात् शरीरमप्यपृथक्सिद्धप्रकारत्वादाकारशब्द—वाच्यं द्रव्यत्वात् शरीरशब्दवाच्यमित्यर्थः । अयमर्थः द्विपात्त्वं शरीरत्वं चतुष्पात्त्वं शरीरत्वमिति शरीरलक्षणं किमिति न स्यात्

तस्मात् सर्वस्य चिदचिद्वस्तुनः परमात्मशरीरतया तत्प्रकारत्वात् परमात्मनि मुख्यतया वर्तन्ते सर्वे तद्वाचकाः शब्दाः । अयमेव चात्मशरीरभावः पृथक्सिद्ध्यनर्हाधाराधेयभावो नियन्तृनियाम्यभावः शेषशेषिभावश्च सर्वात्मनाऽऽधारतया नियन्तृतया शेषितया च आप्नोतीत्यात्मा सर्वात्मनाऽऽधेयतया नियाम्यतया शेषतया च अपृथक्—

द्विपात्त्वचतुष्पात्त्वादिविभागाभावेन सर्वत्र शरीरशब्दप्रयोगाविशेषादिति चेत् तर्हि लोके वेदे च यत्र यत्र शरीरशब्दप्रयोगस्तत्र तत्र सर्वत्रानुगते लक्षणे वाच्ये कतिपयप्रयोगविशेषाननुगतत्वादव्याप्तलक्षणमुक्त्वा प्रयोगविशेषेष्व मुख्यत्वाश्रयणमयुक्तं तस्मा चेष्टेन्द्रिया*द्याश्रयत्वमव्याप्तमिति

* चेष्टेन्द्रियार्थाश्रयत्वमिति पा० ।

सर्वप्रयोगानुगतं लक्षणमिदमेव साधीयः । यत्तु भाष्योक्तशरीरलक्षणग्रन्थे अर्थजातमुक्तं तत्रापेक्षितांश इहानुसन्धेयः । व्याप्यत्वे सति सर्वात्मना स्वार्थे धारयितुं शक्यं शरीरमिति शरीरलक्षणं व्याप्तत्वे त्वे सति यावद्द्रव्यभावितया स्वार्थे धारयितुं शक्त आत्मेति शरीरिलक्षणं स्वार्थेशक्यपदाभ्यामुत्पतनादिव्यापाराणां रुग्णदेहनियमनस्य चाभावादसम्भवाव्याप्तिशङ्कापरिहारः घटपटादिव्यावृत्त्यर्थं व्याप्यत्वे सतीत्युक्तं, परकायप्रविष्टं प्रति परकायस्य देहत्वव्यावृत्त्यर्थं सर्वात्मनेति पदम् आत्मनोधर्म्मभूतज्ञानं रत्नदीपादेः प्रभा च शरीरं स्यादिति तद्व्यावृत्त्यर्थं च व्याप्यत्वे सतीत्युक्तम्, अत एव शरीरलक्षणेऽपि व्यावर्त्यं स्पष्टतरम् ।

सिद्धं प्रकारभूतमित्याकारः शरीरमिति चोच्यते, एवमेव हि जीवात्मनः स्वशरीरसंबन्धः, एवमेव परमात्मनः सर्वशरीरत्वेन सर्वशब्दवाच्यत्वं, तदाऽऽह श्रुतिगणः— सर्वे वेदा यत्पदमामनन्ति, सर्वे वेदा यत्रैकं भवन्तीति,

एवमन्यदप्यनुसन्धेयं शेषशेषिभावस्य शरीरशरीरिलक्षणत्वे तु स्वार्थे शक्यमिति पदानपेक्षैव । उक्तलक्षणस्य व्याप्तिं दर्शयति एवमेव हीति, उक्तं शरीरात्मलक्षणं जगद्ब्रह्मणोरस्तीति तद्वाचिशब्दानां ब्रह्मपर्यन्तत्वं मुख्यमित्याह एवमिति, एवं न्यायेन सर्वशब्दवाच्यत्वमुपपन्नमित्युक्तम् । तत्र प्रमाणमाह तदाहेति, सर्वे वेदा इति, पदं पद्यत इति व्युत्पत्त्या प्राप्यमित्यर्थः । यत्रैकं भवन्तीति एतद्व्याचष्टे तस्येति, अर्थैकत्वादेकं वाक्यमिति न्यायेन ब्रह्मण एकस्यैव प्रधानतया वाच्यत्वात्सर्वे वेदा एकवाक्यं भवन्तीत्यर्थः । सर्वशब्दवाच्यत्वे हेतुप्रतिपादिकां श्रुतिमाह एको देव इति, सर्वशरीरतया सर्वप्रकारत्वाद्धि सर्वशब्दवाच्यत्वं सहैवेत्यादिवाक्यस्य देव–शब्दं व्याचष्टे देवा इति, उदाहृतवाक्यद्वयस्यार्थमाह देवेति, स्मृतिवचनं दर्शयति तथा चेति, वचसां प्रतिष्ठेत्युक्ते शब्दगुणाश्रयाकाशशङ्का स्यादिति तद्व्यावृत्त्यर्थं व्याचष्टे वाच्ये हीति, प्रतिष्ठा–पर्यवसानम् । उक्तार्थवैशद्यार्थमाह कार्याणामिति, वचसां वाच्यत्वे

हेतुः कार्याणां कारणत्वं सर्वं खल्विदं ब्रह्म तज्जलानिति हि श्रुतिः, वेदैश्चेत्यादि स्पष्टम् । मनुवचनमाह तथा चेति,

तस्यैकस्य वाच्यत्वादेकार्थवाचिनो भवन्तीत्यर्थः । एको देवो बहुधा संनिविष्टः सहैव सन्तं न विजानन्ति देवा इत्यादि, देवाः—इन्द्रियाणि, देवमनुष्यादीनामन्तर्यामितयाऽऽत्मत्वेन निविश्य सहैव सन्तं तेषामिन्द्रियाणि मनःपर्यन्तानि न विजानन्तीत्यर्थः । तथा च पौराणिकानि वचांसि—नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती । वाच्ये हि वचसः प्रतिष्ठा, कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम्, वेदैश्च सर्वैरहमेव वेद्य इत्यादीनि सर्वाणि हि वचांसि सशरीरात्मविशिष्टमन्तर्यामिणमेवाचक्षते, हन्ताहं तिस्रो देवताः अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति हि श्रुतिः, तथा च मानवं वचः—प्रशासितारं

प्रशासितारमित्यादि वाक्येन सर्वशब्दवाच्यत्वे हेतुरुच्यते इमं श्लोकं व्याचष्टे अन्तरिति,अन्तः प्रविष्टः शास्ता जनानामिति हि श्रुत्यनुसारेणान्तः प्रविश्येत्युक्तम्, अन्तःप्रविश्य शा*स्तारमित्यन्वयः कुतः अन्तर्यामित्वं योऽन्तरो यमयतीत्यन्तर्यामिब्राह्मणप्रतिपादितत्वादित्यर्थः अन्तः प्रविश्य प्रशासितृत्वे हेतुरणीयांसमणीयसामिति । षष्ठ्यन्तं व्याख्येयपदं व्याख्यानसौकर्यार्थं प्रथमान्तत्वेनोपादत्ते अणीयांस इति, रुक्माभमिति व्याख्येयपदं तद्व्याचष्टे आदित्यवर्णम् इति, यदा पश्यः पश्यते रुक्मवर्णम् आदित्यवर्णं तमसः परस्तात् इति वाक्ययोर्दुराधर्षत्वभोग्यत्वाभिप्रायेणादित्यवर्णत्वं रुक्मवर्णत्वं चोक्तमित्यभिप्रायेणादित्य-

* नियन्तारमित्यन्वय इति पा० ।

वर्ण इति व्याचष्टे तथा य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते इति तत्र हिरण्मयशब्द औज्ज्वल्यपरत्वेन व्याख्यातो वाक्यकारेण हिरण्मय इति रूपसामान्याच्चन्द्रमण्डलमुखवदिति नीलतोयदमध्यस्था इत्यादिश्रुत्यनुसारेण हिरण्मयशब्द एवं व्याख्यातः ।

सर्वेषामणीयांसमणीयसाम् । रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम् ॥ अन्तः प्रविश्य—अन्तर्यामितया सर्वेषां प्रशासितारं—नियन्तारम् अणीयांस आत्मानः कृत्स्नस्याचेतनस्य

नीलतोयदसाम्यमुपासनविशेषोपास्यस्य भगवत उपासनान्तरोपास्यस्य स्वरूपं हिरण्यवर्णमिति हिरण्मयशब्दोनौज्ज्वल्यपर इति चेन्न हृदयगुहायामेव नीलतोयदसाम्यहिरण्ययत्वश्रवणात् पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखमिति प्रकृत्य नीलतोयदमध्यस्थेति श्रूयते स य एषोऽन्तर्हृदय आकाशस्तस्मिन्नयं पुरुषो मनोमयः अमृतो हिरण्मय इति हृदयगुहायामेव हिरण्मयत्वं च श्रूयते तस्मान्नीलतोयदसादृश्यश्रुत्याऽनुगुण्याद्धिरण्मयशब्द औज्ज्वल्यपरत्वेन व्याख्यातो वाक्यकारेण । एवं वर्णयन्ति केचिदाचार्याः—आदित्यवर्णं रुक्मवर्णमिति वर्णशब्दस्वारस्यान्न केवलं हिरण्मयशब्दऔज्ज्वल्यमात्रपरः, अपि तु वर्णपरः एव तर्हि नीलतोयदसाम्यश्रुत्यविरोधः कथमिति चेत् उच्यते नीलतोयदवर्णस्यैव हेतुविशेषेण स्वर्णवर्णत्वमुपपद्यते, तथा सति भगवद्विग्रहो बालातपानुलिप्तमरकतगिरिनिभो विभाति तथा च श्रीरामायणे क्वचिच्च तद्धेमसमानवर्णं तस्याननं पद्मसमानगन्धीति, नीलतोयदवर्णस्यैव भगवतो हिरण्यवर्णत्वे हेतुः संप्रदायैकाधिगम्य इति नात्र *लिख्यते । स्वप्नधीगम्यमित्येतद्व्याचष्टे स्वप्नेति, एवं प्रशासितारमित्यादिश्लोकेन सर्व-शब्दवाच्यत्वे हेतुरुक्तः। अथ सर्वशब्दवाच्यत्वपरं श्लोकमाह एनमिति, एकशब्देन वादिप्रतिपत्तिशङ्का माभूदिति तं व्याचष्टे एक इति, वेदा—वेदभागा इत्यर्थः । उक्तरीत्या—पूर्व-

* रहस्यार्थानां परमभागवतेष्वेवाविष्करणीयतया सर्वजनसाधारण्येन तादृशार्थोपदेशः सर्वथोपदेष्टुरनर्थायैव यथाऽऽह भगवान् स्वयं गीतासु—इदं ते नातपस्काय नाभक्ताय कदाचन । न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयतीति ।

श्लोकोक्तरीत्या सर्वप्रशासितृत्वेन सर्वान्तरात्मतया प्रविश्यावस्थितत्वादिति सर्वान्तरात्मत्वं नाम सर्वस्यानुप्रविश्य प्रशासितृत्वमित्यर्थः ।

व्यापकतया सूक्ष्मभूतास्तेतेषामपि व्यापकत्वात्तेभ्योऽपि सूक्ष्मतर इत्यर्थः । रुक्माभः—आदित्यवर्णः, स्वप्नधीगम्यः—स्वप्नकल्पबुद्धिप्राप्यः, विशदतमप्रत्यक्षतापन्नानुध्यानैकलभ्य इत्यर्थः । एनमेके वदन्त्यग्निं मरुतोऽन्ये प्रजापतिम् ।

अपरे ब्रह्म शाश्वतमिति दृष्टान्ततयोक्तमित्यभिप्रायेणाह शाश्वतब्रह्मशब्दवदिति यथाऽद्वारकब्रह्मशब्दादयस्तस्यैव निरतिशयबृहत्त्वादिगुणविशिष्टस्य वाचकास्तथा सद्वारकशब्दा अप्यग्न्यादिमुखेन ब्रह्मण एव वाचका इत्यर्थः । दत्तवचनमाह तथा चेति, तद्व्याचष्टे पितृदेवेति, पितृदेवादिशब्दवाच्यकर्म्मकं यजनं विष्णुकर्म्मकमित्युक्ते पितृदेवादिशब्दानां विष्णुवाचित्वमर्थसिद्धं, तत्र कोहेतुरिति चेत् सर्वभूतान्तरात्मानमित्युच्यते पितृदेवादिशरीरकत्वेन तदन्तरात्मत्वात्तत्तच्छब्दाः परमात्मपर्यन्ता इत्यर्थः एवं सिद्धवस्तुपराणां भेदाभेदघटश्रुतीनामर्थ उपपादितः । तथाऽप्युपायपरवाक्यनिवर्त्यपरवाक्यपर्यालोचनया ब्रह्मव्यतिरिक्तस्य मिथ्यात्वं प्रतीयते ब्रह्मविदाप्नोति परं ब्रह्म वेद ब्रह्मैव भवति इत्यादिषु ज्ञानस्योपायत्वमुच्यते ज्ञाननिवर्त्यं च मिथ्या रज्जुसर्पादिवन्निवर्त्यं चाज्ञानकृतं, विभेदजनके ज्ञाने नाशमात्यन्तिकं गते । चतुर्विधोऽपि भेदोऽयं मिथ्याज्ञाननिबन्धनः ॥ भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेदित्यादिभिः ।

इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतमिति ॥ एके—वेदा इत्यर्थः । उक्तरीत्या परस्यैव ब्रह्मणः सर्वस्य प्रशासितृत्वेन सर्वान्तरात्मतया प्रविश्यावस्थितत्वात् अग्न्यादयश्शब्दा अपि शाश्वत—ब्रह्मशब्दवत् तस्यैव वाचका भवन्तीत्यर्थः । तथा च स्मृत्यन्तरं—ये

यजन्ति पितॄन् देवान् ब्राह्मणान् सहुताशनान्*। सर्वभूतान्तरात्मानं विष्णुमेव यजन्ति ते ॥ इति, पितृदेवब्राह्मणहुताशनादिशब्दास्तन्मुखेन तदन्तरात्मभूतस्य विष्णोरेव वाचका इत्युक्तं भवति ।

एवं निवर्तकनिवर्त्यपरवाक्यैर्ब्रह्मव्यतिरिक्तस्य मिथ्यात्वात्तदनुगुणं श्रुत्यन्तराणामप्यर्थो वर्णनीय इत्यत्राह अत्रेदं सर्वशास्त्रहृदयमिति, जीवाद्वैतनिर्वाहार्थश्चायमारम्भः—सर्व-शब्देनोपायपरवाक्यानां निवर्त्यपरवाक्यानां च कार्त्स्न्येन पर्यालोचनं भेदश्रुति-भेदनिषेधश्रुतिपर्य्यालोचनं च विवक्षितं, न हि कतिपयवाक्यैरर्थनिष्कर्षः सुकरः । तस्मादुपायपरवाक्येषूपासननिदिध्यासनादिशब्दैरुपायं वदन्ति वाक्यानि, निवर्त्यपरेषु चाविद्या कर्म्मसंज्ञान्येत्यादिवाक्यानि च निरूपणीयानि भेदश्रुतयोऽपि निरूपणीयाः तदविरोधेनार्थस्य वाच्यत्वात् । न च निषेधार्थं भेदानुवाद इति वाच्यम् ईश्वरेशितव्यादिभेदानां प्रमाणान्तराप्राप्तत्वेनानुवादासम्भवात् तन्निषेधेऽभेदविधानस्याप्रामाण्यं स्यात् प्रमाणान्तराप्राप्तोऽपि भेदः फलविशेषार्थं गरुडभावनादिवदारोप्यत इति चेत् असतो भेदस्यारोपणमिति कथमवगतम् अभेदश्रुतिविरोधादिति चेत् भेदश्रुतिविरोधादभेदश्रुतिः फलविशेषार्थम् अभेदारोपणपरा स्यात् गरुडाभेदो ह्यारोप्यते भेद एव हि तत्र परमार्थः तत्त्वज्ञानस्यैव मोक्षोपायत्वान्मुमुक्षून्प्रत्यतत्त्वारोपणं न सम्भवतीति चेत् तद्भेदश्रुतेरपि समानम् । किं च प्रमाणान्तराप्राप्तभेदभ्रमं जनयित्वा तन्निषेधे प्रयोजनाभावात् शास्त्रस्य प्रयोजनपर्यवसायित्वं न स्यात्, न हि शास्त्रस्य प्रयोजनपर्यवसायित्वनियमः अभिचारादिप्रतिपादनादिति चेन्न तत्रापि तदर्थिनं प्रति प्रयोजनवत्त्वमस्त्येव, अभिचारस्तु देवब्राह्मणविद्विष्टप्रभृतिषु पापकर्म्मपरेषु नरेषु क्रियमाणः पुण्याय भवति, अभिचारादिकर्म्माराध्यत्वतदपेक्षितफलप्रदत्वरूपमीश्वरस्य वैभवं च ज्ञातव्यं यज्ञादीनामपि विद्याङ्गत्वस्य तत्तदाराध्यत्वफलप्रदत्वरूपवैभवस्य च ज्ञातव्यत्वेन सर्वाः श्रुतयः प्रयोजनपर्यवसायिन्यः, तस्मात्प्रयोजनपर्यवसायित्वमवश्यम्भावि तत्तु प्र-

यत्फलं तत्फलं प्रकृतिधर्म्मत्वाभावे दृष्टमित्यभिप्रायेण प्रकृतेरेव धर्म्मा इति निर्द्दश इत्यर्थः । प्रकृतिसम्बन्धे सति दुःखादिसद्भावः प्रकृतिविरहे दुःखादिनिवृत्तिश्चेति दुःखादीनां प्रकृतिधर्म्मत्वे यत्फलं तदिदानीं दृष्टमित्यभिप्रायेण प्रकृतेरेव धर्म्मा इति वचनभङ्गीति यावत् । देवादिभेदस्यौपाधिकत्वादुपाधिवियुक्तस्वरूपसाम्ये प्रमाणमाह विद्येति, ब्राह्मणादेरुत्कर्षे इतरेषामपकर्षे च शास्त्रसिद्धेऽपि समदर्शित्वमपाण्डित्यमेवेति शङ्कायां पण्डित-शब्दं व्याचष्टे देवेति, ।

निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः । दुःखाज्ञानमला धर्म्माः प्रकृतेस्ते न चात्मनः ॥ प्रकृतिसंसर्गकृतकर्म्ममूलत्वान्नात्मस्वरूपप्रयुक्ता धर्म्मा इत्यर्थः । प्राप्ताप्राप्तविवेकेन प्रकृतेरेव धर्म्मा इत्युक्तं, विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डितास्समदर्शिनः ॥ इति, देवतिर्यङ्मनुष्यस्थावररूपप्रकृतिसंसृष्टस्यात्मनः

उत्कर्षापकर्षशास्त्रमुपाधिसंसृष्टविषयं तद्वियुक्तस्वरूपस्य साम्यमेवेत्यर्थः । पण्डित-शब्दार्थमनुवदन् वाक्यार्थं योजयति तत्तदिति, विद्याविनयसम्पन्नेति श्लोकेन तत्तद्वैषम्यं विद्यमानमपि नात्मस्वरूपस्पर्शीति दर्शयितुं ब्राह्मणत्वादिविशिष्टे समदर्शित्वमुक्तं साम्यमुपाधिवियुक्तस्वरूपविषयमिति स्पष्टयितुमाह तदिदमाहेति, । दोषशब्दस्याभक्ष्यभक्षणादिमात्रविषयत्वशङ्काव्युदासाय निर्दोष-शब्दं व्याचष्टे निर्दोषमिति, वाक्यार्थमाह स्वरूपेणेति, उक्तक्रमेणोपपाद्यत्वेन प्राप्तस्य भगवदात्मकत्वस्य प्रागेवोपपादितत्वमाह तस्यैवमित्यादिना, प्रपत्तिमन्तरेण मोक्षासिद्धौ प्रमाणमाह दैवीति, गुणमयीत्यनेन माया-शब्दः प्रकृतिवाचीति गम्यते तद्व्याचष्टे तस्येति, तस्यैतस्य स्वतः शुद्धस्यापि उपाधितोमलिनस्येति भावः । श्रुतिमाह-

स्वरूपविवेचनी बुद्धिर्येषां ते पण्डिताः, तत्तत्प्रकृतिविशेषवियु*क्तात्मयाथात्म्यज्ञानवन्तस्तत्रतत्रात्यन्तविषमाकारे वर्तमानमात्मानं समानाकारं पश्यन्तीति समदर्शिन इत्युक्तं, तदिदमाह—इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः । निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥ इति, निर्दोषं—देवादिप्रकृतिविशेषसंसर्गरूपदोषरहितं, स्वरूपेणावस्थितं सर्वम्—आत्मवस्तु निर्वाणरूपज्ञानैकाकारतया सममित्यर्थः । तस्यैवं—भूतस्यात्मनो भगवच्छेषतैकरसता तन्नियाम्यता

नान्य इतीत्यादिभिः श्रुतिभिश्च भगवत्प्रपत्तिमन्तरेण नोपपद्यत इत्युक्तं भवतीत्यन्वयः । कथं तमेव विद्वानमृत इत्यादिवाक्यानां प्रपत्तिमन्तरेण मोक्षानुपपत्तिपरत्वमुच्यते तमेवं विद्वानित्यादिवाक्यानामुपासनविधिपरत्वादुपासनस्य च स्वनिष्पत्त्यर्थं प्रपत्तिसापेक्षत्वाच्चोक्तार्थः फलितः, वाक्यार्थज्ञानमात्रस्योपायताव्यावृत्तिरेवाभिप्रेता । यद्वा विद्वानिति वेदनवाचिशब्द उपासन—प्रपदनसाधारण इति भावः । पूर्वोक्तस्य भगवदेकनियाम्यत्व—तदेकधार्यत्वादेः प्रमाणं च वदन् न च मत्स्थानि भूतानीत्यत्र सर्वात्मकत्वं मिथ्येत्युच्यत इति शङ्कान्तरं च परिहरति मयेति, तद्व्याचष्टे स्वैश्वर्येति, मया ततमित्यादिना व्याप्तिरुक्ता व्याप्तिश्च धारकत्वेनेत्युक्तं, मत्स्थानीति भगवतस्तदायत्तस्थितित्वं व्यावर्तितं न चाहं तेष्ववस्थित इति एवं स्वायत्तस्थितित्वविधानान्न तदेव निषिध्यते न च मत्स्थानीति अपि तु लोके धार्यधारकभावो यथा भवति तथात्वं निषिध्यते अनायासेन स्वसङ्कल्पमात्रेण धारकत्वादित्यर्थः । धारकत्वे सत्यपि लोकसिद्धधार्यधारकभाववैलक्षण्यमेवोपपादयति पश्य मे योगमैश्वरमिति, तस्मात्स्वैश्वर्यवैचित्र्यमुक्तमित्यर्थः ।

तदेकाधारता च तत्तच्छरीरतत्तनुप्रभृतिभिः शब्दैस्तत्सामानाधिकरण्येन च श्रुतिस्मृतीतिहासपुराणेषु प्रतिपाद्यत इति पूर्व्वमेवोक्तं, दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ इति, तस्यैतस्यात्मन कर्म्मकृतविचित्रगुणमयप्रकृतिसंसर्गरूपात्संसारान्मोक्षो-

एवं सर्वशक्तियोगात्स्वसङ्कल्पैकदेशेन धारकत्वे स्पष्टं प्रमाणमाह तदाहेति, तद्व्याचष्टे अनन्तेति, अनन्तविचित्रमहाश्चर्यम् अनन्तवैचित्र्याद्विस्मयनीयमित्यर्थः अयुतायुतांशांशेनेत्यनेन यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता इति वचनं स्मारितं, प्रशासनेन सर्वधारणश्रुत्यनुरोधादुक्तं मत्सङ्कल्पेनेति, न त्वेकांशेनेति अंशमा शब्दव्याख्यानम् अंश-शब्दः स्वरूपैकदेशपरः निरंशे प्रतिपदानार्थं पूर्णवर्त्तिन्यपि स्वरूपेऽश-शब्दव्यवहार एकस्मिन्नेव वस्तुनि स्वरूपस्य पूर्णवर्तितयाऽन्यत्र वृत्त्ययोग्यत्वशङ्काव्युदासार्थः एकांशेनेत्यनेन फलितमर्थमाह अनेन रूपेणेति, एवं मायावादपक्षानुगुण्यशङ्कावहो न च मत्स्थानीति ग्रन्थो व्याख्यातः । अथ भेदाभेदानुगुण इव यः श्लोकः स व्याख्यायते तदिदमाहेति, तदिदमाश्चर्यरूपत्वम् एकत्वे सति नानात्वमित्येतद्व्याचष्टे प्रशासितृत्वेनेति, एक-शब्दः प्रकार्यैक्यपरः शरीरतया प्रकारत्वोपपादकं प्रशासितृत्वेनेति पदं तत्तद्रूपेण विचित्रप्रकारः तत्तच्छरीरकतया

भगवत्प्रपत्तिमन्तरेण नोपपद्यत इत्युक्तं भवति, नान्यः पन्था अयनाय विद्यत इत्यादिश्रुतिभिश्च, मया ततमिदं सर्वं जगदव्यक्तमूर्तिना । मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ न च मत्स्थानि भूतानि पश्य मे योगमैश्वरमिति सर्वशक्तियोगात्स्वैश्वर्यवैचित्र्यमुक्तं तदाह विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो

जगत् इति, अनन्तविचित्रमहाश्चर्यरूपं जगन्ममायुतायुतांशांशेनात्मतया प्रविश्य सर्वं मत्सङ्कल्पेन विष्टभ्यानेन रूपेणानन्तमहाविभूतिरपरिमितोदारगुणसागरो निरतिशयाश्चर्यभूतः—स्थितोऽहमित्यर्थः—तदिदमाह एकत्वे सति नानात्वं नानात्वे सति चैकता । अचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हति ॥ इति, ॥

विचित्रप्रकारः विचित्रकर्म्म कारयन्निति अनेन तदधीनप्रवृत्तित्वमुक्तं, तच्च तन्नियाम्यत्वमिति शरीरत्वमुपपादितं भवति नानारूपतां भजत इति तत्तच्छरीरकतया विचित्रप्रकारत्वं नानारूपत्वमित्यर्थः । ननु कारणरूपतया एकत्वं कार्यरूपेण नानात्वं च किमिति नोक्तं स्यात् उच्यते तदानीमेकत्वशब्दः कारणावस्थापरः स्यात् भावप्रत्ययान्तत्वात् कारणावस्थत्वं ह्यविभक्तनामरूपत्वं, तच्च विभक्तनामरूपतादशायां विरोधादेव नास्ति तस्मादेकत्वे सति नानात्वाभिधानमयुक्तमित्यभिप्रायेणैवं व्याख्यातं नानात्वे सति चैकतेत्येतद्व्याचष्टे एवमिति, अवस्थितोऽपि सन्नित्यन्तेन नानात्वे सत्येतद्व्याख्यातं लीलाविभूतिविशिष्टवैचित्र्यानुभाषणपरो नानात्व-शब्दः सप्तम्यन्त इत्यर्थः । एकतापदं व्याचष्टे अनवधिकेति,

प्रशासितृत्वेनैक एव सन् विचित्रचिदचिद्वस्तुष्वन्तरात्मतया प्रविश्य तत्तद्रूपेण विचित्रप्रकारो विचित्रकर्म्म कारयन्नानारूपतां भजते एवं स्वल्पाऽल्पांशेन तु सर्वाश्चर्यमयं नानारूपं जगत्तदन्तरात्मतया प्रविश्य-विष्टभ्य नानात्वेनावस्थितोऽपि सन् अनवधिकातिशयासंख्येयकल्याणगुणगणः सर्वेश्वरेश्वरः परब्रह्मभूतः ।

नित्यविभूतिमत्तया समाभ्यधिकराहित्यमेकता-शब्दार्थः, अनवधिके-

त्यादिना तदुपयोगिविशेषणान्युच्यन्ते तत्र विभूतिद्वयनियमनधारणाद्य-नुगुणगणकत्वमनवधिकेत्यादिनोक्तम् ईश्वरातिरिक्तब्रह्मव्यावृत्त्यर्थं सर्वेश्वरेश्वरः परब्रह्मभूत इत्युक्तं, पुरुषोत्तम–नारायण–शब्दाभ्यां श्रीपुरुषसूक्तं नारायणानुवाकश्च उक्तार्थे प्रमाणत्वेन*स्मारितौ । एवंविधत्वान्निरतिशयाश्चर्यभूतः विग्रहद्वाराऽप्याश्चर्यत्वविवक्षया नीलतोयदेत्याद्युक्तं तस्य यथा कप्यासमिति श्रुतिस्तु विग्रहवैलक्षण्ये प्रमाणत्वेन स्मारिता पुण्डरीकेति पदं पद्मपत्रोपमेक्षणं त्वत्तः कमलपत्राक्षेत्यादिवचनात् पद्मदलेन साम्यं विवक्षितमिति दर्शयितुं दल–शब्दः एवमक्षिणी इत्युक्ते पङ्कजत्वादिदोषा अक्षिणि माभूवन्नित्यभिप्रायेणामल–शब्दः पङ्कजादधिकगुणनिवृत्तिशङ्काव्यावृत्त्यर्थमायत–शब्दः, नित्यविभूतियोगोऽपि समाभ्यधिकराहित्यहेतुरित्यभिप्रायेण परमव्योम्नीत्याद्युक्तं, वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वमेष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण इति श्रुत्यनुरोधेनैवं व्याख्यातं, तत्र ह्येष सर्वभूतान्तरात्मा तेनेदं पूर्णमिति लीलाविभूतिविशिष्टत्वं दिवि तिष्ठत्येकः दिव्यो देव एक इति द्यु–शब्दादिवाच्यनित्यविभूतिसम्बन्धित्वेनैकत्वं चावगम्यते

पुरुषोत्तमो नारायणो निरतिशयाश्चर्यभूतो नीलतोयदसंकाशः पुण्डरीकदलामलायतेक्षणः सहस्रांशुः सहस्रकिरणः परमे व्योम्नि यो वेद निहितं गुहायां परमे व्योमँस्तदक्षरे परमे व्योमन्नित्यादिश्रुतिसिद्ध एक एवावतिष्ठते ब्रह्मव्यतिरिक्तस्य

अन्यथा नानात्वे सति चैकतेत्यस्य प्रथमपादोक्तनानात्वैकत्वमात्रपरत्वे पौनरुक्त्यं स्यात् प्रयोजनाभावात्सकृदुक्त्याऽपि हि अचि-

* अत्र पुरुषसूक्त–शब्दस्य नपुंसकतयाऽनुवाक–शब्दस्य च पुँल्लिङ्गतया नपुंसकमनपुंसकेनेति पाणिनीयानुशासनेन नपुंसकानपुंसकयोर्नपुंसकैकशेषतायाः समुचितत्वेन स्मारिते इत्येव युक्तः पाठः । यथाश्रुतनिवर्हणादीक्षास्तु सूक्तशब्दस्योभयलिङ्गत्वमुपकल्प्य समाधातुमुद्यच्छन्ते । तदेदुत्तानमतितामात्रमिति कृतधियस्तस्माद् गौडद्राविडयावत्पुस्तकोपलब्धःस्मारितौ–इत्यपपाठ इति तु वयम् ।

न्यत्वं सिद्ध्यति । अथाचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हतीत्येतद्व्याचष्टे ब्रह्मेत्यादिना, एकस्वभावस्य न ह्येकौष्ण्यस्वभावोऽग्निः शैत्यस्वभावो भवति एककार्यशक्तियुक्तस्य न हि दहनशक्तोऽग्निः जाड्यक्ले*दनशक्तः एकरूपस्य एकाकारस्य न ह्यूर्द्ध्वज्वलनवतो रूपवतोऽग्नेर्गन्धादिमत्त्वं तिर्यग्गमनादिकं† वेत्यभिप्रायः सर्ववस्तुविसजातीयतयेति विसजातीयधर्म्मिणो विसजातीयधर्म्मयोग उपपद्यते इत्यर्थः । विचित्रेति, विविधा‡मित्यर्थः । पुनरपीति, अनन्त-शब्दोऽसंख्येयवाची अपरिमिताश्चर्य-शब्देनात्यन्ताश्चर्यत्वं विवक्षितम् । अनन्तापरिमिताश्चर्ययोगेनैकरूपता चेति असंख्येयात्यन्ताश्चर्यभूतपदार्थयोगेन समाभ्यधिकराहित्यमित्यर्थः, अनन्ता§श्चर्यभूतपदार्थयोगो नाम दिव्यायुधभूषणादियोगः, वस्तुमात्रसाम्यादिति वस्तुत्वाच्चेतनोऽप्यचित् स्यादित्यादिवदयुक्तमिति भावः । अस्य वचनस्य ब्रह्मणो भिन्नाभिन्नत्वज्ञापनपरत्वमप्ययुक्तमचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हतीत्युक्तत्वात्, न हि मृद्घटादिष्वपि दृष्टत्वेन पराभिमतस्य

कस्यचिदपि वस्तुन एकस्वभावस्यैककार्यशक्तियुक्तस्यैकरूपस्य रूपान्तरयोगः, स्वभावान्तरयोगः, शक्त्यन्तरयोगश्च न घटते, तस्यैतस्य परब्रह्मणस्सर्ववस्तुविसजातीयतया सर्वस्वभावत्वं सर्वशक्तियोगश्चेत्येकस्यैव विचित्रानन्तनानारूपता च पुनरप्यनन्तापरिमिताश्चर्ययोगेनैकरूपता च न विरुद्धेति वस्तुमात्रसाम्याद्विरोधचिन्ता न युक्तेत्यर्थः ।

भिन्नाभिन्नत्वस्याचिन्त्यत्वं घटादावपि तस्य तर्काबाध्यत्वमुच्यत इति चेन्न ब्रह्मणो रूपमित्युक्तेः । एवं यथा कथञ्चित्सामान्यमात्रेण विजातीयधर्म्मिणो विजातीयधर्म्मासम्भवापादनस्यायुक्तत्वे प्रमाणमाह यथोक्त-

* जाड्यजननशक्त इति पा· ।

† तिर्यक्पवनादिकमिति पा·

‡ विस्मयनीयमित्यर्थः । इति पा·

§ अत्यन्ताश्चर्यभूतेति पा· ।

मिति, पावकस्य सर्गादिशक्तिर्नास्ति तस्माद् दृष्टान्तदार्ष्टान्तिकयोर्विवक्षितांशः क इत्यपेक्षायां तद्व्याचष्टे एतदुक्तं भवतीति, नानुमातुं युक्तमित्येतदुक्तं भवतीत्यन्वयः । सर्गाद्या भावशक्तय इति, भावः—पदार्थः सर्गादिगोचराः पदार्थशक्तयो ब्रह्मणः सम्भवन्तीत्यन्वयः एतत्प्रतिपादनपरं वाक्यमिति वक्तव्ये प्रतिपादनतत्परमितिवत्पदार्थशक्तय इति निर्देशः । फलितार्थमाह अतो विचित्रेति, ब्रह्मणः सकलेतरविसजातीयत्वादाश्चर्यशक्तियोगे प्रमाणमाह तदाहेति,

यथोक्तं—शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः । यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥ भवन्ति तपतां श्रेष्ठ ! पावकस्य यथोष्णता । एतदुक्तं भवति सर्वेषामग्निजलादीनां भावानामेकस्मिन्नपि भावे दृष्टैव शक्तिस्तद्विसजातीयभावान्तरेऽपीति न चिन्तयितुं युक्ता जलादावदृष्टाऽपि तद्विसजातीयपावके भास्व*रत्वोष्णतादिशक्तिर्यथा दृश्यते, एवमेव सर्ववस्तुविसजातीये ब्रह्मणि सर्वसाम्यं नानुमातुं युक्तमिति, अतो विचित्रानन्तशक्तियुक्तं ब्रह्मैवेत्यर्थः । तदाऽऽह—जगदेतन्महाश्चर्यं रूपं यस्य महात्मनः । तेनाश्चर्य्यवरेणाहं भवता कृष्ण ? सङ्गतः ॥ इति,

अक्रूरवचनमिदं जगदेतदित्यादि, स्वविरचितग्रन्थस्यापातप्रतीतार्थमात्रमेव न केवलं विवक्षितम् अपि त्वतिगम्भीरत्वादर्थगौरवमस्तीत्यभिप्रायेणाह तदेतदिति, तदेतदभेदभेदघटकश्रुत्यादिविषयमुक्तमर्थजातमित्यर्थः, अधीयमानानामेव श्रुतीनां नानाविधत्वं दृश्यते अर्थवैविध्यान्नानाविधत्वम् अनन्त—शब्देनानधीयमाना इतिहासपुराणोपबृंहिताः शाखाभेदा

* भासकत्वोष्णत्वादीति पा० ।

विवक्षिताः सोपबृंहणश्रुतिनिकरेषु तद्व्याख्यानेषु च परिश्रमादवधारितमित्यर्थः । श्रुतीनां नानाविधत्वं कथं तासां त्वदुक्तार्थपरत्वं वा कथमित्यत्राह तथा हीति, तत्र प्रथमं सृष्टिप्रलयश्रुतिवैविध्यमाह प्रमाणेति, अनेकतत्त्वानि महदादीनि तानि चापरिमितपरिणामानि प्रकृतेर्महान्महतोऽहङ्कार इति पारम्पर्यनियतः क्रमः, अनेकतत्त्वानि नियतक्रमाश्च प्रमाणान्तराविषयाः तैर्विशिष्टौ सृष्टिप्रलयावित्यर्थः । अनेकविधाश्श्रुतय इति क्वचित्तेजोऽबन्नमात्रसृष्टिः, क्वचित्पञ्चभूतमात्रसृष्टिः, क्वचिन्महदादिसृष्टिश्चेति सृष्टिवैविध्यं श्रूयते

तदेतन्नानाविधानन्तश्रुतिनिकरशिष्टपरिगृहीततद्व्याख्यानपरिश्रमादवधारितं, तथा हि प्रमाणान्तरापरिदृष्टापरिमितपरिणामानेकतत्त्वनियतक्रमविशिष्टौ सृष्टिप्रलयौ ब्रह्मणोऽनेकविधाः श्रुतयो वदन्ति निरवद्यं निरञ्जनं विज्ञानमानन्दं निर्विकारं निष्कलं निष्क्रियं शान्तं निर्गुणमित्यादिकाः, निर्गुणं ज्ञानस्वरूपं ब्रह्मेति काश्चन श्रुतयोऽभिदधति । नेह नानाऽस्ति किञ्चन मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति

तत्र सृष्टिप्रलयपरकृत्स्नवाक्यपर्यालोचनया हि सृष्टिप्रलयक्रमनिष्कर्षः क्रियते, एवमर्थान्तरेष्वपि कृत्स्नवाक्यपर्यालोचनयैवार्थो निर्णेतव्य इति भावः । सृष्टिप्रलयपरवाक्यानां मुहुरुदाहृतत्वात्तान्यत्रानुक्त्वा तदर्थमात्रमुक्तम् । अथ निर्गुणश्रुतीराह निरवद्यमिति, भेद*निषेधिनीः श्रुतीराह नेहेति, सगुणश्रुतीराह यः सर्वज्ञ इति, ऐक्यश्रुतीराह सर्वं खल्विति, भेदश्रुतीराह पृथगिति, शरीरात्मभावपरश्रुतीराह अन्तःप्रविष्ट इति, एवं नानाविधत्वं दर्शितम्, आसां श्रुतीनां स्वोक्तार्थपरत्वमेवोपपन्नमिति वक्ष्यन्नाह इतीति, अविरोधो मुख्यार्थापरित्यागश्च यथा सम्भवतीति, परपक्षेष्वन्योन्यविरोधो

* भेदनिषेधश्रुतीरिति पा० ।

मुख्यार्थपरित्यागश्च भवतः, सगुणभेदश्रुतीनां बाध्यत्वाभ्युपगमाद्विरोधः सम्प्रतिपन्नः ऐक्यश्रुतिष्वपि तत्त्वमादिपदानां लक्षणाश्रयणादमुख्यत्वम्, एवं भेदाभेदपक्षेऽपि निर्दोषत्वाविकारत्वादिपरश्रुतिविरोधः, तत्त्वमादिपदेष्वपि निर्दोषत्वसदोषत्वादिव्याघातादन्यतरपदामुख्यत्वप्रसङ्ग इति भावः, । तस्मादविरोधेन मुख्यत्वेन च वर्णनीयं–वर्णयितुं युक्तमित्यर्थः । कः पुनरविरुद्धो मुख्यश्चार्थ इत्यत्राह–

यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् तत्केन कं विजानीयादित्यादिका नानात्वनिषेधवादिन्यस्सन्ति काश्चन श्रुतयः, यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः, सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते, सर्वे निमेषा जज्ञिरे, विद्युतः पुरुषादधि, अपहतपाप्मा विजरो विमृत्युर्विशोको विजघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्प इति सर्वस्मिन् जगति हेयतयाऽवगतं सर्वगुणं प्रतिषिध्य निरतिशयकल्याणगुणानन्त्यं सर्वज्ञतां सर्वशक्तियोगं सर्वनामरूपव्याकरणं सर्वस्याधारतां च काश्चन श्रुतयो ब्रुवन्ति,

वर्णितं चेति, नास्माभिः स्वबुद्ध्याऽर्थस्थितिरुत्प्रेक्ष्यते पूर्वाचार्यैरेवोपदिष्टोऽयं ग्रन्थनिबन्धश्चार्थ उच्यत इति भावः । तत्र सर्वश्रुतीनां परस्परा*बाधं मुख्यार्थत्वं च दर्शयन् अविकारश्रुतिमुख्यार्थत्वं दर्शयति अविकारेति, निर्गुणश्रुतिमुख्यार्थत्वमाह निर्गुणेति, व्यवस्थिताः–विशेषेणावस्थिताः, भेदनिषेधवाक्यं च प्रकारिनानात्वानभ्युपगमात् मुख्यार्थमित्याह नानात्वेति, भेदश्रुतिमुख्यार्थत्वमाह सर्वेति, कल्याणगुणाकरत्व–शब्देनानुक्तसकलगुणास्पदत्वं विवक्षितं ज्ञानानन्दमात्रवादिवाक्यमप्यपृथ-

* परस्पराविरोधमिति पुस्तकान्तरपाठो युक्त इति प्रतिभाति ।

क्तिद्गुधर्म्मवाचिपदानां धर्मिपर्यन्तत्वाद्धर्मिस्वरूपस्य ज्ञानवत्स्वयम्प्रकाशत्वाच्च मुख्यार्थमित्याह ज्ञानानन्देति,

सर्वं खल्विदं ब्रह्म, तज्जलानिति, एतदात्म्यमिदं सर्वम् एकः सन् बहुधा विचार इत्यादिका ब्रह्मसृष्टं जगन्नानाकारं प्रतिपाद्य तदैक्यं च प्रतिपादयन्ति, काश्चन श्रुतयः पृथगात्मनं प्रेरितारं च मत्वा भोक्ता भोग्यं प्रेरितारं च मत्वा प्रजापतिरकामयत प्रजाः सृजेयेति पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं, तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतं सर्वस्य वशी सर्वस्येशान इत्यादिका ब्रह्मणस्सर्वस्मादन्यत्वं सर्वस्येशितव्यत्वमीश्वरत्वं च ब्रह्मणः सर्वस्य शेषतां पतित्वं चेश्वरस्य, काश्चन—अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा एष आत्माऽन्तर्याम्यमृतः यस्य पृथवी शरीरं यस्यापः शरीरं यस्य तेजः शरीरं मित्यादि, यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं यस्य मृत्युः शरीरं यस्यात्मा शरीरमिति ब्रह्मव्यतिरिक्तस्य सर्वस्य वस्तुनो ब्रह्मणश्च शरीरात्मभावं दर्शयन्ति काश्चनेति नानारूपाणां वाक्यानामविरोधो मुख्यार्थापरित्यागश्च यथा सम्भवति तथैव वर्णनीयं, वर्णितं च, अविकारश्रुतयः स्वरूपपरिणाम—

ज्ञानानन्दमात्रवादि वाक्यमित्यन्वयः, सर्वस्मादन्यत्वं-विलक्षणत्वं तदुपपादकं सर्वकल्याणगुणत्वादि नोच्यते एषां विशेषणानामयमभिप्रायः सत्यं ज्ञानमित्यादिश्रुतिरार्थभेदनिषेधपरेति हि पराभ्युपगतिः, तत्रेदं विव-

क्तितं ज्ञानस्य ज्ञानादिगुणाश्रयत्वानुपपत्तिः कथम्, अदर्शनादिति चेत्तर्हि ज्ञानं कस्यचिद्धर्मभूतं दृष्टमिति ब्रह्म कस्यचिद्धर्म्मभूतं स्यात्, श्रुतिबलान्न धर्म्मभूतमिति चेत्तर्हि श्रुतिबलात् ज्ञानाद्याश्रयत्वमपि स्वीकार्यं व्याप्ति-विरुद्धस्यापि श्रुतिप्रतिपन्नस्याङ्गीकारात् । किञ्च व्याप्तिविरोधोऽपि नास्ति धर्म्मभूतज्ञानस्यैव हि ज्ञानाद्यनाश्रयत्वं दृष्टम् ।

परिहारादेव मुख्यार्थाः, निर्गुणवादाश्च प्राकृतहेय-गुणनिषेधपरतया व्यवस्थिताः, नानात्वनिषेधवादाश्च एकस्य ब्रह्मणः शरीरतया प्रकारभूतं सर्वं चेतनाचेतनं वस्त्विति सर्वस्यात्मतया सर्वप्रकारं ब्रह्मैवावस्थित-मिति सुरक्षिताः। सर्वविलक्षणत्व—पतित्वेश्वरत्व—सर्व-कल्याणगुणाकरत्व—सत्यकामत्व—सत्यसङ्कल्पत्वादि-वाक्यं तदभ्युपगमादेव सुरक्षितं । ज्ञानानन्दमात्रवादि च सर्वस्मादन्यस्य सर्वकल्याणगुणाश्रयस्य सर्वेश्वरस्य सर्वशेषिणः सर्वाधारस्य सर्वोत्पत्तिस्थितिप्रलयहेतुभू-तस्य निरवद्यस्य निर्विकारस्य सर्वात्मभूतस्य परस्य ब्रह्मणः स्वरूपनिरूपकधर्म्मो मलप्रत्यनीकानन्दरूप-ज्ञानमेवेति स्वप्रकाशतया स्वरूपमपि ज्ञानमेवेति च प्रतिपादनादनुपालितम् । ऐक्यवादाश्च शरीरात्म-भावेन सामानाधिकरण्यमुख्यार्थतोपपादनादेव सु-स्थिताः ॥

अत्र तु धर्म्मत्वाभावात् ज्ञानाद्याश्रयत्वं युक्तमिति व्याप्तिविरोधः, व्या-प्तिविरोधेऽपि श्रुतिबलाद्धर्मान्तराश्रयत्वसिद्धिरित्यभिप्रेत्य सर्वविलक्षणत्वा-दिगुणाश्च श्रुतिसिद्धा इति प्रतिवन्दीदर्शनार्थमनेकविशेषणोक्तिरिति स्व-रूपनिरूपकधर्म्मवाचिपदस्य धर्म्मिपर्यन्तत्वं तद्गुणसारत्वादिति सूत्रोक्तमिह दर्शितं, स्वरूपेति, ज्ञान-शब्दो धर्म्मभूतज्ञानपरः, मलप्रत्यनीकशब्दो विशे-

षितत्वाद्धर्म्मभूतज्ञानं चिदचिद्भावर्तकं विशेषणभूतचिदचिद्रूपजगदपेक्षया विशेष्यांशस्य व्यावर्तकतया धर्म्मभूतज्ञानस्य स्वरूपनिरूपणधर्म्मत्वम् । ऐक्यश्रुतिमुख्यार्थत्वमाह ऐक्येति, एवं सर्वश्रुत्यनुरोधेन चोदयति एवं चेति, उत्तरमाह सर्वस्येति, कथं सर्वं समर्थितमित्यत्राह सर्वेति, परैरुक्तो-भेदो भेदाभेदौ च भेदश्रुतिविरोधादमुख्यत्वाच्च न प्रामाणिकाः, भेदश्रु-त्यविरुद्धौ भेदाभेदौ अभेदश्चास्मदभिमत इत्यस्माकं भेदपक्ष एवेत्यभि-प्रायः, सर्वस्य वेदवेद्यत्वात्सर्वं समर्थितमिति हि

एवं च सत्यभेदो वा भेदो वा द्व्यात्मकता वा वेदान्तवेद्यः कोऽयमर्थः समर्थितो भवति, सर्वस्य वेदवेद्यत्वात् सर्वं समर्थितं, सर्वशरीरतया सर्वप्रकारं ब्रह्मैवावस्थितमित्यभेदस्समर्थितः, एकमेव ब्रह्म नानाभूतचिदचिद्वस्तुप्रकारं नानात्वेनावस्थितमिति भेदाभेदौ, अचिद्वस्तुनश्चिद्वस्तुनश्चेश्वरस्य च स्वरूप–स्वभाववैलक्षण्यादसङ्कराच्च भेदः समर्थितः ॥

पूर्वमुक्तं तदयुक्तम् ऐक्यज्ञानस्यापवर्गोपायत्वेन परमार्थविषयत्वात्तत्रैव तात्पर्यमिति तदानुगुण्येन श्रुत्यन्तरं नेयमित्यभिप्रायेण चोदयति ननु चेति, परमपुरुषार्थलक्षणमोक्षसाधनमिति, उपासनादयः सगुणप्राप्तिरूपार्वाचीनमोक्षफला इति तद्व्यावृत्तिः परमपुरुषार्थ–शब्देनाभिप्रेता गम्यत इति, तत्त्वमसीत्येतावदेवात्र श्रूयते ऐक्यज्ञानं मोक्षसाधनमित्ययमर्थो न कण्ठोक्तः अपि तु गम्यत इति भावः । परिहरति नैतदेवमिति, तत इति व्याख्येयपदम् अस्य प्रकृत्यर्थं व्याचष्टे पृथक्त्वज्ञानादिति, प्रत्ययार्थं व्याचष्टे हेतोरिति, तेनेति व्याख्येयपदं तद्व्याचष्टे परमात्मनेति, जुष्टः–जुषी-प्रीतिसेवनयोः अनुगृहीत इत्यर्थः । साक्षाच्छब्देन कण्ठोक्तिर्विवक्षिता अनेनैक्यज्ञानस्य मोक्षसाधनत्वगम्यताव्यावृत्तिः, पुनः शङ्कते ऐक्येति, परिहरति पृथक्त्वेति, पृथक्त्वज्ञानस्य मोक्षोपायत्वश्रुतिविरोधादैक्यज्ञानमपर-

मार्थविषयं स्यादित्यर्थः । अन्यतरस्यापरमार्थविषयत्वमस्तु तत्रैक्यज्ञानस्य परमार्थविषयत्वं किमर्थं नाभ्युपेतं भवतीति शङ्कायामैक्यज्ञान-

ननु च तत्त्वमसि श्वेतकेतो ! तस्य तावदेव चिरमिति ऐक्यज्ञानमेव परमपुरुषार्थलक्षणमोक्षसाधनमिति गम्यते, नैतदेवं पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेतीति आत्मानं प्रेरितारं चान्तर्यामिणं पृथग् मत्वा ततः पृथक्त्वज्ञानाद्धेतोस्तेन परमात्मना जुष्टोऽमृतत्वमेति इति साक्षादमृतत्वप्राप्तिसाधनमात्मनो नियन्तुश्च पृथग्भावज्ञानमेवेत्यवगम्यते ।

स्यापरमार्थविषयत्वं नास्मन्मते अपि त्वन्यतरस्य परमार्थविषयत्वे अन्यस्यापरमार्थविषयत्वं प्रसजेदिति त्वन्मते ऽनिष्टप्रसङ्गः कृत इत्यभिप्रायेणाह एतदुक्तमिति, तुल्यप्रमाणभूतयोर्विरोधे ऽन्यतरस्य बाधे अन्यस्यापि बाधप्रसङ्गाद् द्वयोरप्यविरोधेन विषयो विवेचनीय इत्यर्थः । विषयभेदेनाविरोधं पृच्छति कथमिति, विषयविभागं दर्शयति अन्तर्यामीति, ऐक्यज्ञानस्य मोक्षोपायत्वश्रुतेर्विषयो दर्शितः अन्तर्यामीति, पृथक्त्वज्ञानस्य मोक्षोपायत्वश्रुतेर्विषयोदर्शितः एवमिति, एवमभेदतात्पर्यशङ्का निराकृता । अथ भेदाभेदज्ञानस्य मोक्षोपायतया तत्र तात्पर्यमिति शङ्कां व्युदस्यति भोक्तेति, सद्वारकमद्वारकं चाकारत्रयमस्तीति त्रिविधं ब्रह्मेत्यस्याः श्रुतेरर्थं विवक्षुः द्वारभूतयोश्चिदचितोः स्वभावं दर्शयन्नचित्स्वभावं दर्शयति भोग्येति, अचेतना परार्था च नित्या सततविक्रिया । त्रिगुणा कर्म्मिणां क्षेत्रं प्रकृतेरूपमुच्यते ॥ इत्यस्यार्थोऽत्राभिप्रेतः, जीवस्वभावमाह भोक्तुरिति, सद्वारकमाकारद्वयमद्वारक एक आकारश्चेति

ऐक्यवाक्यविरोधादेतदपरमार्थसगुणब्रह्मप्राप्तिविषयमित्यभ्युपगन्तव्यमिति चेत् पृथक्त्वज्ञानस्यैव

साक्षादमृतत्वप्राप्तिसाधनत्वश्रवणाद् विपरीतं कस्मान्न भवति, एतदुक्तं भवति—द्वयोस्तुल्ययोर्विरोधे सत्यविरोधेन तयोर्विषयो विवेचनीय इति, कथमविरोध इति चेत् अन्तर्यामिरूपेणावस्थितस्य परस्य ब्रह्मणः शरीरतया प्रकारत्वाज्जीवात्मनस्तत्प्रकारं ब्रह्मैव त्वमिति-शब्देनाभिधीयते, तथैव ज्ञातव्यमिति तस्य वाक्यस्य* विषयः, एवंभूताज्जीवात्तदात्मतयाऽवस्थितस्य परमात्मनो निखिलदोषरहिततया सत्यसङ्कल्पत्वाद्यनवधिकातिशयासंख्येयकल्याणगुणाकरत्वेन

ब्रह्म त्रिविधं जीवान्तर्यामितयाऽवस्थानमचिदन्तर्यामितयाऽवस्थानं स्वरूपेणावस्थानं चेति त्रिविधं ब्रह्मेत्यर्थः । ऐक्यज्ञानोपायपरत्वश्रुतिविरोधेन हि पृथक्त्वज्ञानस्यापरमार्थविषयत्वं शङ्कितं तेनैक्यज्ञानपरत्वपरोक्तं तत्त्वमसीति वाक्यं सगुणपरमित्याह तत्त्वमिति, पूर्व्वाचार्येषु वाक्यकारग्रन्थं दर्शयति यथेति, युक्तमिति सगुणस्यैव ब्रह्मण उपासनेन सगुणमेव प्राप्यं युक्तमित्यर्थः । एतत्स्पष्टीकरणाय प्राचार्यग्रन्थं दर्शयति व्याख्यातं चेति,यद्यपीत्यादिर्द्रमिडाचार्यग्रन्थः, तच्चाचष्टे सच्चित्तेति,

च यः पृथगभावः सोऽनुसन्धेय इत्यस्य वाक्यस्य विषय इत्ययमर्थः पूर्वमेवासकृदुक्तः । भोक्ता भोग्यं प्रेरितारं च मत्वेति भोग्यरूपस्य वस्तुनोऽचेतनत्वं परमार्थत्वं सततं विकारास्पदत्वमित्यादयः स्वभावा भोक्तुर्जीवात्मनश्चामलापरिच्छिन्नज्ञानानन्दस्वभावस्यैवानादिकर्म्मरूपाविद्याकृतनानाविधज्ञान-

* अर्थः इति पा० ।

† द्रमिडाचार्यग्रन्थमिति पा० ।

सङ्कोचविकासौ, भोग्यभूताचिद्वस्तुसंसर्गश्च परमात्मोपासनान् मोक्षश्चेत्यादयः स्वभावाः, एवंभूतभोक्तृभोग्ययोरन्तर्यामिरूपेणावस्थानं स्वरूपेण चापरिमितगुणौघाश्रयत्वेनावस्थानमितिपरस्य ब्रह्मणस्त्रिविधावस्थानं ज्ञातव्यमित्यर्थः, तत्त्वमसीति सद्विद्यायामुपास्यं ब्रह्म सगुणं सगुणब्रह्मप्राप्तिश्च फलमित्यभियुक्तैः पूर्वाचार्यैर्व्याख्यातं, यथोक्तं वाक्यकारेण 'युक्तं तद्गुणकोपासनादिति, व्याख्यातं च द्रमिडाचार्येण विद्याविकल्पं वदता 'यद्यपि सच्चित्तो न निर्भुग्णदैवतं गुणगणं मनसाऽनुधावेत् तथाऽप्यन्तर्गुणामेव देवतां भजते इति, तत्रापि सगुणैव देवता प्राप्यते इति, सच्चित्तः सद्विद्यानिष्ठः न निर्भुग्णदैवतं गुणगणं मनसाऽनुधावेत्, अपहतपाप्मत्वादि कल्याणगुणगणं दैवताद्विभक्तं यद्यपि दहरविद्यानिष्ठ इव सच्चित्तो न स्मरेत् ।

अन्तर्गुणामिति पदस्य हेतुगर्भतां दर्शयन् वाक्यस्यार्थमाह देवतास्वरूपेति, प्रकृतसद्विद्याया असाधारणत्वान्निखिलजगत्कारणत्वमुक्तं प्रतिविद्यं व्यवस्थितानां गुणानां प्रदर्शनार्थम् आदि-शब्देन सर्वविद्यासाधारणानन्दत्वादयो विवक्षिताः, सर्वकल्याणगुण-शब्देन निरूपितस्वरूपस्य गुणा विवक्षिताः, दहरविद्यायां य इह आत्मानमनुविद्य व्रजन्त्येताँश्च सत्यान् कामानिति दैवतात्पृथगपहतपाप्मत्वादिगुणजातं विभक्तमुक्तमुपास्यं विहितम्, एवं सद्विद्यायां देवतायाः पृथग्गुणजातमुपास्यत्वेन न विहितं, तथाऽपि जगत्कारणत्वादिकतिपयगुणविशिष्टत्वेनोपास्यमानं ब्रह्म स्वतोऽपरिमितकल्याणगुणमिति सामान्येनापरिमितगुणत्वेनोपास्यमानत्वात्तस्यापि प्राप्यं सगुणमेव ब्रह्मेत्यर्थः ।

तथाऽप्यन्तर्गुणामेव देवतां भजते देवतास्वरूपानुबन्धित्वात्सकलकल्याणगुणगणस्य केनचित्परदेवताऽसाधारणेन निखिलजगत्कारणत्वादिना गुणेनोपास्यमानाऽपि देवता वस्तुतः स्वरूपानुबन्धिसर्वकल्याणगुणविशिष्टैवोपास्यते, अतस्सगुणमेव ब्रह्म तत्रापि प्राप्यमिति सद्विद्या-दहरविद्ययोर्विकल्प इत्यर्थः ।

ननु च सर्वस्य जन्तोः परमात्माऽन्तर्यामी तन्नियाम्यं च सर्वमेवेत्युक्तम्, एवं च सति विधिनिषेधशास्त्राणामधिकारी न दृश्यते यः स्वबुद्धैव

आनन्त्यस्य सर्वविद्यासाधारणत्वात् गुणतोऽऽप्यानन्त्यस्य तदन्तर्गतत्वात्सामान्येनापरिमितगुणत्वं हि सर्वविद्यानुयायि, न चैतावता सर्वगुणानां निरूपकत्वम् अपरिमितानां गुणानां स्वसम्बन्धेन मङ्गलानां च मङ्गलमिति प्रकारेण मङ्गलत्वापादनक्षमत्वस्य निरूपकत्वात् । एवं स्वोक्तार्थस्य स्वबुद्धिविलसितत्वेनोक्तत्वं व्यावर्तितम् । अथ परमात्मनियाम्यत्वे विधिनिषेधशास्त्रानर्थक्यं प्रसञ्जयंश्चोदयति ननु चेति, परमात्मनियाम्यत्वमस्तु ततः किमित्यत्राह एवं च सतीति, कथमधिकार्यभाव इत्यत्राह यः स्वबुद्धैवेति, न चेति, एषः—अधिकारी, राजादिनियाम्यत्वे सत्यपि प्रजानां विधिनिषेधयोग्यत्वं दृश्यते तद्वदत्रापि स्यादित्यत्राह सर्वस्मिन्निति, स्वाधीनप्रवृत्तय एव प्रजा अपराधादिकं कुर्वन्ति तत्फलदुःखानुभवादिष्वेव राजनियाम्यत्वं तासाम्, अत्र तु साधनानुष्ठानदशायामपि परमात्मपराधीनप्रवृत्तय इत्यस्वाधीनानामचेतन—

प्रवृत्तिनिवृत्तिशक्तस्स एवं कुर्यान्न कुर्यादिति विधिनिषेधयोग्यः, न चैष दृश्यते सर्वस्मिन्प्रवृत्तिजाते सर्वस्य प्रेरकः परमात्मा कारयितेति तस्य सर्वनियमनं प्रति-

पादितं, तथा च श्रूयते एष एव साधु कर्म्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति, एष एवासाधु कर्म्म कारयति तं यमधो निनीषतीति, साध्वसाधुकर्म्मकारयितृत्वान्नैर्घृण्यं च, अत्रोच्यते सर्वेषामेव चेतनानां चिच्छक्तियोगः प्रवृत्तिशक्तियोगः इत्यादिसर्वं प्रवृत्तिनिवृत्तिपरिकरं सामान्येन संविधाय तन्निर्वहणाय तदाधारो भूत्वान्तः—

यत्र विधिनिषेधयोग्यत्वमित्यभिप्रायेण सर्वस्मिन् प्रवृत्तिजाते इत्युक्तं प्रेरितारमित्यादिभिः सर्वप्रेरकतया प्रतिपाद्यमानस्य परमात्मनः सर्वनियमनं सर्वत्र प्रवृत्तिजाते कारयितृत्वपर्यन्तमित्यर्थः । कारयितृत्ववैषम्यार्थं श्रुतिं वदन् नैर्घृण्यं च प्रसञ्जयति श्रूयते चेति, साध्वसाधुकर्म्मकारयितृत्वाच्च नैर्घृण्यं चेति, अत्र च-शब्दः अनुक्तसमुच्चयपरः, असाधुकर्म्मकारयितृत्वान्नैर्घृण्यं साधुकर्म्मकारयितृत्वाद्वैषम्यं चेत्यर्थः । परिहरति अत्रोच्यत इति, इह चिच्छक्तियोगस्य भगवन्नित्येच्छाधीनत्वात्तन्नित्यत्वाविरोध इति भावः । आदि-शब्देन निवृत्तिशक्तियोग इच्छाप्रयत्नौ च गृह्येते, इत्यादीति क्रियाविशेषणं प्रवृत्तिनिवृत्तिपरिकरं करणकलेवरं बाह्यप्रवृत्तिनिवृत्तिशक्तिं ज्ञानचिकीर्षाप्रयत्नशक्तिं च सर्वचेतनानां सामान्येन तत्स्वातन्त्र्यार्हं प्रदायेत्यर्थः । एवं ज्ञानचिकीर्षाप्रयत्नेषु प्रवृत्तेषु प्रक्रान्त्यारम्भे न परमात्मापेक्षाऽस्ति अपि तु स्वयमेव प्रवर्त्तते तदानीं परमात्मोपेक्षकः, न चैतावता नियन्तृत्ववैकल्यं परस्योपेक्षाया अपि स्वस्वातन्त्र्या*धिकृत्वात् ।

प्रविश्यानुमन्तृतया च नियमनं कुर्वन् शेषित्वेनावस्थितः परमात्मा एतदाहितशक्तिस्सन् प्रवृत्तिनि-

* स्वस्वातन्त्र्याधीनत्वादिति पा॰ ।

वृत्त्यादि स्वयमेव कुरुते, एवं कुर्वाणमीक्षमाणः परमात्मोऽदासीन आस्ते, अतः सर्वमुपपन्नं, साध्वसाधुकर्म्मकारयितृत्वं तु व्यवस्थितविषयं न सर्वसाधारणं, यस्तु पूर्व्वं स्वयमेवातिमात्रमानुकूल्ये प्रवृत्तः तं प्रति प्रीतः स्वयमेव भगवान् कल्याणबुद्धियोगदानं–

देहसम्बन्धदुःखसुखाद्यन्वयदानादिना मुखान्तरेण नियमनस्य विद्यमानत्वात् जीवस्य नियमनार्हत्वानपगमाच्च । एवमुपेक्षकः सन् प्रथमप्रवृत्तौ सत्यां पश्चादनुमन्ता परमात्मा, अत एव ह्यनुमन्तृतया च नियमनं कुर्वन्नित्युक्तं भवति अनुमन्तृत्वं नाम प्रवृत्तिशैथिल्यपरिहारात्मकस्तत्फलपर्यन्तत्वहेतुर्व्यापारः, न त्वप्र*वृत्तस्य प्रवर्तकत्वम्, एवं ज्ञानचिकीर्षादौ स्वातन्त्र्याद्विधिनिषेधयोग्यत्वं नियमनवैकल्यशङ्कापरिहारार्थमनुमन्तृतया नियमनं कुर्वन्नित्युक्तं, सर्वप्रकारनियमनशक्तोऽपि सन् सत्सङ्कल्पादेवानुमन्तृतया नियच्छति, अनुमन्तृत्वमपि नियमनमेव तेन विना प्रवृत्तेः फलपर्यन्तत्वायोगात्, एवं नियमनप्रकारविशेषाभावेऽपि धारकत्वं शेषित्वं च सुस्थितमित्यात्मशरीरभावस्य च न हानिरित्यभिप्रायेणाधारो भूत्वा शेषित्वेनावस्थित इति चोक्तं, पश्चादनुमन्तृत्वमपि प्रथमप्रवृत्तेर्निग्रहरूपमेव, निग्रहश्चेन्न दोषः अनिग्रहश्चेन्न गुणः लोके निग्राह्यानिग्रहस्य गुणत्वदर्शनान्निग्राह्यानिग्रहस्य दोषत्वदर्शनाच्च, प्रथमनिवर्तनशक्तस्यापि उपेक्षकत्वे को हेतुः

कुर्वन् कल्याणे प्रवर्तयति, यः पुनरतिमात्रं प्रातिकूल्ये प्रवृत्तस्तस्य क्रूरां बुद्धिं ददत् स्वयमेव क्रूरेष्वेव कर्म्मसु प्रेरयति भगवान्, यथोक्तं भगवता–तेषां सततयुक्तानां भजतां प्रीतिपूर्व्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ तेषामेवानुकम्पार्थमहमज्ञानजं

* तत्प्रवृत्तस्य प्रवर्तकत्वमिति पा॰ ।

तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता । तानहं द्विषतः

स्वातन्त्र्यमेवेति ब्रूमः, तर्हि तत्स्वातन्त्र्यं दोषरूपं कथं लोके तथाऽऽदर्शनादेव एवं व्याप्तिबलाद्दोषमापादयन् भवान् किं परमात्मधर्मिणमभ्युपगम्य दोषमापादयति उतानभ्युपगम्य, अनभ्युपगम्य चेदाश्रयासिद्धिः, अभ्युपगम्य चेद् धर्मिग्राहकप्रमाणबाधः शास्त्रप्रवर्तनमुखेन सामान्येनाहितनिवारणं च कृतमीश्वरेण तदतिलङ्घ्य प्रवर्तमानानां प्रथमप्रवृत्तौ उपेक्षक इति नास्त्येव दोष इत्यभिप्रायः। कारयितृत्वश्रुतेर्निर्वाहकमाह साध्विति, कारयितृत्वश्रुतेर्व्यवस्थितविषयत्वाच्च विधिनिषेधशास्त्रानर्थक्यमिति भावः, दयायास्तु प्राचीनासंख्येयजन्मसु महापराधकारिणि पश्चात्तनप्रातिकूल्यव्यवसायनिवृत्तिमात्रेण तदपराधाननन्ताननादृत्य तस्य निरतिशय*सुखप्रदानाय स्वयमेव भगवान् प्रवर्तत इति सावकाशत्वम् । अथोपायस्वरूपं विशदयति सोऽयमिति, पूर्वमुपायस्वरूपमत्रेदमित्यादौ नातिविस्तृतं ततोऽत्र स्फुटमुच्यते ईश्वरविषया भक्तिः

क्रूरान्संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु॥ इति, सोऽयं परब्रह्मभूतः पुरुषोत्तमो निरतिशयपुण्यसंचयक्षीणाशेषजन्मोपचितपापराशेः परमपुरुषचरणारविन्दशरणागतिजनिततदाभिमुख्यस्य सदाचार्योपदेशोपबृंहितशास्त्राधिगततत्त्वयाथात्म्यावबोधपूर्वकाहरहरुपचीयमानशमदमतपःशौच-

न तु ब्रह्मविषयेति शङ्काव्यावृत्त्यर्थं परब्रह्मभूतः पुरुषोत्तम इत्युक्तं, जन्मान्तरसहस्रेषु तपोध्या†नसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥ इत्यस्यार्थं हृदि निधायाह निरतिशयेति, मामेव ये प्रपद्यन्ते इत्युक्ताङ्गप्रपत्तिसापेक्षत्वमाह परमपुरुषेति, सदाचार्योपदेशोपबृंहितेति उपबृंहितं—पुष्कलीकृतम्, अनेन पाण्डित्यं च निर्विद्येति श्रुत्यर्थ उक्तः,

* संपत्प्रदानायेति पा० ।
† ज्ञानेति पा० ।

तत्त्वयाथात्म्येति, धर्म्मिविपर्यासप्रकारविपर्यास-व्यावृत्त्यर्थौ तत्त्वयाथात्म्यशब्दौ प्रकारविपर्यासो रजः कार्यः धर्मिविपर्यासस्तमः कार्यः तदुभयराहित्यं विवक्षितं, शमदमौ अन्तःकरणबाह्येन्द्रियजयौ तपः-कृच्छ्रादि-शौचं मानसवाचिककायिकरूपेणेति त्रिविधं, क्षमा दुःखसहिष्णुत्वं भगवदपचारादिना भीरुत्वं, भयस्थानविवेकः तद्रक्षकत्वाव्यवसायादिना निर्भयत्वम् अभयस्थानविवेकः, दया परदुःखासहिष्णुत्वम्, अहिंसा परदुःखाहेतुत्वं, वर्णाश्रमाचारवतेत्यादिवचनाभिप्रायेण परमपुरुषाधनवेष इत्युक्तम्, उपसंहृतिरनुष्ठानं, भगवति न्यस्तभरत्वमाह परमेति, शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनमित्यादिवचनागुण्येन शास्त्रज्ञानात्प्रभृति-भक्तिसापेक्षत्वात्तद्भक्तिकारितेत्युक्तं, स्तुतिर्गुणकथनं वन्दिकृत्यं वा यतनं

क्षमार्जवभयाभयस्थानविवेकदयाऽहिंसाद्यात्मगुणोपेतस्य वर्णाश्रमोचितपरमपुरुषाराधनवेषनित्यनैमित्तिककर्म्मोपसंहृतिनिषिद्धपरिहारनिष्ठस्य परमपुरुषचरणारविन्दयुगलन्यस्तात्मात्मीयस्य तद्भक्तिकारिता-

भगवद्ध्यानादिकरणं, कीर्तनं भगवन्नामोच्चारणं, वचनं परेभ्यो भगवद्गुणानां प्रतिपादनं, ध्यान-शब्देनारम्भण-संशीलनं विवक्षितं न त्वङ्गी, अनुध्यानोपायस्योच्यमानत्वात् । नन्वर्चनप्रणामादेरङ्गिकोटिनिवेशः प्रागुक्तः वर्णाश्रमधर्म्मेतिकर्तव्यताकपरमपुरुषचरणयुगलध्यानार्चनप्रणामादिरिति इह कथमर्चनप्रणामादेरङ्गत्वमुच्यते यावद्वारणासिद्धि क्रियमाणमर्चनादिकमङ्गन्ततः पश्चादनुष्ठीयमानमङ्गीति विभाग इति स्वान्तध्वान्तं पापमूलरजस्तमसी विषयस्य प्रियत्वादस्य निरतिशयप्रियत्वम् अनुध्यानरूपभक्त्येकलभ्य इति एवंविधानुध्यानं भक्तिः तयैव लभ्य इत्यर्थः। यद्वा पूर्वमपि ध्यान-शब्देनाविच्छिन्नस्मृतिसन्ततिरूपध्यानमेवोच्यते, न त्वारम्भणसंशीलनं पश्चादनुध्यानशब्देन दिव्यात्मस्वरूपानुसन्धानरूपः समाधिरुच्यते, स हि ध्यानसाध्यः तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यन्मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते इति वचनात् उपेयविरो-

धिनिरासकत्वं समाधेरेव, ध्यानमपि समाधिविरोधिनिरासकं यथाऽग्निरुद्धतशिखः कक्षं दहति सानिलः । तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्विषम् ॥ मनसा ध्याननिष्पाद्यमित्युक्तेः,

नवरतस्तुति–स्मृति–नमस्कृति–वन्दन–यतन–कीर्त्तन–गुणश्रवण–वचन–ध्यानार्चन–प्रणामादिप्रीतपरमकारुणिकपुरुषोत्तमप्रसादविध्वस्तस्वान्तध्वान्तस्यानन्यप्रयोजनानवरतनिरतिशयप्रियविशदतमप्रत्ययतापन्नानुध्यानरूपभक्त्येकलभ्यः । तदुक्तं परमगुरुभिर्भगवद्यामुनाचार्यपादैः–उभयपरिकर्म्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगलभ्य इति, ज्ञानयोगकर्म्मयोगसंस्कृतान्तःकरणस्येत्यर्थः

तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिःस्पृहा । तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप? ॥ इति,–सेवेत योगी निष्कामो योग्यतां स्वमनो नयन् । यमनियमविधूतकल्मषाणाम्, ॥ सदा तद्भावभावित इति, धारणापर्यन्तानामङ्गानां ध्याननिष्पादकत्ववद् ध्यानस्य समाधिनिष्पादकत्वमेवेति समाधेरेवाङ्गित्वं,ध्यानस्यैव प्राधान्यं यत्रोच्यते तत्र ध्यान–शब्देन समाधिपर्यन्तध्यानं विवक्षितं समाधिनिष्ठेनापि व्युत्थानकाले क्रियमाणमर्चनादिकर्मोङ्गिकोटिनिविष्टं मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसीत्युक्त्या प्राप्तेरव्यवहितोपायत्वप्रतीतेः, तेनानुष्ठीयमानो वर्णाश्रमादिधर्म्मस्त्वङ्गमेव, अतोयथोक्त एवार्थः, अस्यार्थस्य साम्प्रदायिकत्वमाह तदुक्तमिति, उभयपरिकर्मित–शब्दं व्याचष्ट ज्ञानेति, उक्तार्थे प्रमाणानि दर्शयन्प्रथमं कर्म्मानुगृहीतत्वे प्रमाणमाह तथा चेति, अत्र कर्म्मवाचिपदं किमित्यत्राह अत्रेति, अविद्या–शब्दस्य कर्म्मवाचित्वे प्रयोगं दर्शयति तथोक्तमिति, ज्ञानव्यपाश्रयः–शास्त्रजन्यज्ञानवान्, ब्रह्मविद्यामधिष्ठाय–विवेकजं ज्ञानमवलम्ब्य उद्दिश्येत्यर्थः ।

तथा च श्रुतिः—विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ इति, अत्राविद्या—शब्देन विद्येतद् वर्णाश्रमाचारादि-पूर्व्वोक्तं कर्म्मोच्यते विद्या—शब्देन च भक्तिरूपापन्नं ध्यानमुच्यते, यथोक्तम्—इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः । ब्रह्मविद्यामधिष्ठाय तर्त्तुं मृत्युमविद्यया ॥ इति, तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते । य एनं विदुरमृतास्ते भवन्ति, ब्रह्मविदाप्नोति परं तपो ह वै तत्परं वेद ब्रह्म वेद ब्रह्मैव भवतीत्यादि वेदन—शब्देन ध्यानमेवाभिहितं निदिध्यासितव्य इत्यादिनैकार्थ्यात्, तदेव ध्यानं पुनरपि विशिनष्टि—नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते स तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामिति

न हि विवेकजस्यज्ञानस्यो*पायत्वमुपपद्यते, भक्तेरुपायत्वं कथमिति शङ्कायामुपायविधायिवाक्यान्यैकण्ठ्येन योजयति तमेवेति, ध्यानं विधेयमस्तु तत्कार्थं भक्तेरुपायत्वम् इत्यत्राह तदेवेति, नायमात्मा इत्यादिवाक्येन फलितार्थमाह भक्तीति, केवलस्य निषेधकश्शब्दः क इत्यत्राह न मेधयेति, न मेधयेत्युक्तेः केवलस्य निषेध इति कथमवगम्यते भक्तिवाचिशब्दश्च न प्रतीयते भक्तेर्ध्यानविशेषत्वं वा कथमिति शङ्कायामाह एतदुक्तमिति,

भक्तिरूपापन्नानुध्यानेनैव लभ्यते न केवलं वेदन-

* ज्ञानस्य प्रेर्यत्वमुपपद्यत इति पा० ।

† ततः किमित्ति पा० ।

मात्रेण न मेधयेति केवलस्य निषिद्धत्वात्, एतदुक्तं भवति—योऽयं मुमुक्षुर्वेदान्तविहितवेदनरूपध्यानादिविशि*ष्टः यदा तस्य तस्मिन्नेवानुध्याने निरवधिकातिशया प्रीतिर्जायते तदैव तेन लभ्यते परः पुरुष इति, यथोक्तं भगवता—पुरुषः स परः पार्थ! भक्त्या लभ्यस्त्वनन्यया। भक्त्या त्वनन्यया शक्यः अहमेवं विधोऽर्जुन!। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ?॥ भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥ इति, तदनन्तरं मां तत एव भक्तितो विशते इत्यर्थः । भक्तिरपि निरतिशयप्रियानन्यप्रयोजनस†कलेतरवैतृष्ण्यावहज्ञानविशेष एवेति, तद्युक्त एव तेन परेणात्मना वरणीयो भवतीति तेन लभ्यत इति श्रुत्यर्थः ।

उपासनादिविधायिवाक्याविरोधाय केवलश्रवणादिनिषेध इत्यवगम्यत इत्यभिप्रायेण वेदान्तविहितेत्युक्तं, यदा तस्येति, ध्येयस्य निरतिशयप्रियत्वाद् ध्याने प्रीतिः ध्यानदशायां प्रीतिः ध्यानस्य प्रीतिरूपत्वमुक्तं भवति, एवं वरणीयत्वहेतुर्गुण उक्तः, तत्र प्रमाणमाह यथोक्तमिति, भक्त्या मामभिजानातीत्यादिश्लोके भक्तिसाध्यं ज्ञानान्तरमपवर्गोपाय इति शङ्का माभूदिति तद्व्याचष्टे तदनन्तरमिति, भक्त्येति परभक्तिरुच्यते मद्भक्तिं लभते परामिति स्मृत‡त्वात्, अभिजानातीति परज्ञानमुच्यते, य इति धर्म्मिस्वरूपं, यावानिति गुणविभूत्यादि विवक्षितं, तत इति परमभक्ति-

* ध्यानादिनिष्ठ इति पा॰ ।

† स्वेतरेति पा॰ ।

‡ प्रकृतत्वादिति पा॰ ।

रुच्यते, साक्षात्काराभिनिवेशः परभक्तिः, साक्षात्कारः-परज्ञानं पश्चादनुभवाभिनिवेशः परमभक्तिः, न च तत इति साक्षात्कारपरामर्शः प्रवेष्टुं भक्त्या त्वनन्यया शक्य इति पूर्व्वोदाहृतवचनैकार्थ्यात्, विशत इति प्रकृतिबन्धविनिर्मुक्तस्यानुभव उच्यते, भक्तिरपीति निरतिशयप्रियत्वादनन्यप्रयोजनत्वम् ।

एवंविधपरभक्तिरूपज्ञानविशेषस्योत्पादकः पूर्व्वोक्ताहरहरुपचीयमानज्ञानपूर्व्वककर्म्मानुगृहीतभक्तियोग एव, यथोक्तं भगवता पराशरेण—वर्णाश्रमाचारवता पुरुषेण परः पुमान् । विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥ इति, निखिलजगदुद्धारणायावनितलेऽवतीर्णः परब्रह्मभूतः पुरुषोत्तमः स्वयमेवैतदुक्तवान्—स्वकर्म्मनिरतः सिद्धिं यथा—

अनेनैश्वर्यार्थभक्तियोगो व्यावृत्तः, स्वेतरवैतृष्ण्यावह इति भक्तेः प्रियतमत्वातिशयात् भगवत्प्राप्तावपि नैरपेक्ष्यं भवतीत्यर्थः । उदाहृतश्रुत्यर्थमुपसंहरति तदुक्त एवेति, एवं विधेति, परभक्तिरूपज्ञानविशेषस्येति, परज्ञानात्पूर्व्वभाविनी परभक्तिर्न विवक्षिता परमभक्तिरेवाभिप्रेता, ज्ञानपूर्व्वककर्म्मानुगृहीतो ऽहरहरभ्यस्यमानो भक्तियोगः परभक्तेरुत्पादक इत्यर्थः, अहरहरभ्यस्यमान एव भक्तियोगः परभक्तिदशापन्नः स्यादित्यर्थः । प्रीतिरूपध्यानेन निरतिशयानन्दरूपदिव्यात्मस्वरूपानुसन्धानं निरतिशयप्रियं सिद्ध्यति । तदेव साक्षात्काररूपानुभवाभिनिवेशं जनयति सोऽभिनिवेशः परमभक्तिरिति यावत् । कर्म्मानुगृहीतत्वे प्रमाणमाह यथोक्तमिति, तत्तोषकारक इत्यनेन भगवत्तोषहेतुभूतज्ञानाङ्गत्वं सिद्धम् । भगवद्वचनं दर्शयंस्तस्यातिशयमाह निखिलेति, स्वकर्म्मणा सिद्धिं विन्दतीति चेत्कथं भक्तेरुपायत्वमित्यत्राह यथोदितेति, यथोक्तकर्म्मानुगृहीतक्रमपरिणतभक्त्येकलभ्य इत्यर्थः । पूर्व्वमुपेयस्वरूपनिष्कर्षे स्वोक्तप्रकारस्य शिष्टप-

रिगृहीतव्याख्यानमूलत्वमुक्तम् । इदानीं तदपि विशदयन् उपासनस्वरूपस्य यथोदितप्रकारस्य तन्मूलत्वमाह बोधायनेति, टङ्को-ब्रह्मानन्दी शिष्टपरिगृहीत-शब्दोऽर्थविशेषणम्, उक्तार्थविरुद्धमुपायोपेयस्वरूपं वर्णयन्तो वादिनस्तर्कानुगृहीतश्रुतिविरोधादेव निरस्ता इत्याह अनेनेति,

विन्दति तच्छृणु । यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ॥ स्वकर्म्मणा तमभ्यर्च्य सिद्धं विन्दति मानवः ॥ इति, यथोदितक्रमपरिणतभक्त्येकलभ्य एव भगवद्बोधायन-टङ्क-द्रमिड-गुहदेव-कपर्दि-भारुचिप्रभृत्यविगीत-शिष्टपरिगृहीत-पुरातन-वेद-वेदान्तव्याख्यान-सुव्यक्तार्थ-श्रुतिनिकरनिदर्शितोऽयं पन्थाः ॥

औलूक्यः-कणादः, पतञ्जलिमतं हैरण्यगर्भमक्षपादादीनां वेदप्रामाण्याभ्युपगमेऽपि वेदविरुद्धार्थानां कुतर्कमूलानाम् अभ्युपगमाद्वेदस्य पौरुषेयत्वाभ्युपगमाच्च तन्मतानुसारिणां बाह्यसाम्याद्बाह्यत्वोक्तिः, वेदावलम्बिनां कुदृष्टीनां निरासो बाह्यानामिव नोपपद्यते वेदावलम्बिनां वेदैकरुचित्वमूलसत्त्वगुणोद्रेकादित्यत्राह वेदावलम्बिनामपीति, उत्पद्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानिचित् । तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च ॥ इति श्लोकेन बाह्या निरस्ताः, अर्वाक्कालिकतयेत्यनेन दोषमूलत्वं सूचितं, निष्फलानि तदर्थानुष्ठानेषु नैष्फल्यम्, अनृतानि तत्त्वस्थितेरनृतत्वम्, एवं पूर्वश्लोके बाह्यानां निरस्तत्वाद् या वेदबाह्या इत्यादिश्लोके कुदृष्टीनां बाह्यसाम्यमेव विवक्षितमित्यभिप्रायः । कुदृष्टीनामपि वेदैकरुचित्वमूलसत्त्वगुणोद्रेकात्तन्निरासानुपपत्तिशङ्कां परिहरन् फलितार्थमाह रज इति, रजस्तमोभ्यामस्पृष्टं, तमोनिष्ठा हि ताः स्मृता इत्यत्र तमःशब्दो रजसोऽप्युपल-

अनेन चार्वाक-शाक्यौलूक्याक्षपाद-क्षपणक-कपिल-पतञ्जलिमतानुसारिणो वेदबाह्याः वेदावल-

म्बिकुदृ*ष्टिभिस्सह निरस्ताः, वेदावलम्बिनामपि यथाऽवस्थितवस्तुविपर्यस्तदृशां बाह्यसाम्यं मनुनैवोक्तं—या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः । सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः ॥ इति, रजस्तमोभ्यामस्पृष्टमुत्तमं सत्त्वमेव येषां स्वाभाविको गुणस्तेषामेव वैदिकी †रुचिः, वेदार्थयाथात्म्यावबोधश्चेत्यर्थः—यथोक्तं मात्स्ये सङ्कीर्णाः—सात्त्विकाश्चैव राजसास्तामसास्तथेति, ।

तत्रार्थः शुद्धसत्त्वव्यतिरिक्तत्वादित्यभिप्रायेण रजस्तमोभ्यामित्युक्तं, स्वाभाविक इत्यनेन सत्त्वगुणस्य स्थायित्वं विवक्षितम् । अनेन क्वचिदपि तत्प्रमादि‡कृताव्यावृत्तिः तेषामेव वैदिकी रुचिर्वेदार्थयाथात्म्यावबोधश्चेति वेदावलम्बिकुदृष्टीनां वेदैकरुचित्वमूलसत्त्वगुणसद्भावेऽपि तदर्थयाथात्म्यानबोधहेतुभूतरजस्तमःसम्भवात्ते निरसनीया इत्यर्थः । बाह्यानामपि मन्त्रजपध्यानादिषु दृष्टफलत्वात्तदनुष्ठानस्य न नैष्फल्यमिति शङ्काव्यावृत्त्यर्थं प्रेत्य—पदं, शुद्धसत्त्वव्यतिरिक्तानामप्रामाण्यहेतुत्वमभिप्रेत्य मात्स्यवचनं दर्शयति यथोक्तमिति, सङ्कीर्णा इत्यादिवचने प्रमाणाप्रमाणविभागकथनाभावेऽपि सात्त्विकादिविभागकथनस्य प्रयोजनान्तराभावात्प्रामाण्याप्रामाण्यनिर्णय एव प्रयोजनमित्यभिप्रायः । उदाहृतश्लोकं व्याचष्टे केचिदिति,सङ्कीर्णादिशब्दानां विशेष्या ब्रह्मकल्पाः—यस्मिन् कल्पे त्वित्युक्तेरिति भावः । कल्पानां रजःप्रभृतिगुणप्राचुर्यं तस्मिन्कल्पे ब्रह्मणस्तद्गुणप्राचुर्यात्

* कुदृष्टि—पदेन निर्विशेषाद्वैतवादिन उच्यन्ते, ते हि भगवच्छरीरस्वरूपयोश्चिदचितोर्मिथ्यात्वमातिष्ठन्ते, अत एव तु दुर्दर्शनशालितया तथाऽभिहिताः, यथा चिदचितोर्भगवच्छरीरस्वरूपयोर्मिथ्यात्वाम्नानं न युक्तं तथा प्राचीनाचार्यैः सिद्धित्रयश्रीभाष्यादिमहानिबन्धेषु सम्यगुपदर्शितं, तदेवास्माभिस्तत्रतत्र विशदीकृत्य स्वीयग्रन्थेषु दशावतारभाष्यादिषु बहुधा समालोड्य संसाधितमिति तत एव सुज्ञानं तत् ।

† वेदैकरुचिरिति पा० । ‡ प्रमादकृताव्यावृत्तिरिति पा० ।

केचिद्ब्रह्मकल्पाः सङ्कीर्णाः, केचित् सत्त्वप्राया केचिद्रजःप्रायाः केचित्तमःप्राया इति कल्पविभागमुक्त्वा सत्त्वरजस्तमोमयानां तत्त्वानां माहात्म्यवर्णनं च तत्तत्कल्पोक्तपुराणेषु सत्त्वादिगुणमयेन ब्रह्मणा क्रियत इति चोक्तं—यस्मिन् कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा ।

यस्मिन्कल्पे इत्यादेरुदाहरिष्यमाणस्यार्थमाह सत्त्वरजस्तमोमयानां तत्त्वानामिति, दैवतानामित्यर्थः । यस्मिन्निति यस्मिन्कल्पे यत्पुराणं ब्रह्मणोक्तं तस्मिन्कल्पे तत्पुराण इत्यध्याहारः, तस्य तस्येति न कल्पपरः शब्दः, न हि ब्रह्मणो दिवसानां माहात्म्यं पुराणेषु वर्ण्यते अग्नेः शिवस्येति देवताविशेषवर्णनपरत्वस्य वक्ष्यमाणत्वाच्च तस्य तस्येति पदं तत्तद्देवताविशेषपरम्, अतः तस्मिन्कल्पे तस्मिन्पुराणे तत्तद्गुणप्राचुर्यस्य तस्य तस्य दैवतस्य माहात्म्यं वर्ण्यत इत्यर्थः । यद्वा कल्पमाहात्म्यप्रतिपादनं नाम तत्तत्कल्पानुगुणदेवता*माहात्म्यप्रतिपादनं यथा पुरवर्णनं नाम पुरस्य गुणवर्णनं, यथा च वनवर्णनं नाम तदसाधारणवृत्तादिवर्णनं किं दैवतं किंगुणकमित्यत्राह विशेषतश्चेति, जगत्स्रष्टुरीश्वरस्य ब्रह्मणो गुणव‡श्यत्वं न सम्भवति गुणविभागकथनस्य न किं प्रयोजनं सङ्कीर्णाः सात्त्विकाश्चैवेत्यादिवचनं किंगुणकेन ब्रह्मणा प्रोक्तं भूयसां बलीयस्त्वन्यायादिदं वचनं बहुभिः पुराणैर्बाध्यमिति शङ्कायामाह—

तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते ॥ इति, विशेषतश्चोक्तम्—अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते । राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः ॥ सात्त्विकेषु† च कल्पेषु माहात्म्यमधिकं हरेः ।

* तत्तत्कालानुगुणदेवतेति पा· ।

† सात्त्विकेष्वथेति पा· ।

‡ गुणवत्त्वमिति पा· ।

तेष्वेव योगसंसिद्धाः गमिष्यन्ति परां गतिम् ॥ सङ्कीर्णेषु सरस्वत्याः पितृणाम् इत्यादि, एतदुक्तं भवति आदिक्षेत्रज्ञत्वाद् ब्रह्मणस्तस्यापि केषुचिदहस्सु सत्त्वमुद्रिक्तं केषुचिद्रजः, केषुचित्तमः, यथोक्तं भगवता—न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः । सत्त्वम्प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ इति, यो ब्रह्माणं विदधाति पूर्व्वं यो वै वेदांश्च प्रहिणोति तस्मा इति श्रुतेः, ब्रह्मणोऽपि सृज्यत्वेन शास्त्रवश्यत्वेन च क्षेत्रज्ञत्वं गम्यते ।

एतदुक्तं भवतीति, ब्रह्मणः क्षेत्रज्ञत्वं कथमित्यत्राह यो ब्रह्माणमिति, सृज्यत्वेन *शास्त्रवश्यत्वश्रवणादपहतपाप्मत्वादिश्रवणरूपापवादरहितजन्मवत्त्वेनेति भावः । शास्त्रवश्यत्वेन शास्त्रप्रदानं हि तत्सापेक्षस्येति भावः । ततः किमित्यत्राह सत्त्वेति, भूयसां बलीयस्त्वनयं परिहरति तेषामिति, नैतद्वचनविरोधात्तेषां बाधः किन्तु परस्परविरोधात् कृत्स्नपुराणानामर्थनिश्चायकत्वशक्तिविरहे सति तानि किं कार्त्स्न्येन त्याज्यानि? उत कानिचित्स्वीकार्याणीत्यपेक्षायां सत्त्वादिमूलत्वलक्षणवैषम्यपरमिदं वचनमतो न भूयसां बलीयस्तयाऽस्य बाध इत्यर्थः । प्रयोजनमाह पुराणेति, किंगुणकेनोक्तमित्यत्राह सत्त्वनिष्ठेनेति, स्वतःप्रमाणत्वादपवादकवचनान्तरादर्शनात् योह खलु वाऽस्येत्यादिमैत्रायणीयश्रुत्या तत्तद्गुणकत्वेनाभिमतस्य तत्तद्देवताविशेषस्य प्रतिपादकानां प्रबन्धानां तत्तद्गुणमूलत्वस्योचितत्वरूपेण वस्तुसामर्थ्येन स्वतःसिद्धस्य प्रामाण्यस्य स्थिरीकरणाच्च प्रामाण्यहेतुभूतरजस्तमोऽभिभवनिरासकसत्त्वमूलत्वं सिद्धमिति भावः ॥

सत्त्वप्रायेष्वहस्सु तदितरेषु यानि पुराणानि ब्र-

* ऐक्कत्वश्रवणादिति पा० ।

ह्मणा प्रोक्तानि तेषां परस्परविरोधे सति सात्त्विकाद्धः प्रोक्तमेव पुराणं यथार्थं, तद्विरोध्यन्यदयथार्थमिति पुराणनिर्णयायैवेदं सत्त्वनिष्ठेन ब्रह्मणाऽभिहितमिति विज्ञायत इति । सत्त्वादीनां कार्यं च भगवतैवोक्तं—सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च । प्रमादमोहौ तमसो भवतो ऽज्ञानमेव च ॥ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये । बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ! सात्त्विकी ॥ यया धर्म्ममधर्म्मं च कार्यं चाकार्यमेव च ।

सात्त्विकादिविभागोऽस्तु तत्र कस्य प्रामाण्यं कस्याप्रामाण्यमित्यत्राह सत्त्वादीनामिति, पुराणानां ब्रह्मप्रोक्तत्वे कथं पराशरादिप्रोक्तत्वं सङ्गटत इत्यत्राह सर्वानिति, पौरुषेयेषु हि विरोधे तु वक्तुर्गुणानुगुणप्रामाण्याप्रामाण्यविभाग उपपद्यते । अपौरुषेयश्रुतिवाक्येषु गुणानुगुणप्रामाण्याप्रामाण्यविभागेन निर्वाहो नोपपद्यत इति शङ्कते अपौरुषेयेष्विति, परिहरति तात्पर्येति, अभेदश्रुत्यादीनां पूर्व्वापरपर्यालोचनादिना निर्वाहस्योक्तत्वात्तेनैव प्रकारेणात्राप्यविरोधनिर्वाह इत्यभिप्रायेण पूर्व्वमेवोक्त इत्युक्तम्, एक एव रुद्र इत्यादिवाक्यस्य पूर्व्वापरपर्यालोचनया क्षेत्रोरेकदेवताकत्वपरं तद्वाक्यमिति निश्चीयते, हरिश्रेशायेति पदं पदाध्ययनपारम्पर्यादेव व्याख्यातं, सोमः

अयथावत् प्रजानाति बुद्धिः सा पार्थ! राजसी । अधर्म्मं धर्म्ममिति या मन्यते तमसा ऽऽवृता । सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ ? तामसी ॥ इति, सर्वान् पुराणार्थान् ब्रह्मणः सकाशादधिगम्यैव सर्वाणि पुराणानि पुराणकाराश्चक्रुः, यथोक्तं—कथयामि यथा पूर्व्वं

दक्षाद्यैर्मुनिसत्तमैः । पृष्टः प्रोवाच भगवानब्जयोनिः पितामहः ॥ इति अपौरुषेयेषु वेदवाक्येषु परस्परविरुद्धेषु कथमिति चेत् तात्पर्यनिश्चयादविरोधः पूर्व्वमेवोक्तः । यदपि चेदं विरुद्धवद् दृश्यते प्राणं मनसि सह करणैर्नादान्ते परमात्मनि सम्प्रतिष्ठाप्य ध्यायीतेशानं प्रध्यायीतैवं सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्ते न कारणं, कारणं तु ध्येयः सर्वैश्वर्य्यसम्पन्नः सर्वेश्वरः शम्भुराकाशमध्ये ध्येयः, यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् ।

पवत इत्यादावृग्वेदमन्त्रे सोम–शब्दोऽपि सोमलतापरः योगाद्रूढेर्बलीयस्त्वात्समासविभागाभावेन पदक्रमाध्ययनात्सोमलताविषयस्य मन्त्रस्य विनियोगाच्च सोम–शब्दस्यो–मा–सहितवाचित्वाभावात् । किञ्च सोम–शब्दस्य देवतापरत्वेऽपि रुद्राऽवगतश्चन्द्र एव स्वरसतः प्रतीयते न योगावसेयो रुद्रः, अतो न किञ्चिदेतत् । अस्मिन्मन्त्रे जनितेति पदं च प्रीतिजनकार्थम् । एवमन्यदपि प्रकरणपर्यालोचनादिभिः परिहर्तव्यमित्यभिप्रायः । एवं वेदपूर्व्वभागवचसां विरोधे निर्वाहोऽस्तु उपनिषद्भागेष्वन्यपरत्वाद्यभावात् तत्र कथं निर्वाह इत्यत्राह यदपीति, आदि–शब्देनाथर्वशिरोवाक्यानि चतुर्मुखकारणत्वपराणि हिरण्यगर्भः समवर्तताग्रे धाता यथापूर्व्वमकल्पयत् प्रजापतिः प्रजा असृजतेत्यादीनि च वाक्यानि विवक्षितानि । ततः किमित्यत्राह नारायण इति, परिहरति अत्यल्पमित्यादिना-

वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वं ततो यदुत्तरतरं तदरूपमनामयं य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापियन्ति, सर्वानन-

शिरोग्रीवः सर्वभूतगुहाशयः सर्वव्यापी च भगवाँस्त-स्मात्सर्वगतः शिवः । यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः । तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणीत्यादि, नारायणः परं ब्रह्मेति च पूर्वमेव प्रतिपादितं, तेनास्य कथमवि-रोधः ।

तत्र प्रथमं स्वपक्षं प्रतिजानीते वेदविदित्यादि श्लोकेन वेदवित्प्र-वरप्रोक्तवाक्यन्यायोपबृंहिता इति स्मृतीतिहासपुराणमीमांसान्यायोप-बृंहिता इत्यर्थः । तत्र स्वपक्षस्य प्रतिज्ञातस्य प्रमाणमुपन्यसिष्यन्प्रथमं कारणवाक्यान्युदाहरिष्यन्सूत्रपुरःसरं लक्षणवाक्यमाह जन्मादीति, जग-त्कारणं वस्तु ब्रह्मास्तु तच्च जगत्कारणं किमित्यपेक्षायामाह तच्चेति, जगत्सृष्टिप्रलयप्रकरणेष्वेवेति न तूपासनादिविधिपरेषु शम्भुराकाशमध्ये ध्येय इत्यादिष्वित्यर्थः । तत्र हि कारणत्वानुवादेन ध्येयताविधिपरत्वं जगत्सृष्टिप्रलयप्रकरणेषु सद्ब्रह्मेत्यादिबहुभिः शब्दैः कारणत्वप्रतिपादना-न्नारायणस्यैव कारणत्वसिद्धिरित्यत्राह सदेवेति, गतिसामान्यन्यायात्स-र्वेषां कारणवाक्यानामैककण्ठ्यमभिप्रेत्य उदाहृतवाक्यैकार्थ्ये वाक्यान्तरं दर्शयति अयमेवेति, कारणवाक्यजातैकार्थ्यसिद्धम् ।

अत्यल्पमेतत्—वेदवित्प्रवरप्रोक्तवाक्यन्यायोपबृंहि-ताः । वेदाः साङ्गा हरिं प्राहुर्जगज्जन्मादिकारणम् । जन्माद्यस्य यतः, यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्वि-जिज्ञासस्व तद्ब्रह्मेति जगज्जन्मादिकारणं ब्रह्मेत्यवग-म्यते । तच्च जगत्सृष्टिप्रलयप्रकरणेष्वेवावगन्तव्यं, सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयमिति जग-

दुपादानता-जगन्निमित्तता-जगदन्तर्यामितादिमुखेन परमकारणं सच्छब्दे*नाभिहितं ब्रह्मेत्यवगतम् । अयमेवार्थः ब्रह्म वा इदमेकमेवाग्र आसीदिति शाखान्तरे ब्रह्म-शब्देन प्रतिपादितः, अनेन सच्छब्देनाभिहितं ब्रह्मेत्यवगतम् अयमेवार्थः—

सच्छब्दस्य ब्रह्म-शब्दार्थे पर्यवसानमाह अनेनेति, वाक्यान्तरमुक्तवाक्यैकार्थमाह अयमेवेति, अयमेवार्थः प्रतिपादित इत्यर्थः । सद्ब्रह्मशब्दयोरात्मपर्यवसानमाह तथेति, आत्म-शब्दस्य सद्ब्रह्म-शब्दापेक्षया विशेषशब्दत्वेऽपि नारायण-शब्दापेक्षया सामान्यशब्दत्वात् तत्र पर्यवसानमाह तथा चेति, शिवस्य कारणत्ववादिनाऽप्यापेक्षिकसामान्यविशेषभावोऽभ्युपेत्यः, अन्यथा बहुकारणत्वप्रसङ्गात्, तत्र शिवादिशब्दानामपि नारायणशब्दापेक्षया सामान्यशब्दत्वात् नारायणे पर्यवसानमिति भावः । यथा पशुना यजेतेत्यत्र पशुसामान्यवाचिपशुशब्दः छागस्य वपाया मेदस इति मन्त्रस्थच्छाग-शब्दोक्तविशेषे पर्यस्यति, एवं सच्छब्दो बृहदबृहच्छब्दसाधारणत्वाद्ब्रह्मशब्दोक्तविशेषे पर्यवस्यति चेतनाचेतनसाधारणो ब्रह्म-शब्दश्चेतनैकान्तात्म-शब्दोक्तविशेषे पर्यवस्यति ।

तथा शाखान्तरे आत्मा वा इदमेकमेवाग्र आसीत् नान्यत्किञ्चन मिषदिति तथा सद्ब्रह्म-शब्दाभ्यामात्मैवाभिहित इत्यवगम्यते तथा च शाखान्तरे एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणीत्यादिना सद्ब्रह्मात्मादिपरमका†रणादादिभिः शब्दैर्नारायण एवाभिहित इति निश्चीयते, यमन्तः समुद्रे कवयो वयन्ति इत्यादिना

* प्रतिपादितमिति ।

† परमकारणवाचिभिरिति पा० ।

एनमूर्द्धं न तिर्यञ्चं न मध्ये परिजग्रभवत् । न तस्येशे कश्चन तस्य नाम महद्यशः, न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् । हृदा मनीषा मनसाऽभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति, इति

तथाऽऽत्म-शब्दश्च सर्वचेतनसाधारणो नारायण एव विशेषे पर्यवस्यतीति नारायण एव सद्ब्रह्मात्मशब्दैरभिधीयत इत्यर्थः । ननु एको ह वै नारायण आसीदित्यत्र अनुवादसूचक-ह वै-शब्दश्रवणात्सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त इति वाक्यवदिदमपि वाक्यमनुवादपरमिति वाक्यान्तरसापेक्षं तत्र तद्वृत्तमेवकारश्च स्यादुपादेयलक्षणमिति विधित्वसूचकैवकारवता न सन्न चासदित्यादिवाक्येनोक्तः शिव एवानूद्यत इति । अत्रोच्यते अप्राप्ते हि शास्त्रमर्थवदिति न्यायेन स्वतःप्राप्तस्य विधित्वस्य ह-वै-शब्दो न भञ्जकः, यथा यदाग्नेयोऽष्टाकपाल इत्यत्र यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणमित्यनुवादसूचकयच्छब्दसद्भावेऽपि वचनानि त्वपूर्व्वत्वादिति सूत्रेण विधित्वं स्थापितं प्रमाणान्तराप्राप्तत्वात् तथा उपरि हि देवेभ्यो धारयतीत्यत्र हि-शब्दसद्भावेऽपि विधिस्तु धारणे ऽपूर्व्वत्वादिति सूत्रेण विधित्वं स्थापितं प्रमाणान्तराप्राप्तत्वात्, तस्मान्न स्वतःप्राप्तविधित्वभञ्जको ह-वै-शब्दः । अपि तु प्रमाणान्तरेण विधित्वे भग्ने प्रयुक्त-शब्दस्य गतिप्रदर्शकः आकाशकारणत्ववाक्ये त्वयोग्यत्वादिना विधित्वभङ्गाद्ध-वै-शब्दोऽनुवादरूपताज्ञापकः, अत्र तु प्रमाणान्तराप्राप्तत्वाद्विधित्वभञ्जकाभावाच्च ह-वै-शब्दो न स्वतःप्राप्तविधित्वभञ्जकः, शिव एवेत्यनेन विधित्वं भग्नमिति चेन्न शिवास्ते सन्तु पन्थानः शिवं कर्म्मास्तु शिवः शिवानामशिवोऽशिवानाम्, यो वः शिवतमो रस इत्यादिष्वर्थान्तरपरत्वदर्शनेन शिव-शब्दस्य साधारणत्वात् साधारणोऽपि विधिभञ्जक इति चेत्सदेवेत्यादिशब्दात् शिव एवेत्यस्यानुवादरूपत्वमस्तु तस्मात्साधारणः शिव-शब्दोऽपि नारायणपर्यवसायीति । एको हवै-वाक्यस्य अनुवाद-

रूपत्वमस्तु तथाऽपि विष्णुस्तदासीद्धरिरेव निष्कल इत्यादिस्वसमानार्थवाक्यश्रवणात्तदनुवादित्वमेवेति न विरुद्धार्थपरवाक्यानुवादित्वम् । किञ्च शिवस्य कारणत्वमनुवदतीति चेत् न ब्रह्मा नेशान इत्यनन्तरवाक्यव्याहतिः त्र्यक्षशूलपाणिः पुरुषोऽजायत इत्युत्तरवाक्यव्याहतिश्च, तस्मान्नारायणस्यैव परमकारणत्वप्रतिपादकमिदं वाक्यमित्यभिप्रायः । अत्र शिव-शब्दः साधारण एव व्युत्पन्नः तस्मात्साधारणः शिव-शब्दोऽपि नारायणपर्यवसायीति अन्नेको ह वा इत्यादिवाक्यं नारायणकारणत्वविधायकमेवेति विष्णुस्तदासीद्धरिरेव निष्कल इत्यादीनि कारणवाक्यान्यप्यनुसंधेयानि । अथोक्तार्थे प्रमाणान्तरं च वक्ष्यन्नर्थाद्धिरण्यगर्भस्य कारणत्वशङ्कां च निराकरोति यमन्तरित्यादिना, अत्र समुद्रशायित्वलिङ्गेन अस्य प्रकरणस्य नारायणपरत्वनिश्चयार्थं यमन्तस्समुद्र इति वाक्यमुपात्तम्, आदि-शब्देन विद्युतः पुरुषादधीत्युक्तं विद्युद्वर्णपुरुषत्वं च विवक्षितं वेदाहमेतं

सर्वस्मात् परत्वमस्य प्रतिपाद्य न तस्येशे कश्चनेति तस्मात्परं किमपि न विद्यते ।

महान्तमादित्यवर्णं तमसस्तु पार इति श्रुतेर्विद्युद्वर्णपुरुषत्वं हि परमपुरुषलिङ्गं जगत्कारणत्व*सर्वेश्वरत्वमोक्षप्रदत्वरूपपरत्वदर्शनार्थं नैनमूर्द्ध्वमित्यादिवाक्यमुदाहृतम्, अद्भ्यः सम्भूत इत्युत्तरनारायणैकवाक्यत्वाच्च नारायणपरत्वमाह अद्भ्य इति, अद्भ्यः सम्भूत इत्यनुवाकस्य कथं नारायणपरत्वमित्यत्राह तच्चेति, वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तादिति वाक्येन महापुरुषप्रकरणत्वावगमाल्लक्ष्मीपतित्वलिङ्गाच्च अद्भ्यः संभूत इत्यनुवाकस्य नारायणपरत्वमित्यर्थः । सहस्रशीर्षा पुरुष इत्यनुवाकस्य कथं नारायणपरत्वं पुरुष-शब्दोऽप्यन्यवाची स्यादिति चेत् उच्यते सहस्रशीर्षा पुरुष इत्युपहितां पुरुषेण नारायणेन यजमान उपतिष्ठते नारायणाभ्यामुपस्थानम् उत्तरनारायणेनादित्यमुपतिष्ठते इत्यादिकल्पसूत्रकारनिर्देशान्नारायणपरत्वं सिद्धम् । अथर्ववेदोक्तेष्वष्टादशमहाशान्तिक-

* जगत्कारणत्वानन्येश्वरत्वेति पा० ।

र्मसु वैष्णव्यां महाशान्त्यां श्रीपुरुषसूक्तं विनियुक्तं वैष्णव्यां पुरुषसूक्तमिति आद्यया ऽऽवाहयेद्देवमृचा तु पुरुषोत्तममित्यादिना शौनकादिभिर्भगवत्समाराधने च विनियुज्यते, स्मृतिवचनं च पुरुषस्य हरेः सूक्तमिति सुबालोपनिषदि च चक्षुश्च द्रष्टव्यं च नारायणः श्रोत्रं च श्रोतव्यं च नारायण इत्यादिना

इति च प्रतिषिध्य अद्भ्यः सम्भूतो हिरण्यगर्भ इत्यष्टाविति तेनैकवाक्यतां गमयति, तच्च महापुरुषप्रकरणं ह्रीश्च ते लक्ष्मीश्च पत्न्याविति च नारायण*स्यैवेति द्योतयति, अयमर्थो नारायणानुवाके प्रपञ्चितः

नारायणात्मकत्वं सर्वस्योक्त्वा पुरुष एवेदं सर्वमिति पुरुषात्मत्वेनोपसंहृतं सहस्रशीर्षं देवं, विश्वमेवेदं पुरुष इति नारायणानुवाकस्यसहस्रशीर्षपुरुषशब्दाभ्यां सहस्रशीर्षा पुरुष इति प्रत्याभिज्ञापिताभ्यां च तयोर्नारायणपरत्वं गम्यते, महादेवं महापुरुषं वाचयेदिति प्रयोगाच्च वेदाहमेतं पुरुषं महान्तमिति पुरुष - शब्दस्य साधारण्यशङ्का दूरोत्सारिता। एवं पुरुष–शब्दस्य नारायणपरत्वं निश्चीयते अम्भस्यपार इत्याद्यनुवाक एवोक्ताभ्यां समुद्रशायित्व–विद्युद्वर्णपुरुषत्वलिङ्गाभ्यां महापुरुषप्रकरणत्वलक्ष्मीपतित्वलिङ्गान्वितोत्तरनारायणेनैकवाक्यत्वाच्चेदं प्रकरणं नारायणपरम्, एतदेकवाक्यत्वाद्धिरण्यगर्भः समवर्तताग्र इत्यादिकमपि नारायणपरमित्यर्थः। एवं नारायणस्यैव परमकारणत्वे श्रीपुरुषसूक्तादिकं प्रमाणतयोक्तं, चतुर्मुखकारणत्वं च अर्थाच्चिरस्तं हिरण्यगर्भ इत्यादीनामृचां भगवत्समाराधने हविर्निवेदने विनियोगाच्च हिरण्यगर्भोभूगर्भ इति भगवति प्रयोगाच्च हिरण्यगर्भशब्दस्य नारायणपरत्वं सिद्ध्यति। अथ नारायणानुवाकमपि प्रमाणत्वेनाह अयमर्थ इति, प्रपञ्चित इति, न केवलं समुद्रशायित्वादिना लभ्यते अपि तु कण्ठोक्त इत्यभिप्रायः। नारायणानुवाकः कः तत्रार्थस्य प्रपञ्चितत्वं कथ-

* नारायण एवेति पा०।

मित्यत्राह सहस्रेति, प्रपञ्चितत्वमुपपादयति सर्वेति, इदं तावत्सर्वविद्योपास्यविशेषनिर्णयपरं दहरविद्याप्रकरणत्वादेव तच्छेषभूतमिति चेन्न प्रकरणादपि बलीयसा वाक्यप्रमाणेन सर्वविद्याशेषत्वावगमात्प्रकरणान्तराधीतविद्यानां प्रकरणान्तरस्थमिदं कथमुपास्यविशेषसमर्पकमिति चेदुच्यते यथा प्रकरणान्तरस्थेन जुह्वा जुहोतीति वाक्येन होमसाधनतया विहितामपि जुहूं प्रकरणान्तरस्थमपि यस्य पर्णमयी जुहूरिति वाक्यं जुहू-शब्दप्रत्यभिज्ञापितामनूद्य तस्याः पर्णमयत्वं विदधाति जुह्वा द्रव्यविशेषस्याकाङ्क्षित्वाद्योग्यत्वाच्च, एवं तत्तद्विद्यासूपास्यत्वेन विहितं वस्तु किमित्यपेक्षायां तत्तच्छब्दप्रत्यभिज्ञापितं तत्तदनूद्य तस्य नारायणत्वं विधीयत इत्युपपन्नमित्येतदभिप्रायेण सर्वशाखासु इत्युक्त, तत्तद्गुणयोगेन तत्तच्छब्दानां नारायणवाचित्वमित्याह तत्तदिति, विश्वमेवेदं पुरुष इति सामानाधिकरण्यस्यार्थमाह समस्तस्येति,तदायत्तत्व-तन्नियाम्यत्व-तच्छेषत्व-तद्व्याप्यत्वैस्तादात्म्यमित्यर्थः। तदिदमत्रैव स्पष्टं व्याप्य नारायणः स्थितः, पतिं विश्वस्य तद्विश्वमुपजीवति। पतित्वं शेषित्वं विश्वोपजीव्यत्वं धारकत्वेन नियमनं चार्थसिद्धम्। एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादिना नियमनेन धारकत्वश्रवणात्तस्माद्यथोक्त एव सामानाधिकरण्यस्यार्थः नारायणपरं ब्रह्मेत्यत्र नारायणात्परमिति केचिदवैदिका विदुः तदयुक्तं महोपनिषदि नारायणः परं ब्रह्मेति पदविच्छेदेनाधीत्वात्, तत्त्वं नारायणः पर इत्यादिप्रकरणविरोधाच्च सुपां सुलुगित्यादिना लुप्तविभक्तिकमिदं पदं समस्तत्वेऽपि निषादस्थपतिन्यायेन प्रथमाविभक्त्यर्थत्वमेव न्याय्यम्। लैङ्गे च-अहमेव परं ब्रह्म परन्तत्त्वं पितामहः। अहमेव परं ज्योतिः परमात्मा त्वहं विभुः॥ इति भगवद्वचनाच्च प्रथमार्थः। स ब्रह्मा स शिव इति सामामानाधिकरण्यस्यार्थमाह ब्रह्मेति, इन्द्रादीत्यादि-शब्देन परमस्स्वराडिति मुक्तसामानाधिकरण्यं विश्वमेवेदं पुरुष इति विश्वजगत्सामानाधिकरण्यं च विवक्षितम्। इन्द्रसामानाधिकरण्यमुक्तसामानाधिकरण्यं विश्वजगत्सामानाधिकरण्यं च हि विभूतित्वकृतं, तद्वदेव ब्रह्मशिवसामानाधिकरण्यं चेत्यर्थः परमस्स्वराडिति

मुक्तात्मोच्यते तत्र परम-शब्देन कैवल्यमोक्षव्यावृत्तिः। यद्वा जीवस्यावस्थासु सर्वास्वतः परं निरतिशयावस्थान्तरं नास्तीति परम-शब्दार्थः ननु एतदनुवाक्यजातं शम्भुशिवादिशब्दानुगुण्येन नेयं न त्वितरानुगुण्येन तेषां ज्ञेयत्वमिति शङ्कायां वैषम्यमाह केवलेति, अत्रानुवाके कस्यचिदर्थान्तरस्य विधानादर्शनादिदमनन्यपरमुपास्यविशेषैकनिर्णयपरमित्यर्थः। अन्यानि त्वन्यपराणीत्याह अस्मिन्निति, यथा यस्य पर्णमयी जुहूरिति वाक्ये पर्णमयत्वेनोक्तस्य जुह्वा जुहोतीति होमसाधनत्वविधिस्तथाऽत्र सर्वस्मात्परत्वेनोक्तस्य नारायणस्य ब्रह्म विदाप्नोतीत्यादिषु मुमुक्षूपास्यत्वविधिरित्यर्थः। दहरं विपाप्ममित्यादिना पूर्वानुवाकोक्तस्यार्थस्य पद्मकोशप्रतीकाशमित्यत्र प्रतिपादितत्वाद्दहरोपासनपरमिति चेद् दहरविद्यायाः प्रकृताया उपास्यविशेषाकाङ्क्षायां न केवलमस्यामेवोपास्यो नारायणः अपि तु सर्वासु विद्यासु स एवोपास्य इति दहरविद्याप्रसङ्गेन सर्वविद्योपास्यविशेषनिर्णय एवात्र क्रियत इति वाक्यप्रमाणावगतत्वात्सर्वविद्याशेषभूतम्।

सहस्रशीर्षं देवमित्यारभ्य स ब्रह्मा स शिवस्सेन्द्रः सोऽक्षरः परमः स्वराडिति सर्वशाखासु परतत्त्वप्रतिपादनपरानक्षर-शिव-शम्भु-परब्रह्म-परज्योतिः-परतत्त्व-परायण-परमात्मादि-सर्वशब्दान् तत्तद्गुणयोगेन नारायण एव प्रयुज्य तद्व्यतिरिक्तस्य समस्तस्य तदायत्ततां तद्व्याप्यतां तदाधारतां तन्नियाम्यतां तच्छेषतां तदात्मकतां च प्रतिपाद्य ब्रह्मशिवयोरपीन्द्रादिसमानाकारतया तद्विभूतित्वं च प्रतिपादितम्। इदं च वाक्यं केवलपरतत्त्वप्रतिपादनैकपरम् अन्यत् किञ्चिदप्यत्र न विधीयते।

तत्र दहरविद्याया अप्युपास्योऽनेन निर्णीतो भवतीति, तत्र पूर्वप्रस्तुते दहरं विपाप्ममित्यादौ वक्तव्यांशसद्भावात्तदत्रोक्तमिति नात्रोपा-

सनविधिपरत्वम् । एवं स्वपक्षसाधनत्वेन कारणवाक्यानि श्रीपुरुषसूक्तं नारायणानुवाकवाक्यं चोदाहृतम् । अयं क्रमो भगवद्यामुनाचार्यानुरोधेन कृतः, तत्प्रणीते *स्तोत्रे नावेक्षसे इत्यादिना कारणवाक्यानि विवक्षितानि, वैदिकः क इत्यनेन श्रीपुरुषसूक्तं विवक्षितं, वैदिको—वेदाध्यायी—इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते इति वचनात्, न हि कश्चिदपि वैदिकः श्रीपुरुषसूक्तानध्यायीति वैदिक—शब्दाभिप्रायः, एवं—ब्रह्मा† शिवः शतमख इति नारायणानुवाकोपसंहारवाक्यस्मरणेन नारायणानुवाको विवक्षितः, नारायणेति संबुद्ध्या नारायणानुवाकं स्मारयन् कारणवाक्यानां श्रीपुरुषसूक्तस्य च नारायणपरत्वं सूचयति, अतस्तदनुरोधेन अयं क्रम उक्तः । अत्र कठवल्ल्यादिश्रुतयो ऽप्यनुसन्धेयाः, कठवल्ल्यां सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये‡ इत्यारभ्य सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति ह्युक्तम्

अस्मिन्वाक्ये प्रतिपादितस्य सर्वस्मात्परत्वेनावस्थितस्य ब्रह्मणो वाक्यान्तरेषु ब्रह्मविदाप्नोति परमित्यादिषूपासनादि विधीयते, अतः प्राणं मनसि सह करणैरित्यादिवाक्यं सर्वकारणे परमात्मनि करणप्राणादि सर्वं विकारजातमुपसंहृत्य तमेव परमात्मानं सर्वस्येशानं ध्यायीतेति परब्रह्मभूतनारायणस्यैव ध्यानं विदधाति ।

एवं सर्वे वेदा यत्पदमामनन्तीति सर्ववेदवेद्यवस्तुकथनोपक्रमेण अनन्यपरं हि तत्प्रकरणम् । तथा मैत्रा§यणीयोपनिषदि च—एवं सवितुर्वरेण्यं ध्रुवमचलममृतं विष्णुसंज्ञं सर्वाधारं धामेति ध्रुवत्वाचलत्वादि-

* आलुवन्दारस्तवे ।

† अयमपि आलुवन्दारस्तवस्थः श्लोकः ।

‡ ब्रवीम्योम् इति पा॰ ।

§ मैत्रावरुणीयोपनिषदीति पा॰

विशिष्टतया वेदान्तोदितस्य वस्तुनो विष्णुसंज्ञत्वं विधीयते । अथ पूर्वपक्षे उदाहृतश्रुतीर्व्याचष्टे अत इत्यादिना, अतः कारणवाक्यैः श्रीपुरुषसूक्तेन अनन्यार्थनारायणानुवाकादिभिश्च नारायणस्य परमकारणत्वेन प्रतिपन्नत्वाद् ब्रह्मशिवयोस्तत्सृज्यत्व–तत्संहार्यत्वादिश्रवणाच्चेत्यर्थः । प्राणमित्यादिश्रुतेरर्थं संग्रहेणाह सर्वकारणेति, उपसंहृत्य परमात्मनि विकारजातोपसंहारमनुसन्धायेत्यर्थः । सर्वस्येशानं ध्यायीतेति सर्वस्य वशीति पूरकवाक्यान्वयप्रदर्शनं, तदर्थमाह परेति, ईशानत्वादिकं नारायणस्यैव मुख्यमीतीशानादिशब्दास्तस्यैव वाचका इत्याह पतिमिति, सर्वैश्वर्य इत्यादिवाक्यस्यार्थमाह अत इति, विश्वाख्यं विश्वशम्भुवमिति नारायणवाचित्वेन शम्भु-शब्दस्य प्रयोगदर्शनाच्छम्भुः स्वयंभूर्द्रुहिण इत्यर्थान्तरविषयत्वेन निघण्टुदर्शनाच्चेति भावः । शम्भुराकाशमध्ये ध्येय इति वाक्ये कारणत्वमपि विधेयं स्यादित्यत्राह–

पतिं विश्वस्येति, न तस्येशे कश्चन, इति च तस्यैव सर्वस्येशानता प्रतिपादिता, अत एव सर्वैश्वर्यसम्पन्नः सर्वेश्वरः शम्भुराकाशमध्ये ध्येय इति

कश्चेति, कारणत्वानुवादेन ध्येयताविधिपरमिदं वाक्यं प्रतीयते कश्च ध्येयः कारणं तु ध्येय इति प्रश्नप्रतिवचनाभ्यां, न हि किं कारणत्यत्र प्रश्नस्येदङ्कारणमिति प्रतिवचनं श्रूयते, तस्मात् कारणत्वानुवादेन ध्येयत्वं विधीयत इति निश्चीयते, कारणत्वानुवादश्च तत्प्रतिपादकवाक्यान्तरसापेक्षः अतस्तदानुगुण्येन अनुवादः कर्तव्य इति अनुवादरूपत्वात् कारण*स्यैव ध्येयत्वविधिरित्यर्थः । अनुवादरूपत्वमस्तु तथाऽपि शिव एव कारणत्वेनानूद्यतामित्यत्राह तस्यैवेति, परमकारणता शम्भुशब्दवाच्यता चेति, अयमभिप्रायः अनुवादरूपत्वेन वाक्यान्तरसापेक्षत्व.त् तद्विरुद्धार्थप्रतिपादनायोगात् नारायणस्यैव ध्येयत्वविधिः । कारणत्वं विधीयतां नाम तथाऽपि सद्ब्रह्मात्मादिशब्दवच्छम्भु-शब्दस्य सा-

* नारायणस्यैवेति पा॰ ।

मान्यशब्दत्वान्नारायण एव पर्यवसानं न्याय्यमिति शिवादिशब्दानां नारायण-शब्दापेक्षया साधारणत्वाद्बहुरूपनिषत्सु नारायणादिशब्दनिर्देशात् तत्राप्येकैकत्र नारायण-शब्दाभ्यासाच्च तदानुगुण्येनार्थो वर्णनीय इति चात्रानुसन्धेयम् । ततो यदुत्तरतरमित्यादिश्रुतेरर्थमाह यदपीत्यादिना, तदपि प्रत्युक्तमित्यन्वयः ततो यदुत्तरमिति वाक्यात्पूर्वं यस्मात्परमित्यादिवाक्यान्तरस्यार्थं वक्तुमन्वयमाह यस्मादपरमिति, यस्मादिति पञ्चम्यन्तपदेन पर-शब्दस्यान्वये सति समनिषेधो-

नारायणस्यैव परमकारणस्य शम्भु-शब्दवाच्यस्य ध्यानं विधीयते, कश्च ध्येय इत्यारभ्य कारणं तु ध्येय इति कार्यस्याध्येयतापूर्वककारणैकध्येयतापरत्वाद्वाक्यस्य, तस्यैव नारायणस्य परमकारणता शम्भु-शब्दवाच्यता च परमकारणप्रतिपादनैकपरे नारायणानुवाक एव प्रतिपन्नेति तद्विरोध्यर्थान्तरपरिकल्पनं कारणस्यैव

न कृतः स्यात्, अपर-शब्देन पञ्चम्यन्तपदस्यान्वये सति समाभ्यधिकोभयनिषेधः कृतः स्यात्, तथा सति नान्यः पन्था इति पुरुषवेदनस्यैव मोक्षोपायत्वप्रतिज्ञानस्य प्राकरणिकस्याप्यानुगुण्यं पञ्चम्यन्तपदस्यान्य-शब्देनान्वयश्च श्रुतिस्मृतिषु दृश्यत इति नेत्येतस्मादन्यत्परमस्ति तस्मा द्वान्यन्न परं किञ्चनास एकः समस्तं यदिहास्ति किञ्चित् तदच्युतो नास्ति परं ततोऽन्यदित्यादिषु न तत्समश्चाभ्यधिकश्च दृश्यते इति श्रुत्यैकार्थ्यं च । यस्मात्परमित्यन्वयेऽपि पुरुषादन्यस्य परत्ववादोऽनुपपन्न एव । केश्चिदेवं व्याख्यातं परमित्युत्कृष्टनिषेधः अपरम् इति समनिषेध इति, तदयुक्तम् अन्यपर्यायस्यापर-शब्दस्य समवाचित्वा*भावात् समानविभक्त्यन्तपदयोः स्वतःप्राप्तसामानाधिकरण्यभङ्गात् व्यधिकरणत्वसूचकशब्दाद्यभावाच्च तस्माद्यथोक्त एवार्थः । यस्मान्नाणीयो न ज्यायोऽस्ति

* समवाचित्वास्वारस्यादिति पा० ।

कश्चिदित्येतद्व्याचष्टे अणीयस्त्वमिति, ज्यायस्त्वमिति, ज्यायस्त्वं धारकत्वं नियन्तृत्वादिगुणैरुत्कृष्टत्वमत्र च नियन्तृत्वेन ज्यायस्त्वं विवक्षितं प्रशासितारं सर्वेषामणीयांसमणीयसामित्यादिवचनानुसारात् यस्मात्परन्नापरमित्यादिवाक्ये

ध्येयत्वेन* विधिवाक्ये न युज्यते । यदपि ततो यदुत्तरतरमित्यत्र पुरुषादन्यस्य परतरत्वं प्रतीयत इत्यभ्यधायि तदपि यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् यस्मादपरं यस्मादन्यत् किञ्चिदपि परं नास्ति केनापि प्रकारेण पुरुषव्यतिरिक्तस्य परत्वं नास्तीत्यर्थः, अणीयस्त्वं—सूक्ष्मत्वं, ज्यायस्त्वं—सर्वेश्वरत्वं सर्वव्यापित्वात् सर्वेश्वरत्वादस्य, एतद्व्यतिरिक्तस्य वा कस्याप्यणीयस्त्वं ज्यायस्त्वं च नास्तीत्यर्थः । यस्मान्नाणीयो न ज्यायोऽस्ति कश्चिदिति पुरुषादन्यस्य कस्यापि ज्यायस्त्वं निषिद्धमिति

पुरुषादन्यस्य परत्वनिषेधात् तद्विरुद्धं तदन्यस्याधिकत्वप्रतिपादनपरत्वं व्याहतमित्यर्थः । यस्मात्परमिति वाक्ये परत्वनिषेधो वक्ष्यमाणपरव्यतिरिक्तविषयः गोबलीवर्दन्यायादिति शङ्कायाम् अनन्यथासिद्धस्यैव सङ्कोचकत्वात् ततो यदुत्तरतरमिति वाक्यस्य चान्यथासिद्धत्वाद् यस्मात्परमिति वाक्ये पर-शब्दो न सङ्कोचयितव्य इति सिद्धान्तिनो मतमभिप्रेत्य अस्य वाक्यस्य अन्यथा निर्वाहः कथमित्याह कस्तर्हीति, अस्यार्थं वक्तुं प्रकरणं योजयति अस्येति, उक्तप्रकरणवाक्यानुगुण्येन ततो यदुत्तरतरमिति वाक्यस्यार्थमाह यत इति, अरूपं—कर्म्मकृतप्रकृतिसम्बन्धरहितम् । अनामयं—तत्कृतसुखदुःखादिरहितमित्यर्थः । तत इति पञ्चम्यन्तपदं हेत्वर्थपरत्वेन योजितम् । अन्यथा दूषणमाह अन्यथेति,

* ध्येयत्वविधिवाक्ये इति पा० ।

तस्मादन्यस्य परत्वं न युज्यते इति प्रत्युक्तं, कस्तर्ह्यस्य वाक्यस्यार्थः—अस्य प्रकरणस्योपक्रमे तमेवं विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते अयनायेति पुरुषवेदनस्यामृतत्वे* हेतुतां तद्व्यतिरिक्तस्यापथतां च प्रतिज्ञाय—यस्मात् परं नापरमस्ति किञ्चित्तेनेदं पूर्णं पुरुषेण सर्वमित्येतदन्तेन पुरुषस्य सर्वस्मात् परत्वं प्रतिपादितं, यतः पुरुषतत्त्वमेवोत्तरतरं ततो यदुत्तरतरं पुरुषतत्त्वं तदेवारूपमनामयं ये एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापियन्तीति पुरुषवेदनस्यामृतत्वहेतुत्वं तदितरस्य चापथत्वं प्रतिज्ञातं सहेतुकमुपसंहृतम्, अन्यथोपक्रमगतप्रतिज्ञाभ्यां विरुध्यते पुरुषस्यैव शुद्धिगुणयोगेन शिव-शब्दाभिधेयत्वं शाश्वतं शिवमच्युतमित्यादिना ज्ञातमेव पुरुष एव शिवशब्दाभिधेय इत्यनन्तरमेव वदति—महान्

उपक्रमगतप्रतिज्ञाभ्यां पुरुषवेदनस्य मुक्तिहेतुत्वप्रतिज्ञया तदन्यस्यानुपायत्वप्रतिज्ञया चेत्यर्थः। हेत्वर्थत्वाभावेऽपि न पुरुषादन्यत्वसिद्धिः प्रथमाद्विनिर्दिष्टस्य शब्दप्राधान्यं वैयाकरणन्यायसिद्धमिति पुरुषेण सर्वमिति सर्व-शब्दार्थस्य जगतः प्रथमानिर्दिष्टत्वादव्यवहितत्वाच्च तच्छब्दस्य तत्परामर्शित्वस्यैव युक्तत्वात्तत इति पदेन तेनेदं पूर्णं पुरुषेण सर्वमिति प्रथमानिर्दिष्टं जगद् गृहीतम् इति जगत उत्तरः परः पुरुष एवाभिधीयते इति केचिदाचार्याः, तच्चोपपन्नम् एवमुपक्रमगतप्रतिज्ञाऽनुरोधेन यस्मात्परमित्यादिवाक्यकृताधिकनिषेधानुरोधेन च ततो यदुत्तरतरमिति वाक्यं पुरुषस्यैव परत्वपरमुक्तम्। सर्वाननशिरोग्रीव इत्यादिवाक्यावगतस्य शिव-शब्दस्य अर्थमाह पुरुषस्यैवेति, आदि-शब्देन सर्वः शर्वः शिवः

* अमृतत्वहेतुतामिति पा· ।

स्थाणुः, शिवं कर्म्मास्त्वित्यादिप्रयोगो विवक्षितः, सर्वाननशिरोग्रीवत्वं च सहस्रशीर्षा पुरुष इत्यस्य प्रत्यभिज्ञापकं, भगवच्छब्दस्तु पुरुषज्ञापक इति अनुसन्धेयम् । उत्तरत्रापि पुरुषप्रतिपादनाच्छिव-शब्दः पुरुषपर इत्याह पुरुष इति, महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्त्तक इत्यत्र एष-इति पदेन शिव-शब्दाभिहितः प्रत्यभिज्ञापितः, एवं कारणवाक्यबलादुपास्यविशेष-निर्णयपरनारायणानुवाकेन च नारायणस्यैव परत्वमुक्तम् । एवं देवतान्त-रस्यापि परत्वे न सन्न चासदिति कारणवाक्यं यः परः स महेश्वर इत्यु-पास्यविशेषणनिर्णयपरवाक्यं चास्तीत्यत्राह उक्तेनैवेति, उक्तेनैव न्यायेन, कारणवाक्यैर्नारायणस्यैव परमकारणत्वप्रतिपादनादनन्यपरनारायणानु-वाकादिभिस्तस्यैव सर्वस्मात्परत्वनिश्चयाद्ब्रह्मरुद्रादीनां तत्सृज्यत्व-संहार्यत्वश्रवणाच्चार्थान्तरेषु दृष्टप्रयोगाणां शिवमहेश्वरादिशब्दानां सा-धारणत्वात्तेषां नारायणपरत्वेन प्रयोगदर्शनाद्बह्वीषूपनिषत्सु नारायणादि-शब्दनिर्देशादेकैकत्रैवोपनिषदि नारायणादिशब्दाभ्यासाच्च शिवादिश-ब्दोऽपि सद्ब्रह्मादिशब्दवत् नारायणपर्यवसायीत्यर्थः । तत्र यद्वेदादौ स्वर इत्यादिवाक्यस्य न केवलं प्रकरणान्तरवाक्यैर्नारायणपरत्वनिश्चयः अपि तु तस्यैव पूर्व्वापरपर्यालोचनया च नारायणपरत्वं गम्यत इत्याह किञ्चेति, अस्य वाक्यस्य पुरुषादन्यस्योत्कर्षपरत्वं प्रथमानुवाकोक्तपुरुष-व्यतिरिक्तपरत्वनिषेधव्याहतमिति दर्शयितुं न तस्येशे इत्याद्युक्तं, यद्वेदा-दावित्यस्यार्थमाह वेदाद्यन्तेति, वेदस्य प्रणव उत्पादकत्वादादिस्तल्लय-स्थानत्वादन्तश्चेत्यभिप्रायेण वेदाद्यन्तरूपतयेत्युक्तम्, अत एव वेदबीजभूतः प्रणवः । तस्य प्रकृतिलीनस्येति पदं व्याचष्टे प्रकृतिभूताकारवाच्यतयेति, प्रकृतिलीनत्वं नाम प्रकृतिभूताकारावस्यत्वम् ।

प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः । इति, उक्तेनैव न्यायेन न सन्न चासच्छिव एव केवल इत्यादि सर्वं नेयं, किञ्च न तस्येशे कश्चनेति निरस्तसमाभ्यधिकस-म्भावनस्य पुरुषस्याणोरणीयानित्यस्मिन्ननुवाके वेदा-

द्यन्तरूपतया वेदबीजभूतप्रणवस्य प्रकृतिभूताकार-वाच्यतया महेश्वरत्वं प्रतिपाद्य दहरपुण्डरीकम-ध्यस्थाकाशान्तरवर्तितयोपास्यत्वमुक्तम् ।

अकारावस्थप्रणववाच्यत्वं नामाकारवाच्यत्वमेवेत्यर्थः । अकारेणो-च्यते विष्णुः सर्वलोकेश्वरो हरिः । अकारो विष्णुवाचक इति श्रुतिस्मृति-वचनादकारवाच्यस्य नारायणस्यैव महेश्वरत्वमुक्तमित्यर्थः । दहरेति यद्वे-दादाविति वाक्ये देवतान्तरस्य परत्वकथनात्तदेव दहरपुण्डरीकान्तरुपास्य-मिति चेत् तत्रापि नारायणस्यैव महेश्वरत्वप्रतिपादनात्स एव दह-रपुण्डरीकेऽप्युपास्य इत्यर्थः । अस्मिन् वाक्ये प्रणववेदयोरकारप्रणव-योश्च प्रकृतिविकृतिभावः कथमवगतः अकारप्रसङ्गश्च कः, तद्वाच्यत्वपरः शब्दः क इत्यपेक्षायामाह अयमर्थ इति, यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठित इत्यनेनैव प्रकृतिविकृतिभावः सिद्धः, प्रकृतिलीनस्येत्यनेन अका-रश्चावगतः, यः पर इति पर—शब्देन वाच्यत्वं चावगतम्, इदं परस्तात् पर इत्यादिषु पर—शब्दस्य वाच्यत्वार्थत्वादित्यर्थः । तर्ह्यकारस्य पर इति वक्तव्यं प्रकृतिलीनस्येति वचनव्यक्तेः कोऽभिप्रायः । अकारवाच्यस्यैव महेश्व-रत्वे कथं नारायणस्य परत्वसिद्धिरित्यत्राह सर्ववाचकेति,

अयमर्थः सर्वस्य वेदजातस्य प्रकृतिः प्रणवः उक्तः, प्रणवस्य च प्रकृतिरकारः, प्रणवविकारो वेदः स्वप्रकृतिभूते प्रणवे लीनः, प्रणवोऽप्यकारविकारभूतः स्वप्रकृतावकारे लीनस्तस्य प्रणवप्रकृतिभूतस्याका-रस्य यः परो वाच्यः स एव महेश्वर इति सर्ववाच-कजातप्रकृतिभूताकारवाच्यः सर्ववाच्यजातप्रकृतिभू-तनारायणोयः स महेश्वर इत्यर्थः ।

वाच्यजातप्रकृतिभूतो वाचकजातप्रकृतिभूतेन वाच्य इति ज्ञापनं

प्रकृतिलीनस्येति वचनव्यक्तेः प्रयोजनं वाच्यजातप्रकृतिभूतस्य नारायणत्वं वाक्यान्तरावगतमिति भावः । भगवतो नारायणस्य वाच्यजातप्रकृतित्वे अकारस्य वाचकजातप्रकृतित्वे च भगवद्वचनमाह यथोक्तमिति, अक्षराणामकारोऽस्मीत्यनेन वाच्यवाचकभावसम्बन्धश्च लब्धः । नारायणस्य अकारवाच्यत्वे श्रुतिमाह अ इति ब्रह्मेति, अकारस्य वाचकजातप्रकृतित्वेऽपि श्रुतिमाह अकारो वै इति, वाचकजातस्य अकारप्रकृतित्वमिति ज्ञायत इत्यर्थः । ब्रह्मणो वाच्यजातप्रकृतित्वं श्रुतिसिद्धमित्याह वाच्येति, उक्तं निगमयति अत इति, एवं महेश्वर-शब्दस्य साधारणत्वात्तत्प्रकरणपर्यालोचनया च नारायणपरत्वमुक्तं नारायणस्यैव तत्तच्छब्दवाच्यस्य परत्वमुत्तरानुवाके कण्ठोक्तमपीत्याह तस्यैवेति, विश्वाधिको रुद्रो महर्षिः प्रजापतिः प्रजा असृजतेत्यादिष्वन्येष्वपि वाक्येषु शिवादेः कारणत्वमाशङ्क्याह अनेनेति, विश्वाधिको रुद्र इत्यादिवाक्यान्यपि अन्यपरत्वादुक्तार्थानुगुणत्वेन वर्णनीयानीत्यर्थः । केनापि शब्देन प्रतीयमानं तदेवास्तु ततः किमित्यत्राह तदेतदिति,

यथोक्तं भगवता—अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ! अक्षराणामकारोऽस्मि इति, अ इति ब्रह्मेति च श्रुतेः, अकारो वै सर्वा वागिति च वाचकजातस्याकारप्रकृतित्वं, वाच्यजातस्य ब्रह्मप्रकृतित्वं सुस्पष्टम् । अतो ब्रह्मणोऽकारवाच्यताप्रतिपादनादकारवाच्यो नारायण एव महेश्वर इति सिद्धं, तस्यैव सहस्रशीर्षं देवमिति केवलपरतत्त्वविशेषप्रतिपादनपरेण नारायणानुवाकेन सर्वस्मात्परत्वं प्रपञ्चितम्, अनेनानन्यपरेण प्रतिपादितमेव परतत्त्वमन्यपरेषु सर्ववाक्येषु

इन्द्रादितुल्यतयेति आदि-शब्देन विश्वमुक्तात्मविवक्षाऽस्ति । प्रसिद्ध-ब्रह्मशिवयोः परत्वाभावे दृष्टान्तमाह क्वचिदिति, विश्वाधिको रुद्र इत्यस्यायमर्थः-अत्र स नो देवः शुभया स्मृत्या संयुनक्तु इति स्वाभिमत-प्रार्थनातात्पर्याद्धिरण्यगर्भं प्रति कारणत्वमनूद्यते एव अनुवादस्य च वाक्यान्तरसापेक्षस्य तदानुगुण्येन वर्णनीयत्वात्केनचिद्गुणयोगेन रुद्र-शब्दो नारायणपरः चतुर्मुखकारणत्वं च तस्यैवेति स्पष्टं पश्यत, । अपश्यत्स्व-स्माज्जायमानम् इत्यध्याहारः । एवं वा योजना रुद्र-शब्दः प्रसिद्धरुद्रपर एव स च महर्षिः त्रिकालज्ञानवत्तया सर्वोत्कृष्टः स स्वकारणभूतं हिरण्यगर्भमपि कालत्रयज्ञानवत्तया जायमानावस्थमपश्यत् । य एव-मपश्यत्स शुभया स्मृत्या भगवत्स्मरणेन मां संयुनक्त्वित्यर्थः, ईश्वराज्ज्ञानमन्विच्छेत्, उपास्योऽहं सदा विप्राः, उपायोऽस्मि हरेः स्मृतौ, । शङ्क-रस्य तु यो भक्तः सप्तजन्मान्तरं नरः । तस्यैव तु प्रसादेन विष्णुभक्तः स जायते ॥ इत्यादिभीरुद्रस्य भगवज्ज्ञानप्रदत्वप्रतिपादनात् ॥

केनापि शब्देन प्रतीयमानं तदेवेत्यवगम्यत इति शास्त्रदृष्ट्या तूपदेशो वामदेववदिति सूत्रकारेण निर्णीतं, तदेतत्परं ब्रह्म क्वचिद् ब्रह्मशिवादिशब्दादवगत-मिति केवलब्रह्म-शिवयोर्न परतत्त्वत्वप्रसङ्गः । अ-स्मिन्ननन्यपरेऽनुवाके तयोरिन्द्रादितुल्यतया तद्विभू-तित्वप्रतिपादनात्, क्वचिदाकाशप्राणादिशब्देन परं ब्रह्माभिहितमिति भूताकाशप्राणादेर्यथा न परत्वम् । यत्पुनरिदमाशङ्कितम् अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर-

हिरण्यगर्भकारणत्ववादिनः प्रष्टव्याः किमण्डान्तर्वर्तिसृष्टिः प्रजा-पतिः प्रजा असृजतेत्युच्यते उत परमकारणत्वमुच्यत इति प्रथम-कल्पोऽभ्युपेतः, द्वितीयस्तु प्रजापत्यादिशब्दानां साधारणत्वादन्यत्र च

चतुर्मुखादेः सृज्यत्वादिश्रवणाच्च बहुकारणवाक्याविरोधेन नेय इति प्रत्युक्त इति । अथ व्योमातीतवादं हृदि निधाय तं समूलमुन्मूलयितुं तत्परिपाटीमुपन्यस्यति यत्पुनरिति, आकाशान्तर्वर्तिनः कस्यचिदन्वेष्टव्यता स्यात् ततः किमित्यत्राह अस्येति, एतत्प्रतिक्षिपति अनधीतेति, अनधीतवेदानाम् अदृष्ट*शास्त्रविदामिदं चोद्यमिति दहरविद्यायाः पूर्व्वापरवाक्यमप्यनधीतं, वाक्यकारग्रन्थादयश्चादृष्टास्तैरिति भावः । कथमित्यत्राह यत इति, कथं श्रुतिरेव परिहरतीत्यत्राह दहरोऽस्मिन्निति, अस्याकाश-शब्दवाच्यस्येति,

आकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति, अत्राकाश-शब्देन जगदुपादानकारणं प्रतिपाद्य तदन्तर्वर्त्तिनः कस्यचित्तत्त्वविशेषस्यान्वेष्टव्यता प्रतिपाद्यते। अस्याकाशस्य नामरूपयोर्निर्वाहकत्वश्रवणात्पुरुषसूक्ते पुरुषस्य नामरूपयोः कर्तृत्वदर्शनाच्चाकाशपर्यायभूतात्पुरुषादन्यस्यान्वेष्टव्यतयोपास्यत्वं प्रतीयत इति, अनधीतवेदानामदृष्टशास्त्रविदामिदं चोद्यं यतस्तत्र श्रुतिरेवास्य परिहारमाह, वाक्यकारश्च दहरोऽस्मिन्नन्तरराकाशः किं तत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति चोदिते यावान्वाऽयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इत्यादिना

वक्ष्यमाणगुणजातमाकाशान्तर्वर्तिस्वतन्त्रवस्त्वन्तर्गतमिति शङ्काशमनाय यावान् वाऽयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इति वाक्यस्याकाश-शब्देन पूर्वोक्त आकाश-शब्दः स्मारितः स्पष्टम् । ननु किं तत्र

* शास्त्रविदोऽपि यैर्न दृष्टास्तेषां शास्त्राध्ययनकथा तु दूरनिरस्तेति भावः ।

विद्यत इति चोद्यानन्तरमुभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते इत्यादिना इत्यादिना द्यावापृथिवीविद्युन्नक्षत्रादीनामाकाशवर्तित्वं प्रतीयत इति न गुणजातस्य प्रतीतिरिति शङ्कायामाह एतदुक्तं भवतीति, उक्तद्युपृथिव्यादीनां स्रष्टृत्वधारकत्वादिगुणगणोऽपहतपाप्मत्वादिगुणगणश्च विवक्षित इत्यर्थः । कथं वाक्यकारेण परिहृतमित्यत्राह तथा चेति, काम्यस्पृहास्मराः कामा इति निघण्टुः । गुणिव्यतिरेकेण कथं गुणानामुपास्यत्वमिति शङ्कायामाह एतदुक्तमिति, उभयमप्यन्वेष्टव्यं तच्छब्दनिर्दिष्टस्यैवान्वेष्टव्यत्वान्नोभयमिति चेन्न तच्छब्द उभयपरो नेयः । यच्छब्दनिर्दिष्टं गुणाष्टकमेवेति तच्छब्दोगुणमात्रपर इति चेन्न

अस्याकाश–शब्दवाच्यस्य परमपुरुषस्यानवधिकमहत्त्वं सकलजगत्कारणतया सकलजगदाधारत्वं च प्रतिपाद्य–तस्मिन्कामास्समाहिता इति अपहतपाप्मत्वादि सत्यकाम–शब्देन सत्यसङ्कल्पत्वपर्यन्तगुणाष्टकं निहितमिति परमपुरुषवत्परमपुरुषगुणाष्टकस्यापि पृथग् विजिज्ञासितव्यत्वप्रतिपिपादयिषया तस्मिन् यदन्तस्तदन्वेष्टव्यमित्युक्तमिति श्रुत्यैव सर्वं परिहृतम्, एतदुक्तं भवति किं तदत्र विद्यते यदन्वेष्टव्यमित्यस्य चोद्यस्यास्मिन्सर्वस्य जगतः स्रष्टृत्वमाधारत्वम्

तच्छब्द एवोभयपरः । ननु यः आकाशः यद्गुणजातमिति पुँल्लिङ्गनपुंसकलिङ्गरूपयच्छब्दद्वयं स्यात्तदत्र नास्तीति चेत् त्यदादीनि सर्वैर्नित्यमिति त्यदादीनामेकशेषत्वविधानात्तदन्यतम–यच्छब्दस्यैकशेषत्वमवगम्यते, नपुंसकमनपुंसकेनैकवच्चान्यतरस्यामिति सूत्रेण नपुंसकानपुंसकसन्निपाते नपुंसकस्यैकशेषत्वमेकवद्भावश्च विधीयत इति अत्र योयदिति पुँल्लिङ्गनपुंसकरूपयच्छब्दद्वयोपनिपाते यदिति नपुंसकस्यैकस्यैक-

शेष्यमेकवद्भावश्चेति निश्चीयते, तस्माद्यच्छब्देनोभयं विवक्षितमिति निखिलजगदुदयेत्यादिविशेषणमाकाशो ह वै नामरूपयोर्निर्वहितेति श्रुत्युक्तस्मारणम् । ननूभयस्यान्वेष्टव्यत्वे प्रामाणिके सति हि यच्छब्दस्यैव निर्वाहः कार्य इत्यत्राह यथाऽऽहेति, छान्दोग्ये आकाश-शब्दस्य परमात्मपरत्वमाश्रित्य हि सर्वत्राकाश-शब्दानां परमात्मपरत्वमापाद्य तदन्तर्वर्तिनः स्वतन्त्रवस्त्वन्तरत्वं व्योमातीतवादिभिरुच्यते अत्र छान्दोग्यश्रुतिनिर्वाहात्तेषां मूलघातः कृत इत्यभिप्रायेणैतावता विरतिः, यत्राकाशशब्दनिर्दिष्टस्य परमात्मासाधारणगुणश्रवणं तत्र स्वारस्यभङ्गेनाकाश-शब्दस्य परमात्मपरत्वमाश्रीयते ।

नियन्तृत्वं शेषित्वमपहतपाप्मत्वादयो गुणाश्च विद्यन्त इति परिहार इति, तथा च वाक्यकारवचनं-तस्मिन् यदन्तरिति कामव्यपदेश इति, काम्यन्त इति कामाः अपहतपाप्मत्वादयो गुणा इत्यर्थः । एतदुक्तं भवति-

अन्यत्र तु प्रसिद्धिप्राचुर्यात्स्वतः प्राप्त एवार्थः स्वीकृत इत्यर्थः, अनेन तत्रापि दहरं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यमित्यत्र विशोकशब्देन विशोको विजिघत्सोऽपिपिपास इत्यादिसमानप्रकरणोक्तगुणस्मरणात्तदन्तर्वर्तिनो गुणजातस्यान्वेष्टव्यत्वं प्रसिद्धं तस्याकाश-शब्दनिर्दिष्टस्याकारवाच्यत्वान्नारायणस्य महेश्वरत्वमुक्तं यद्वेदादाविति यत्र त्वाकाश-शब्दनिर्दिष्टस्य परमात्मासाधारणगुणाश्रवणं तत्राकाश-शब्दस्य प्रसिद्धार्थपरत्वात्तदन्तर्वर्तिनो नारायणत्वं स्यादिति च स्थितम् । अथ ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्ते इति विष्णोः कार्यत्वश्रवणात् परत्वत्रैकल्यशङ्कां व्युदस्यति यः पुनरिति, कारणस्य ध्येयताप्रतिपादनपरे वाक्य इति कश्च ध्येय इति कारणं तु ध्येय इति कारणत्वानुवादेन ध्येयताविध्यन्यपरत्वाद्वाक्यान्तरसापेक्षोऽनुवादः तदानुगुण्येन स्यादित्यनन्यपरवाक्योक्तं नारायणस्यैव परत्वं स्थितं, तस्य स्वेच्छया लोकरक्षणार्थमवतार इति

यदेतद्दहराकाशपदवाच्यं निखिलजगदुदयविभवलयलीलं परं ब्रह्म तस्मिन् यदन्तर्निहितमनवधिकातिशयमपहतपाप्मत्वादिगुणाष्टकं तदुभयमप्यन्वेष्टव्यं विजिज्ञासितव्यमिति, यथाऽऽह—अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामाँस्तेषां सर्वेषु लोकेषु कामचारो भवतीति, यः पुनः कारणस्यैव ध्येयताप्रतिपादनपरे वाक्ये विष्णोरनन्यपरवाक्यप्रतिपादितपरतत्त्वभूतस्य कार्यमध्ये निवेशः स स्वकार्यभूततत्त्वसंख्यापूरणं कुर्वतः स्वलीलया जगदुपकाराय स्वेच्छावतार इत्यवगन्तव्यः, यथा लीलया देवसंख्यापूरणं कुर्वत उपेन्द्रत्वं परस्यैव, यथा च सूर्यवंशोद्भवराजसंख्यापूरणं कुर्व्वतः परस्यैव ब्रह्मणो दाशरथिरूपेण स्वेच्छावतारः, यथा च सोमवंशसंख्यापूरणं कुर्वतो भगवतो भूभारणावतारणाय स्वेच्छया वसुदेवगृहे अवतारः, सृष्टिप्रलयप्रकरणेषु नारायण एव परमकारणतया प्रतिपाद्यत इति पूर्व्वमेवोक्तम् । यत्पुनरथर्वशिरसि

श्रुतिस्मृतिपूक्तः, तत्र बहूनि मे व्यतीतानि जन्मानि तव चार्जुनेति वचनादुत्पत्तिसद्भावो ब्रह्मरुद्रादेर्भगवतश्चाभ्युपगम्यते, तत्र भगवज्जन्मनो हेतुः प्रयोजनं विलक्षणं प्रमाणान्तरेण प्रतिपन्नमिति तदविरोधेनात्रापि प्रतिपाद्यमानं भगवतो जन्म विलक्षणहेतुमद्विलक्षणप्रयोजनवच्चाभ्युपगम्यमन्येषां जन्मनो हेतुफले कर्म्म—तत्फलानुभवौ, तस्माद्रामादिवदवतार इत्यर्थः त्रिमूर्तिसंख्यान्तर्भावमात्रं न साम्ये प्रयोजकमित्यभिप्रायेण संख्यापूरणं कुर्वत इति मुहुरुक्तं, स्वलीलया जगदुपकारायेति हेतुप्रयोजनवैलक्षण्यमुक्तं,

न तु कर्म्मणा तत्फलानुभवायेत्यर्थः, जगतामुपकाराय न सा कर्म्मनिमित्तजेति वचनात् । मनुष्यादिषु ह्यवतारः कथं देवेष्विति शङ्काव्यावृत्त्यर्थमाह यथा लीलयेति, तर्हि देवेष्ववतारद्वयं कथमित्यत्राह यथा चेति, स्वप्रमानगणनागण्यत्वस्वरूपोत्कर्षं परेषां ददातीत्यभिप्रायेण सोमवंशसङ्ख्यापूरणं राजसङ्ख्यापूरणमित्युक्तं, तद्वत् त्रिमूर्त्यन्तर्भावो न तत्साम्यायेत्यभिप्रायः । परत्वे प्रामाणिके सति ह्येवं निर्वाह इत्यत्राह रुद्रेणेति,

रुद्रेण स्वसर्वैश्वर्यं प्रपञ्चितं तत्सोऽन्तरादन्तरं प्राविशदिति

अथाऽथर्वशिरोनिर्वहति यत्पुनरिति, देवा ह वै स्वर्गं लोकमवगमन् तं देवा रुद्रमपृच्छन् कोभवानिति सोऽब्रवीत् अहमेकः प्रथममासं वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इति सोऽन्तरादन्तरं प्राविशद्दिशश्चान्तरं प्राविशत्सोऽहं नित्यानित्योब्रह्माहं ब्रह्मेत्यादि सोऽन्तरादन्तरं प्राविशत् इत्यतः पूर्वं सोऽब्रवीदिति प्रक्रम्य रुद्रवचः अस्य वाक्यस्योपर्यपि सोऽहमित्यादिकं रुद्रवचः, अतो मध्येऽपि रुद्रवाक्यं न समाप्तमित्यभिप्रायेण प्रपञ्चितमित्युक्तम्, अत्रेदं विचार्यते सोऽन्तरादन्तरम्प्राविशत् दिशश्चान्तरं सम्प्राविशदिति इतीदं किंरुद्रवाक्यम् उत केवलं श्रुतिवाक्यंपूर्वमितिकरणेन रुद्रवचसः समाप्तत्वादिदं श्रुतिवाक्यमिति चेत् न, सोऽहमित्यादेरुपर्यपि रुद्रवाक्यस्य दर्शनादिदमपि रुद्रवाक्यमेव नो चेत्सोऽब्रवीदित्युक्तस्य अध्याहारःस्यात्, न स दोष इति करणावैयर्थ्यादर्थवत्त्वादिति चेत् न न हीतिकरणस्य समाप्तिरेवार्थः अपि तु हेतुः प्रकारोऽप्यर्थः–इति–हेतुप्रकरणप्रकारादिसमाप्तिष्विति निघण्टु दर्शनात्, तस्मात्पदान्तरानध्याहारेणैव निर्वाहेसम्भवत्यध्याहारसापेक्षार्थस्वीकारोऽनुपपन्नः, तस्मादयमर्थः रुद्रेण को भवानिति पृष्टेन प्रथममहमेकः प्रथममासं वर्त्तामीत्यादिना स्वस्य सर्वात्मकत्वे उक्ते परमात्मनोहि सर्वात्मकत्वं कथं सङ्गत इत्यपेक्षायामित्थमिति प्रकारार्थोऽयमिति–शब्दः सोऽन्तरादन्तरमिति वक्ष्यमाणप्रकारेणेत्यर्थः । यद्वा अत्रेतिर्हेतौ सोऽन्तरादन्तरम्प्राविशत् दिशश्चान्तरं सम्प्राविशत् इति पर-

मात्माऽनुप्रवेशात् सर्वात्मकत्वमित्यर्थः, इति-शब्दस्य हेतुपरत्वमभिप्रेत्य परमात्मप्रवेशादित्युक्तं, यद्यपीति-शब्दस्य समाप्तिरेवार्थः । अर्थान्तरं न स्यात् तथाऽपि धर्मिकल्पनातो वरं धर्म्मकल्पनेति न्यायात् प्रयुक्तस्येति-शब्दस्य रुद्रवाक्यावसानेऽन्वयज*ल्पनं न्याय्यं न त्वप्रयुक्तपदान्तराध्याहार इति, तस्माद्रुद्रवाक्यमेवेदं स इति परमात्मोच्यते बुद्धिस्थत्वात्परमात्मनः, सोऽन्तरादन्तरं शरीरादन्तरस्य प्राणादेरप्यन्तरं जीवम्प्राविशत् दिशश्चान्तरं दिक्शब्देन समस्तजगद्वर्त्तिवस्तुजातं लक्ष्यते, सर्वपदार्थानामन्तरं जीवात्मकवर्गं प्राविशत्सर्वसामानाधिकरण्यस्य वक्ष्यमाणत्वात्, तदुपपत्तये स्वस्य सर्वजीवानां च परमात्मानुप्रवेश उक्तः । एवं रुद्रवाक्यत्वमेव युक्तम् । यद्वा श्रुतिवाक्यस्तु तदाऽयमर्थः-सः-रुद्रः-अन्तरादन्तरं जीवादन्तरं परमात्मानं प्राविशद् बुद्ध्याऽगाहत, अनुप्रवेश-शब्दस्यसम्यग्बोधनार्थत्वं लोकसिद्धं तथा चाणक्यप्रयोगश्च-यस्य यस्य हि यो भावस्तेन तेन तेन हि तं नरम्† । अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥ इति, स रुद्रः स्वान्तर्यामिणं सर्वपदार्थान्तर्यामिणं च परमात्मानं तच्छरीरकं बुद्ध्या ऽनुसंहितवानित्यर्थः । एवं निर्वाहकद्वयमभिप्रेत्य परमात्मप्रवेशादित्युक्तं, परमात्मनः प्रवेशादिति षष्ठीसमासः परमात्मकर्तृकप्रवेशात्परमात्मकर्म्मकप्रवेशाच्चेति भावः । श्रुत्यैवेति प्रतर्दनविद्यादिष्विव न केवलन्यायेन परमात्माऽनुप्रवेशः कल्प्यते अपि तु कण्ठोक्त इत्यर्थः । अस्यार्थस्य सूत्रकारोक्तिन्दर्शयति शास्त्रेति, परमात्माऽनुप्रवेशकण्ठोक्तिरहितेषु प्रतर्दनविद्यादिष्वपीन्द्रादीनां परमात्मात्मकत्वे सिद्धे परमात्मानुप्रवेशकण्ठोक्तिमत्स्वथर्वशिरःप्रभृतिषु कैमुत्यरी‡त्या परमात्मानुप्रवेशः सिद्ध्यतीत्यभिप्रायेण सूत्रकारः प्रतर्दनविद्याविषयसूत्रं प्रणीतवानित्यभिप्रायः । सर्वसामानाधिकरण्यस्य परमात्मानुप्रवेशकृतत्ववैशद्याय उपबृंहणं दर्शयति-

परमात्मप्रवेशादुक्तमिति श्रुत्यैव व्यक्तं, शास्त्रदृष्ट्या तूपदेशो वामदेववदिति-

* कल्पनमिति पा० ।
† तेन तेन तदन्तरमिति पा० ।
‡ कैमुत्यनीत्येति पा० ।

यथोक्तमिति, उदाहृतश्लोके हेत्वंशं तेन सर्वसामानाधिकरण्यसिद्धिं च दर्शयति अत्रेति, अत इदम्, इत्यादि, इदम्-अहं-ग्रहणोपासनं वाक्यकारेणोच्यते इत्यन्वयः। चेतनानां नित्यत्वात् सर्वस्य तन्निष्पत्तिर्नोपपद्यत इत्यत्राह कार्यावस्थ इति, विशिष्टाद्विशिष्टस्योत्पत्तिः सा च चिदचित्स्वरूपनित्यत्वेऽप्यवस्थाभेदेन उपपद्यते इत्यर्थः। सूत्रं दर्शयति आत्मेति, सामान्येन सर्वजीवानां परमात्मात्मकत्वे सिद्धेऽपि ब्रह्मशिवयोः परमात्मात्मकत्वं विशेषतो दर्शयितुमाह महाभारते चेति, तत्र ममेत्युक्ते ब्रह्मशिवयोरप्रतिपत्तिः स्यादिति तत्प्रतिपत्त्यर्थं ब्रह्मरुद्रसंवाद इत्युक्तं, तद्व्याचष्टे रुद्रस्येति, नारायणस्यात्मान्तरव्यावृत्त्यर्थः परमेश्वर-शब्दः। रुद्रस्यैव नारायणात्मकत्वे वचनमाह तथेति, वचनान्तरमाह तत्रैवेति, अत्र भगवदात्मकत्वं कथं प्रतीतमित्यत्राह अन्तरात्मतयेति, केचिद्वैदिका भगवत उपादानत्वं रुद्रस्य निमित्तत्वं च वदन्ति-उपादानं तु भगवान् निमित्तं तु महेश्वरः ॥ इति तन्निराकरोति-

सूत्रकारेणैवमादीनामर्थः प्रतिपादितः-यथोक्तं प्रह्लादेनापि-सर्वगत्वादनन्तस्य स एवाहमवस्थितः, मत्तः सर्वमहं सर्वं मयि सर्वं सनातने इत्यादि, अत्र सर्वगत्वादनन्तस्येति हेतुरुक्तः, स्वशरीरभूतस्य सर्वस्य चिदचिद्वस्तुन आत्मत्वेन सर्वगतः परमात्मेति सर्वे शब्दाः सर्वशरीरं परमात्मानमेवाभिदधतीत्युक्तम्, अतोऽहमिति-शब्दः स्वात्मप्रकार†प्रकारिणं परमात्मानमेवाचष्टे, अत इदमुच्यते आत्मेत्येव तु गृह्णीयात्सर्वस्य तन्निष्पत्तेरित्यादिना ऽहं-ग्रहणोपासनं वाक्यकारेण कार्य्यावस्थः कारणावस्थश्च स्थूलसूक्ष्मचिदचिद्वस्तुशरीरः परमात्मैवेति सर्वस्य तन्निष्पत्तेरित्युक्तम्, आत्मेति तूपगच्छन्ति ग्राहयन्ति चेति

† स्वात्मप्रकारिणमिति पा॰

निमित्तोपादानयोरिति, सूत्रश्रुतिविरोधाभ्यां वेदवाह्यत्वमुपपादयति जन्मादीति, सदेवेत्युपादानत्वम्, अद्वितीयं तदैक्षतेत्यादिना तस्यैव निमित्तत्वं ब्रह्म स वृक्ष आसीदिति उपादानता ब्रह्माध्यतिष्ठदिति तस्यैव निमित्तत्वं, सर्वे निमेषा इति कालविशिष्टस्य निमेषादीन् प्रत्युपादानत्वं न तस्येशे इति निमित्तत्वं, नेह नास्तीत्युपादानत्वम्

सूत्रकारेण च महाभारते च ब्रह्मरुद्रसंवादे ब्रह्मा रुद्रं प्रत्याह—तवान्तरात्मा मम च ये चान्ये देहिसंज्ञिताः । इति रुद्रस्य ब्रह्मणश्चान्येषां च देहिनां च परमेश्वरो नारायणोऽन्तरात्मतयाऽवस्थित इति, तथा तत्रैव—विष्णुरात्मा भगवतो भवस्यामिततेजसः । तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वरः । इति,

सर्वस्य ब्रह्मकार्यत्वेन अब्रह्मात्मकत्वनिषेधात् सर्वस्य वशीति निमित्तत्वं, पुरुष एवेदं सर्वमिति निमित्तत्वमुपादानत्वं च उतामृतत्वस्येशान इति तस्यैव मुक्तिदत्वं, नान्य इति व्यतिरिक्तोपायनिषेधः । नारायणस्यैव परमकारणत्वे उपबृंहणवचनानि दर्शयति इतिहासेति, तत्र रजस्तमोमूलत्वात् श्रुतिविरोधाच्च कारणदोषबाधकप्रत्ययवतः प्रबन्धान् विहाय सात्त्विकेषु प्रबन्धेषु सर्वलोकाविगानपरिगृहीते महाभारते वचनानि दर्शयति यथेति, श्रीविष्णुपुराणे नारायणस्यैव परमकारणत्वपराणि उपबृंहणवचनानि वक्ष्यंस्तदाप्तिं दर्शयति प्राच्येति, क्वचित्परिग्रहव्यावृत्त्यर्थं

तत्रैव—एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ । तदादर्शितपन्थानौ सृष्टिसंहारकारकौ ॥ इति अन्तरात्मतयाऽवस्थितनारायण*दर्शितपन्थानौ ब्रह्मरुद्रौ

* दर्शितपथाविति द्राविडपुस्तकपाठो युक्तः ऋक्पूरब्धूःपथामानक्षे इति पाणिनीयानुशासनेन सामासिके प्रत्यये दर्शितपन्थानावित्यस्यायुक्तत्वात्, वैष्णवपुराणपाठस्त्वार्ष इति न स लौकिकप्रयोगसाधुभावायालमिति तज्ज्ञा एव विदाङ्कुर्वन्तु ।

सृष्टिसंहारकार्यकरावित्यर्थः, निमित्तोपादानयोस्तु भेदं वदन्तो वेदबाह्या एव स्युः, जन्माद्यस्य यतः, प्रकृतिश्च प्रतिज्ञादृष्टान्ताऽनुपरोधादित्यादिवेदविस्प्रणीतसूत्रविरोधात्, सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म स ऐक्षत बहु स्यां प्रजायेयेति ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः ब्रह्माध्यतिष्ठद्भुवनानि

प्राच्यादिग्रहणं, कतिपयपरिग्रहव्यावृत्त्यर्थः सर्व-शब्दः, अनुष्ठाने तत्त्वस्थितौ च प्रमाणतया परिगृहीतमित्याह सर्वधर्म्मसर्वतत्त्वव्यवस्थायामिति, श्रुतवेदान्तस्य अनधीतशाखार्थबुभुत्सया प्रश्न इत्याह जन्मादीति, अस्यानन्यपरताद्योतनार्थमाह जन्मादिकारणं किमिति, प्रश्नपूर्वकमिति अयमभिप्रायः-सामान्यविषयप्रश्नस्य विशेषविषयोत्तरमुखेन प्रवृत्तत्वं च प्रामाण्यहेतुः अनन्यपरत्वं हि तद् विशेषप्रश्नपूर्व्वकं चेत्

धारयन्, सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि, न तस्येशे कश्च तस्य नाम महद्यशः, नेह नानाऽस्ति किंचन, सर्वस्य वशी सर्वस्येशानः, पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् उतामृतत्वस्येशानः, नान्यः पन्था अयनाय विद्यत इत्यादिसर्वश्रुतिगणविरोधाच्च, इतिहासपुराणेषु च स्थिति*प्रलयकरणयोरिदमेव परतत्त्वमित्यवगम्यते यथा महाभारते—केन सृ†ष्टमिदं सर्वं जगत्स्थावरजङ्गमम् ॥ प्रलये च कमभ्येति तन्नो ब्रूहि

* सृष्टिप्रलयप्रकरणयोरिति पुस्तकान्तरपाठो युक्तः ।

† कुतः सृष्टमिति पा० ।

पितामह !। इति पृष्टो नारायणो जगन्मूर्त्तिरनन्तात्मा सनातन इत्यादि च वदन्–ऋषयः पितरो देवा महाभूतानि धातवः। जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥ इति च प्राच्योदीच्य–दाक्षिणात्य–पाश्चात्यसर्वशिष्टैः सर्वधर्म्मसर्वतत्त्वव्यवस्थायामिदमेव पर्याप्तमित्यवि*गीतपरिगृहीतवैष्णवं च पुराणं, जन्माद्यस्य यत इति जगज्जन्मादिकारणम्

प्रष्टुरभिमतार्थ उक्तः स्यात्, सामान्यविषयप्रश्नपूर्व्वकत्वेन तत्त्वस्थितिः प्रतिपादिता भवति, तस्मादत्रापि सामान्यविषयप्रश्नपूर्व्वकत्वात् प्रामाण्यं स्पष्टमिति सामान्यविषयप्रश्नपूर्व्वकविशेषविषयत्वप्रदर्शनाय उदाहृतेन विष्णोः सकाशादित्यादिश्लोकेन प्रबन्धोपक्रमस्य भगवत्परत्वमुक्तम्भवति। उपसंहारस्य भगवत्परत्वमाह तथेति, परमकारणत्वमुक्तं प्रकृतिर्यतीति, स च परमात्मा नारायण इति वदति परमात्मेति, आधार इति शरीरात्मभावः, परमेश्वर इति परमात्मन ईश्वरानतिरिक्तत्वं स चक इत्यत्राह–

ब्रह्मेत्यवगम्यते, तज्जन्मादिकारणं किमिति प्रश्नपूर्व्वकं विष्णोः सकाशादुद्भूतमित्यादिना ब्रह्मस्वरूपविशेषप्रतिपादनैकपरतया प्रवृत्तमिति सर्वसम्मतं, तथा तत्रैव–प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी। पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥ परमात्मा च सर्वेषामाधारः परमेश्वरः। विष्णुनामा स वेदेषु वेदान्तेषु च गीयते ॥ इति, सर्ववेदवेदान्तेषु सर्वैः शब्दैः परम-

* अविगानपरिगृहीतमिति पा०।

कारणतयाऽयमेव गीयत इत्यर्थः । यथा सर्वासु श्रुतिषु केवलपरब्रह्मस्वरूपविशेषप्रतिपादनायैव प्रवृत्तो नारायणानुवाकस्तथेदं वैष्णवं च पुराणं सोऽहमिच्छामि धर्म्मज्ञ श्रोतुं त्वत्तो यथा जगत् ।

विष्णुनामा स देवेषु वेदान्तेषु च गीयत इति, वेदेषु इति वेदान्तेषु च कथं विष्णोरेव वाच्यत्वम् अग्न्यादीनामपि प्रतिपाद्यमानत्वादिति शङ्कायां तद्व्याचष्टे सर्वेति, अग्न्यादिशब्दा अपि परमात्मभूतभगवत्पर्यन्ता इत्यर्थः । पूर्वं संग्रहेणोक्तमनन्यपरत्वं विवृणोति यथेति, सामान्यविषयप्रश्नपूर्वकत्वं प्रश्नश्लोकेन दर्शयति सोऽहमिति, यत इति निमित्तोपादानयोः सह प्रश्नः श्रुतवेदान्तस्य प्रश्नत्वात्तुच्छत्व-विवर्तत्व-परिणामत्व-सद्वारकत्वाद्वारकत्वादिप्रकारज्ञापनार्थं यथेति, प्रश्नः, तत्र कालभेदेन सृष्टिकारणप्रकारभेदोऽनधीतश्रुत्यन्तरोक्तः किमित्यभिप्रायेण बभूव भविष्यतीति प्रश्नः, यतो बभूव यथा बभूव यतो भविष्यति यथा भविष्यतीति प्रश्नः, लयेऽप्येवम् उत्पत्तिकारणतत्प्रकारविषयप्रश्नानां मध्ये यन्मयमित्यनेन व्यवधानमुत्पत्तिकारणतत्प्रकारयोः पृथग्ज्ञातव्यत्वादन्तरोक्तं, यन्मयमिति स्थितिकारणप्रश्नः, मयट् प्राचुर्यार्थः, विकारार्थत्वमनपेक्षितं यत इत्युपादानस्यापि पृष्टत्वात्, न च तत्सङ्कोचोऽपेक्षितः स्थितिप्रश्नवचनमनपेक्षितवचनं च यथा भवति तथा सङ्कोचानुपपत्तेः

बभूव भूयश्च यथा महाभाग ! भविष्यति । यन्मयं च जगद्ब्रह्मन् यतश्चैतच्चराचरम् ॥ लीनमासीद्यथा यत्र* लयमेष्यति यत्र च । इति,

तस्मात् प्राचुर्यार्थो मयट्, आन्तरस्थितिकारणप्रश्नोऽयम् अन्तःप्रविश्य धारकतया हि स्थितिः प्रतीयते, यन्मयं चेति-च-शब्देन बाह्यस्थितिकारणप्रश्नो विवक्षितः, लयमेष्यति यत्र चेति चकारेण भूतभविष्यल्लयकर्तृप्र-

* तथा तत्रेति पा॰ ।

श्नद्वयमभिप्रेतम् । एवं सामान्यविषयप्रश्न इत्याह परं ब्रह्म किमितीति, प्रक्रम्य प्रवृत्तमिति उत्तरत्रान्वयः, विशेषविषयोत्तरसङ्क्षेपश्लोकमाह विष्णोरिति, विष्णोः सकाशात्—सकाश—शब्दः पञ्चम्यनतिरिक्तार्थः, चतुर्थ्यर्थे क्तते इतिवत्, गुरुसकाशादितिवच्च । यद्वा सकाशात् काशः—प्रकाशः सङ्कल्परूपज्ञानसहितादित्यर्थः । यद्वा सकाशः पार्श्वः शरीरैकदेशादित्यर्थः, विष्णु—शब्दस्य रूढ्या देवताविशेषनिर्णयः, देवतापारमार्थ्यं च यथावद् ज्ञा*स्यते भवानिति हि वरप्रदानं पारमार्थ्य—शब्देन धर्मिविपर्यासाभावः, यथावच्छब्देन प्रकारविपर्यासाभावश्च विवक्षितः, रजस्तमःकालुष्यराहित्यं फलितमनेन, एवं वरप्रदानानुगुणदेवताविशेषनिर्णयो रूढ्या विष्णुशब्दस्य अवयवशक्त्या प्रकारप्रश्नोत्तरमुक्तम्, अनेनोपादानत्वं हि सद्वारकमित्युक्तं भवति, यत्रेति लयस्थानप्रश्नस्योत्तरमाह तत्रेति, तत्रैव—विष्णावेव, अत्रापि विष्णु—शब्देन लयस्थानत्वं सद्वारकमिति सिद्धम्—

परं ब्रह्म किमिति प्रक्रम्य—विष्णोस्सकाशादुद्भूतं जगत्तत्रैव च स्थितम् । स्थितिसंयमकर्त्ताऽसौ जगतोऽस्य जगच्च सः ॥ परः पराणाम्परमः परमात्मात्मसंस्थितः । रूपवर्णादिनिर्देशविशेषणविवर्जितः ॥ अपक्षयविनाशाभ्याम्—

अविशेषेणोक्तत्वात् कालविशेषप्रश्नोऽपि दत्तोत्तरः, लयकर्तृप्रश्नस्य च—शब्दाव†गतस्योत्तरं बाह्यस्थितिकर्तृत्वं चाह स्थितिसंयमेति, आन्तरस्थितिकारणप्रश्नोत्तरं—जगच्च स इति, अनेन सामानाधिकरण्येन धार्यधारकत्वादि सिद्धम् । अथ नमस्कारश्लोकानामनन्तरस्थानि वचनान्याह पर इति, तत्र ब्रह्मणो निखिलजगत्कारणत्वोपपत्तये अपरिच्छिन्नत्वमुच्यते, परिच्छिन्नं हि परिमितकार्यकारणं तस्मात्कृत्स्नकारणत्वोपपत्त्यर्थमपरिच्छिन्नत्वमुच्यते, श्रुतिभिश्च सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिभिस्त्रि-

* वेत्स्यते इति पा ।

† च-शब्दगतस्येति पा॰ ।

विधापरिच्छेद उक्तः, तत्र त्रिविधपरिच्छेदं विस्तरेण वक्ष्यन् प्रथमं संग्रहेणाह परः पराणामित्यर्द्धेन, ब्रह्मादीनामपि परः परमः, अनेन कालपरिच्छिन्नेभ्यः परत्वादस्य कालानवच्छेदः फलितः, परमात्मेति देशापरिच्छेदः आप्नोतीति ह्यात्मा । वस्त्वनवच्छेदमाह आत्मसंस्थित इति, आत्मनि संस्थितः—स्वनिष्ठः, अनेनान्येषामेतन्निष्ठत्वात्तद्वाचिशब्दा एतत्पर्यन्ताः, सर्ववस्तुसामानाधिकरण्यार्हत्वं वस्त्वनवच्छेदः, इदमत्र नान्यत्रेति देशावच्छेदः, इदमिदानीमेव नान्यदेति कालावच्छेदः, इदमिदं न भवतीति वस्त्ववच्छेदतत्तद्विपर्ययस्तत्तदनवच्छेदः स यथोक्तप्रकार एव, तत्र प्रथमं कालापरिच्छेदं विस्तरेण वदन् कालपरिच्छिन्नत्वव्यावृत्तिमाह रूपेति, रूपं जातिः जातिगुणौ च रूपिणां रूपे इति वचनात्, वर्णो गुणः, आदि-शब्देन क्रिया दण्डकुण्डलादिद्रव्यं विवक्षितं तद्वाचिशब्दो रूपवर्णादिनिर्देशः, विशेषणानि रूपादीनि तान्येव रूपवर्णादिवाचिशब्दैस्तद्वाच्यरूपवर्णादिभिश्च वर्ज्जित इत्यर्थः । रूपवर्गादीति पाठे रूपं गुणः, वर्गो जातिः देववर्गो मनुष्यवर्ग इति वर्गरूपत्वात् तस्याः । यद्वा रूपवर्णादिलक्षणैः तन्निर्देशलक्षणैश्च विशेषणैर्विवर्जितः, अन्यत्तुल्यं षड्भावविकाररराहित्यमाह अपक्षयेति, जन्म-शब्दो जायतेऽस्तीति विकारद्वयस्योपलक्षणार्थः, अपक्षयादिवर्जितत्वात्तद्वाचिशब्दागोच*रत्वं चेति सिद्धम् । तर्हि कथम् वक्तुं शक्यत इत्याह—शक्यते वक्तुं यः सदाऽस्तीति केवलमिति, केवल-शब्देनापक्षयादिवाचकशब्दव्यावृत्तिः, सदा-शब्देन कादाचित्कास्तित्वव्यावृत्तिः, एवं कालपरिच्छेदवतां जात्यादिकल्पनान्वयोऽपक्षयाद्यन्वयश्च तदुभयवाचिशब्दगोचरत्वं च दृष्टं तदभावाद्ब्रह्म कालापरिच्छिन्नमित्युक्तं, नामनिर्वचनमुखेन देशापरिच्छेदमाह सर्वत्रेति, ब्रह्मणो हि त्रिविधापरिच्छेदः कथमत्र वासुदेवस्य त्रिविधापरिच्छेदः उच्यते इत्यत्राह तद्ब्रह्मेति, वासुदेवपरामर्शिनस्तच्छब्दस्य नपुंसकत्वं ब्रह्मविशेषणत्वात् अजमक्षयमव्ययमित्यनेन विकारान्तरराहित्यमप्युपलक्षितं, तस्मान्नित्यमिति† चिदचिद्व्यावृत्तिः

* शब्दागोचरश्चेति सिद्धम् पा० । † एवमचिद्व्यावृत्तिः ।

परिणामर्द्धिजन्मभिः ॥ वर्जितः शक्यते वक्तुं यस्सदाऽस्तीति केवलम् । सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतस्ततस्स वासुदेवेति विद्वद्भिः परिपठ्यते ॥ तद्ब्रह्म परमं नित्यमजमक्षयमव्ययम् । एकस्वरूपं च सदा हेयाभावाच्च निर्मलम् ॥ *सदेव सर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत् ।

हेयाभावाच्च निर्मलमिति बद्धव्यावृत्तिः सदा निर्मलमिति मुक्तव्यावृत्तिः एकस्वरूपं चेति नित्यसिद्धव्यावृत्तिः, ते हि बहवः ब्रह्म तु समाभ्यधिकरहितं वासुदेव एवैवंविधं परं ब्रह्मेत्यर्थः । यद्वा अजं जायतेऽस्तीति विकारद्वयव्युदासः, अक्षयमव्ययमित्यपक्षयविनाश निषेधः, एकस्वरूपमिति विपरिणमते विवर्द्धते इति मध्यमविकारद्वयनिवृत्तिः, परममिति नित्यसूरिव्यावृत्तिः, अन्यत्तुल्यम्, एवं देशापरिच्छेदमुखेन देवताविशेषनिर्णयश्च कृतः, तथा श्रुतिश्चानन्त्यं वदति देवताविशेषनिर्णयञ्चाह सत्यं ज्ञानमनन्तं ब्रह्मेति, अनन्त-शब्दस्यावयवशक्त्या त्रिविधापरिच्छेदः सिद्धः । रूढ्या देवताविशेषनिर्णयः, तर्हि पुँलिङ्गत्वं पुंल्लिङ्ग एवानन्त-शब्दो द्वितीयाविभक्त्यन्तः यो वेद निहितं गुहायामिति वेदेति पदेनान्वयात्, एवं श्रुत्यनुसारादत्र वासुदेवस्य परब्रह्मत्वमुक्तम् । अथ वस्त्वनवच्छेदमाह तदेवेति, व्यक्ताव्यक्तस्वरूपवदित्यत्र स्वरूप-शब्दो वस्त्वन्तरातिरिक्तार्थवाची व्यक्ताव्यक्तस्वरूपवत् पुरुषरूपेण कालरूपेण च स्थितं सर्वमेवैतत् जगत्तद्ब्रह्मैवेत्यर्थः । अनेन वस्त्वपरिच्छेद उक्तः, सर्वसामानाधिकरण्यार्हत्वं हि वस्त्वपरिच्छेदः, एवमुपक्रमगतवचनजातमुक्तम् । उपसंहारगतवचनजातान्याह स सर्वेति,

तथा पुरुषरूपेण कालरूपेण च स्थितम् । स सर्वभूतप्रकृतिं विकारान् गुणादिदोषांश्च मुने व्यतीतः ।

* तदेवेति पा० ।

अतीतसर्वावरणोऽखिलात्मा । तेनास्तृतं यद्भुवनान्तराले ।

सर्वभूतानां प्रकृतिः प्रधानं विकारा महदादयः गुणाः सत्त्वरजस्तमांसि, आदि-शब्देन तत्प्रयुक्तरागद्वेषदुःखादयो विवक्षिताः, आवरणं-ज्ञानसङ्कोचः सर्वविषयज्ञानावरणं हि तत्, अखिलात्मेति पदं विवृणोति तेनास्तृतमिति । एवं धर्म्मिस्वरूपस्य हेयप्रत्यनीकत्वमुक्तम् । अथ दिव्यात्मस्वरूपस्य कल्याणगुणत्वमाह समस्तेति, कल्याणगुण-शब्दो धर्म्मपरः, द्व्येकयोर्द्विवचनैकवचने इत्यत्र द्व्येक-शब्दवत्, द्वित्वैकत्वयोरर्थयोरिति हि वृत्तिः, समस्तकल्याणत्वं गुणो यस्य स समस्तकल्याणगुणः, एवं विधं दिव्यात्मस्वरूपं य स्यस समस्तकल्याणगुणात्मकः, दिव्यात्मस्वरूपमनायासेन सर्वधारकमित्याह स्वशक्तीति, विग्रहवैलक्षण्यमाह इच्छेति, तत्प्रयोजनमाह संसाधितेति, षाड्गुण्यमाह तेज इति, गुणादिदोषानिति पूर्वोक्तं विवृणोति सकला इति, आदि-शब्देन कर्म्मविपाकाशया विवक्षिताः । अत एव परः पराणाम् एवमुभयलिङ्गत्वेन विलक्षणस्य कथं जगत्सामानाधिकरण्यमित्यत्राह स ईश्वर इति, जगच्छरीरकत्वादित्यर्थः । व्यष्टि-समष्टिशब्दौ कार्यकारणावस्थजीवविषयौ अव्यक्तव्यक्तशब्दावुभयावस्थाचिद्विषयौ ईश्वरातिरिक्त*ब्रह्मशङ्कानिरासार्थैः

समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशोद्धृतभूतवर्गः ॥ इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ ॥ तेजोबलैश्वर्यमहावबोधस्ववीर्यशक्त्यादिगुणैकराशिः । परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ॥ स ईश्वरो व्यष्टिसमष्टि-

* जगन्मिथ्यात्ववादिनो हि श्रीराम-कृष्णाद्यवतारानवतारिणं भगवन्तं च न ब्रह्मस्वरूपमाचक्षते किन्त्वतिरिक्तमिति तन्मतव्यावृत्तये प्रथम ईश्वर-शब्द इति भावः, । यथा चेदं मतं न साधीयस्तथा समार्तथं साधु पराक्रम्य दशावतारभाष्ये इति विशेषस्तत एवाधिगम्यो धिकं जिज्ञासमानैः ॥

रूपोऽव्यक्तस्वरूपः प्रकटस्वरूपः। सर्वेश्वरः सर्वदृक् सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः ॥ संज्ञायते येन

प्रथम ईश्वर-शब्दः, सर्वेश्वरः-सर्वनियन्ता अनेन जगच्छरीरकत्वमुपपादितं भवति तदेकनियाम्यद्रव्यं हि शरीरं सर्वदृक् सर्ववेत्ता सर्वपदार्थस्वरूपं तत्प्रकारांश्च जानातीत्यर्थः, सर्वतोदृक् सर्वेषां चक्षुर्भूत इति वा ज्ञानप्रद इत्यर्थः । ईश्वरान्तरनिषेधपरं परमेश्वराख्य इति पदं, संज्ञायत इति अस्तदोषं विकाररूपदोषरहितम्, अनेन प्रकृतिव्यावृत्तिः, शुद्धं-कर्म्मवश्यत्वादोषरहितमनेन बद्धव्यावृत्तिः, निर्मलं कर्म्मसम्बद्धार्हत्वदोषरहितम्, अनेन मुक्तव्यावृत्तिः, एकरूपं समाभ्यधिकरहितम्, अनेन नित्यसिद्धव्यावृत्तिः, एवंविधं तत्परं ब्रह्म येनागमोत्थज्ञानेन ज्ञायते येन साक्षात्काररूपेण ज्ञानेन दृश्यते येन परभक्तिरूपदशापन्नेन गम्यते अनुभूयते साक्षात्कृतस्य अनुभवाभिनिवेशः परमभक्तिः । एवंविधत्वात्परमुत्कृष्टं यज् ज्ञानं तदेव ज्ञानम् अन्यदज्ञानमित्यर्थः । संज्ञायत इति पाठेऽयमर्थः स ईश्वरो येन तत्तद्दशापन्नेन ज्ञानेन ज्ञायते साक्षात्क्रियते गम्यते तज् ज्ञानम् अस्तदोषं शुद्धं निर्म्मलम् एकरूपम् अर्थेनैव विशेषो हि निराकारतया धियामिति स्यात् ज्ञानस्यास्तदोषत्वादिकं

तदस्तदोषं शुद्धं परं निर्म्मलमेकरूपम् । संदृश्यते वाप्यधिगम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥ इति परब्रह्मस्वरूपविशेषनिर्णयायैव प्रवृत्तम्, अन्यानि सर्वाणि पुराणान्यन्यपराण्येतदविरोधेन नेयानि ।

विषयविशेषकृतं विकाररूपदोषास्पदप्रकृतिविषयज्ञानविलक्षणत्वादस्तदोषं प्रकृतिसम्बन्धदोषवद्विषयत्वाभावाच्छुद्धं-प्रकृतिसम्बन्धार्हतादोषवद्विषयत्वरहितत्वान्निर्मलम्, एकरूपम् अनेकरूपनित्यसिद्धविषयज्ञानव्यावृत्तमेकरूपमित्यर्थः । एवं सामान्यविषयप्रश्नपूर्व्वकं विशेषविषयोत्तरवचनप्रवृत्तत्वादनन्यपरमित्याह परेति, अन्येषां पुराणानामन्यपरत्वादेतदवि-

रोधेन वा नेयानीत्याहुः अन्यानीति, कथमन्यपरत्वमित्यत्राह अन्यपरत्वं चेति, तत्तदारम्भप्रकारैः विशेषविषयश्रवणपूर्वकैरित्यर्थः अविरोधेन नेतुमशक्यं चेत्कथं स्यादित्यत्राह सर्वात्मनेति, विरोधे त्वनपेक्षं स्यादिति न्यायात् त्याज्यानीत्यर्थः । तामसत्वादिति रजस्तमोमूलत्वाच्छ्रुतिविरोधाच्च कारणदोषबाधकप्रत्ययवत्त्वादयाथार्थ्यादित्यभिप्रायः । साम्यशङ्कया चोदयति नन्विति, त्रिमूर्त्तिसाम्यप्रतीतेर्विष्णोरेव सर्वस्मात् परत्वम् अनुपपन्नमित्यर्थः । परिहरति नैतदेवमिति, कस्तर्ह्यर्थ इत्यत्राह एक एवेति, अस्मिन्प्रकरणे इत्यर्थः । तादात्म्यकथनं किमत्रापेक्षितमित्यत्राह जगच्चेति, पूर्वं संग्रहेणोक्तस्य तादात्म्यस्य विवरणमपेक्षितमित्यभिप्रायेण विवृणोतीत्युक्तं कृत्स्नप्रपञ्चतादात्म्यं कथमत्र प्रतीयत इत्यत्राह स्रष्टा सृजतीति,

अन्यपरत्वं च तत्तदारम्भप्रकारैरवगम्यते सर्वात्मना विरुद्धांशस्तामसत्वादनादरणीयः । नन्वस्मिन्नपि—सृष्टिस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकाम् । स संज्ञां याति भगवानेक एव जनार्दनः ॥ इति त्रिमूर्त्तिसाम्यं प्रतीयते, नैतदेवम् एक एव जनार्दन इति जनार्दनस्यैव ब्रह्मविष्णुशिवादिकृत्स्नप्रपञ्चतादात्म्यं विधीयते । जगच्च स इति पूर्वोक्तमेव

व्याहतिशङ्कापरिहारार्थं तद्व्याचष्टे स्रष्टृत्वेनेति, सर्वस्य विष्णुतादात्म्यस्योपदेशाज्जगच्च स इत्यस्य विवरणमत्र क्रियत इत्यर्थः । विष्णुः सृजति स्रष्टा ब्रह्मा विष्णुरित्यर्थः । आत्मानं विष्णुः सृजति सृज्यं वस्तुजातं विष्णु—शब्दार्थः । ततः किं प्रस्तुतः साम्यपरिहारायेत्यत्राह सृज्यसंहार्येति, सृज्यसामानाधिकरण्यात् सृज्यस्येव स्रष्टृसामानाधिकरण्यात् स्रष्टुरपि विभूतित्वमित्यर्थः । एवं संहार्यसंहर्त्रोरपि विभूतित्वं तर्हि विष्णोरपि विभूतित्वप्रसङ्ग इत्यत्राह जनार्दनेति, ब्रह्मशिवादिप्रपञ्चस्य परब्रह्मविभूतित्वे तत्रैव वचनान्तरं दर्शयति, यथेदमिति, यथोक्तमन-

न्तरमेवोच्यते इत्यर्थः । सामानाधिकरण्येन स्वरूपैक्यप्रतीतिव्यावृत्त्यर्थमाह अत्रेति, उपपाद्यांशः कः कश्चोपपादकांश इत्यपेक्षायाम्

विवृणोति—स्रष्टा सृजति चात्मानं विष्णुः पाल्यं च पाति च । उपसंह्रियते चान्ते संहर्ता च स्वयं प्रभुः ॥ इति च स्रष्टृत्वेनावस्थितं ब्रह्माणं सृज्यं च संहर्तारं संहार्य्यं च युगपन्निर्दिश्य सर्वस्य विष्णुतादात्म्योपदेशात्सृज्यसंहार्यभूताद्वस्तुनः स्रष्टृसंहर्त्रोर्जनार्दनविभूतित्वेन विशेषो दृश्यते जनार्दनविष्णुशब्दयोः पर्यायत्वेन ब्रह्मविष्णुशिवात्मिकामिति विभूतिमत एव स्वेच्छया लीलार्थं विभूत्यन्तर्भाव उच्यते, यथेदमनन्तरमेव उच्यते—पृथिव्यापस्तथा तेजो वायुराकाशमेव च सर्वेन्द्रियान्तःकरणं पुरुषाख्यं हि यज्जगत् । स एव सर्वभूतात्मा विश्वरूपो यतोऽव्ययः । सर्गादिकं ततोऽस्यैव भूतस्थमुपकारकम् ॥ स एव सृज्यः स च सर्गकर्त्ता स एव पात्यत्ति च पाल्यते च । इति, ब्रह्माद्यवस्थाभिरशेषमूर्त्तिः विष्णुर्वरिष्ठोवरदो वरेण्य इति,

उक्तं विवृणोति सर्वेश्वरेश्वर इति, । हेत्वंशं व्याचष्टे सर्वभूतानामयमिति, रूप-शब्दस्य शरीरपरत्वनिश्चयाय वचनान्तरमाह वक्ष्यतीति, विश्वरूपोयतोऽव्यय इत्यत्र अव्यय शब्दः किमर्थमित्यत्राह एतदुक्तमिति, अव्यय-शब्दो विरोधशङ्का ऽनुवादपर इत्यर्थः । भगवतो निरवद्यत्वाद्युपपत्त्यर्थमाह आत्मेति, सर्गादिकमित्यादिश्लोकार्थं उच्यते भूतस्थं सर्गादिकं सर्वप्राणिगतसर्गादिव्यापारजातम् अस्यैवोपकारकं परमात्मनो लीलारसनिष्पादकत्वात्तस्यैव शेषभूतमित्यर्थः । तत्र हेतुस्तत इति विवक्षित इति विश्वरूपत्वादित्यर्थः

अत्र सामानाधिकरण्यनिर्दिष्टं हेयमिश्रप्रपञ्चता-दात्म्यं निरवद्यस्य निर्विकारस्य समस्तकल्याणगुणात्मकस्य ब्रह्मणः कथमुपपद्यत इत्याशङ्क्य स एव सर्वभूतात्मा विश्वरूपो यतोऽव्यय इति स्वयमेवोपपादयति स एव सर्वेश्वरेश्वरः परब्रह्मभूतो विष्णुरेव सर्वं जगदिति प्रतिज्ञाय सर्वभूतात्मा विश्वरूपो यतोऽव्यय इति हेतुरुक्तः, सर्वभूतानामयमात्मा वि*श्वरूपो यतोऽव्यय इत्यर्थः, वक्ष्यति च तत्सर्वं वै हरेस्तनुरिति,—एतदुक्तं भवति अस्याव्ययस्यापि परस्य ब्रह्मणो विष्णोर्विश्वशरीरतया तादात्म्यमविरुद्धमिति, आत्मशरीरयोश्च स्वभावा व्यवस्थिता एव, एवंभूतस्य सर्वेश्वरस्य विष्णोः प्रपञ्चान्तर्भूतनियाम्यकोटिनिविष्टब्रह्मादिदेव—

एवं शरीरशरीरिभावनिबन्धनं सामानाधिकरण्यमाह स एवेति,सृज्यो मनुष्यादिः सर्गकर्ता ब्रह्मा च स एव तदुभयशरीरकः परमात्मेत्यर्थः पाल्यते चेति चकारेणाद्यते चेति विवक्षितम्। ब्रह्माद्यवस्थाभिः—ब्रह्मत्वाद्यवस्थाभिः। अवस्थायोगः सद्वारक इत्याह अशेषमूर्तिरिति, वरद इत्युपायत्वं, वरेण्य इत्युपेयत्वं, वरिष्ठ इति तदुपयोगिगुणवत्त्वं चाभिप्रेतम्, एवंभूतस्येति पूर्वोक्तब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्त इति एतदर्थोपपादने प्रोक्त इत्यर्थः। अत्रैव प्रबन्धेऽयमर्थः स्पष्ट इत्याह तदेतदिति,-हिरण्यगर्भो भगवान् वासवोऽथ प्रजापतिरित्यारभ्याशुद्धास्ते समस्तास्तु देवाद्याः कर्म्मयोनय इत्यन्तेन कर्म्मवश्यत्वमुक्तमित्यर्थः। समस्ताश्शक्त-

* विश्वशरीर इति पा०।

यश्चैता इत्यारभ्य जगतामुपकाराय न सा कर्म्मनिमित्तिकेत्यन्तेन स्वेच्छावतार उक्त इत्यर्थः ।

तिर्यङ्मनुष्येषु तत्तत्समाश्रयणीयत्वाय स्वेच्छाऽवतारः पूर्वोक्तः, तदेतद्ब्रह्मादीनां भावनात्रयान्वयेन कर्म्मवश्यत्वं भगवतः परब्रह्मभूतस्य वासुदेवस्य निखिलजगदुपकाराय स्वेच्छया स्वेनैव रूपेण देवादिष्ववतार इति च षष्ठेंऽशे शुभाश्रयप्रकरणे सुव्यक्तमुक्तम्, अस्य देवादिरूपेणावतारेष्वपि न प्राकृतो देह इति महाभारते—न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः । इति प्रतिपादितः, श्रुतिश्च अजायमानो बहुधा विजायते, तस्य धीराः परिजानन्ति योनिमिति, कर्म्मवश्यानां ब्रह्मादीनामनिच्छतामपि

विग्रहवैलक्षण्ये प्रमाणं महाभारते दर्शयति—अस्येति, उक्तार्थविषयां श्रुतिमाह श्रुतिश्चेति, आपाततोव्याहति शङ्कापरिहारार्थं तद्व्याचष्टे कर्म्मवश्यानामिति, शुभेतरजन्माकुर्वन्नपीत्यन्तेन अजायमान इति पदं व्याख्यातं, स्वेच्छयेत्यादिना बहुधा विजायत इत्येतद् व्याख्यातं ब्रह्मादीनां जन्महेतुतत्फलवपूंषि यानि न तान्यस्येत्यजायमानशब्दस्यार्थः हेतुः कर्म्म, तत्फलं तदनुभवः, प्राकृतं च वपुस्तेषां तद्विलक्षणहेतुफलवपुरन्वितोऽवतार इति बहुधा विजायत इत्यस्यार्थः हेतुः स्वेच्छा, फलं जगदुपकारः, वपुरप्राकृतं चेति तस्य धीराः परिजानन्ति योनिमित्येतद्व्याचष्टे तस्येति, योनि—शब्दस्योपादानकारणपरत्वव्यावृत्त्यर्थं जन्मेत्युक्तं, धीरशब्दस्य धैर्यगुणान्वितपरत्वव्यावृत्त्यर्थं तद्व्याचष्टे धीमतामग्रेसरा इति, धियमीरयन्तीति व्युत्पन्नो धीर—शब्दः, अतो यथोक्त एवार्थः ।

तत्तत्कर्म्मानुगुणप्रकृतिपरिणामरूपभूतसंघसं-

स्थानविशेषदेवादिशरीरप्रवेशरूपं जन्मावर्जनीयम्, अयं तु सर्वेश्वरः सत्यसङ्कल्पो भगवानेवंभूतशुभेतरजन्माकुर्वन्नपि स्वेच्छया स्वेनैव निरतिशयकल्याणरूपेण देवादिषु जगदुपकाराय बहुधा जायते, तस्यैतस्य शुभेतरजन्माकुर्वतोऽपि स्वकल्याणगुणानन्त्येन बहुधा योनिं बहुविधजन्म धीरा—धीमतामग्रेसरा जानन्तीत्यर्थः, तदेतन्निखिलजगन्निमित्तोपादानभूतात् जन्माद्यस्य यतः,

न च स्वरूपेण च नित्यत्वमजायमानत्वं विग्रहद्वारकं जायमानत्वमिति वाच्यम् अस्मदादीनामपि तुल्यत्वाद्धीराः परिजानन्तीति वक्तुमयोगात्, अत एवाजायमानत्वं परमार्थः जन्म तु काल्पनिकमित्यपि परास्तम् अतो यथोक्त एवार्थः । अवैदिकप्रतिपत्तेः पर्वत्रयं दृश्यते प्रकृतिरुपादानं रुद्रो निमित्तमित्येकं, नारायणकारणत्वे श्रुतिभिरुपपादिते नारायण उपादानं रुद्रोनिमित्तमित्येकं मतं, तत्र निमित्तोपादानयोरैक्ये दर्शिते जगत्कारणं मुक्तिदं मुक्तप्राप्यमन्यत् परमस्तीत्येकं, तत्र पूर्वोक्तं मतद्वयं पूर्वमेव निरस्तम् । अथ कारणादन्यस्य प्राप्यत्वं निरस्यति तदेतदिति, तदेतच्छब्दौ शब्दान्तरैः समस्तौ तस्मादेतस्मादित्यर्थः । पूर्वपक्षशङ्कापरमत इत्यादिसूत्रम् अन्यानि सिद्धान्तसूत्राणि तेषामर्थो भाष्ये विस्तरेणानुसन्धेयः । एष सेतुर्विधरण इत्यादौ सेतु—शब्दोऽसङ्करकरत्वार्थः । अमृतस्यैष सेतुरित्यपि स्वयमेव स्वस्य प्रापक इत्यर्थः । चतुष्पाद् ब्रह्म षोडशकलमित्यादिपरिच्छेदोऽनुसन्धानार्थः । व्यापिन आलोकस्य विनियोगाय वातायनादिपरिच्छेदवत् ततो यदुत्तरतरमित्यादयः पूर्वमेव व्याख्याता इति न जगत्कारणादन्यस्य प्राप्यत्वमित्यर्थः ।

प्रकृतिश्च प्रतिज्ञादृष्टान्ताऽनुपरोधादित्यादिसूत्रैः प्रतिपादितात् परस्माद्ब्रह्मणः परमपुरुषादन्यस्य कस्य-

चित्परतरत्वं परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्य इत्याशङ्क्य सामान्यात्तु बुद्ध्यर्थः पादवत्, स्थानविशेषात् प्रकाशादिवत्, उपपत्तेश्च, तथाऽन्यप्रतिषेधात्, अनेन सर्वगतत्वमायामशब्दादिभ्य इति सूत्रकारः स्वयमेव निराकरोति,

पूर्वं श्रुतौ चतुर्मुखस्य परमकारणत्वशङ्का परास्ता । अथोपबृंहणे चतुर्मुखकारणत्वशङ्का निराक्रियते मानवे चेति, प्रादुरासीत्तमोऽनुद इति यद्वै प्रोक्तं गुणसाम्यं प्रधानं तद्वै विप्राः प्रवदन्त्यनिरुद्धमित्यनिरुद्धोऽण्डाधिष्ठाता प्रादुरासीदिति दर्शयितुं चतुर्मुखोत्पत्तेः पूर्वमण्डकारणत्वं तत्प्रेरकत्वं च चतुर्मुखस्यानुपपन्नमिति दर्शयितुं च प्रादुरासीत्तमोनुद इति वाक्यमुपात्तं सिसृक्षुर्विविधाः प्रजाः सृज्यस्य चतुर्मुखस्य स्वस्रष्टा सिसृक्षुत्वानुपपत्त्या न तस्य परमकारणत्वमित्यभिप्रायः । अप एव ससर्जादौ, तस्मिन् जज्ञे स्वयं ब्रह्मेति वचनद्वयमण्डोत्पन्नचतुर्मुखस्याण्डकारणत्वस्रष्टृत्वानुपपत्त्या पूर्व्वश्लोकस्यस्वयंभू-शब्दोऽपि नारायणपर इत्यभिप्रायेणोपात्तं जन्मश्रवणादिति क्षेत्रज्ञत्वापवादकस्यावतारूपत्वस्याश्रवणे सत्युच्यमानं जन्म स्वव्यापककर्म्मसंबन्धापेक्षकत्वात् क्षेत्रज्ञत्वसाधकमित्यभिप्रायः । ईश्वरेण स्वरूपैक्याद्ब्रह्मणो जन्मपरध्यानादिकर्म्म च लीलेति चेत् इन्द्रेऽपि तथा किं न स्यात्, जन्मकर्म्मणोर्लीलारूपत्वात् स्वरूपैक्यं स्वरूपैक्याज्जन्मकर्म्मणोर्लीलात्वमिति

मानवे च शास्त्रे-प्रादुरासीत्तमोनुदः, सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु वीर्यमपासृजत्, तस्मिन् जज्ञे स्वयं ब्रह्मेति ब्रह्मणो जन्मश्रवणात्तस्य क्षेत्रज्ञत्वमेवावगम्यते, तथा च स्रष्टुः परमपुरुषस्य तद्विसृष्टस्य च ब्रह्मणः-अयनं तस्य ताः पूर्व्वं तेन

नारायणः स्मृतः तद्विसृष्टस्स पुरुषो लोके ब्रह्मेति कीर्त्यते ॥ इति नामनिर्देशाच्च

अन्योन्याश्रयणं स्यादिति चेत् चतुर्मुखादीनामपि तुल्यं परमपुरुषस्योत्तरनारायणेऽवताररूपं जन्मेति प्रतिपादितं तदेव चतुर्मुखजन्मनोऽवताररूपत्वे प्रमाणमिति चेत् इन्द्रजन्मनस्तथात्वे तदेव प्रमाणं किं न स्यात् प्रागुक्तान्योन्याश्रयणादिति चेत् चतुर्मुखेऽपि तुल्यमित्याद्यनुसन्धेयम् । चतुर्मुखस्य परमकारणत्वानुपपत्तिं तत्प्राकरणिकग्रन्थेनोपपादयति तथा चेति, मानवश्लोकार्थनिर्णायकत्वेन श्रीविष्णुपुराणवचनमाह तथा चेति, भावनात्रयान्वयादिति अनुष्ठेयविषय आन्तरः प्रयत्नो भावना, सा त्रिविधा यथा—त्रिविधा भावना भूप! विश्वमेतन्निबोध ताम् । कर्म्माख्या ब्रह्मसंज्ञा च तथा चैवोभयात्मिका ॥ कर्म्मभावात्मिका ह्येका ब्रह्मभावात्मिका परा उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥ सनन्दनादयो ब्रह्मभावभावनया युताः । कर्म्मभावनया चान्ये देवाद्याः स्थावरावराः ॥ हिरण्यगर्भादिषु च ब्रह्मकर्म्मात्मिका द्विधा । अधिकारबोधयुक्तेषु विद्यते भावभावना ॥ अक्षीणेषु समस्तेषु विशेषज्ञानकर्म्मसु ॥ इति, विश्वमेतत् त्रिविधा भावना भावनात्रयान्वितमित्यर्थः, तां त्रिविधां भावनां निबोध भावनामवच्छेदकसञ्ज्ञया निर्द्दिशति कर्म्माख्येति, कर्म्माख्या कर्म्मभावनेत्यर्थः, एकस्यैव सञ्ज्ञात्रयक्लृप्तिशङ्काव्यावृत्त्यर्थमाह कर्म्मभावात्मिकेति,

तथा च वैष्णवे पुराणे हिरण्यगर्भादीनां भावनात्रयान्वयादशुद्धत्वेन शुभाश्रयत्वानर्हतोपपादनात् क्षेत्रज्ञत्वं निश्चीयते ॥

भावभावना भावार्थाः कर्म्मशब्दास्तेभ्यः क्रियाः प्रतीयेरन्निति वचनात्, भावोऽनुष्ठेयः, अतोऽनुष्ठेयविषयभावना आन्तर उद्योगो भावभावना सा कर्म्मभावात्मिका कर्म्मरूपानुष्ठेयविषया, ब्रह्मभावात्मिका—उपासनरूपानुष्ठेयविषया, उभयात्मिका कर्म्मोपासनरूपोभयानुष्ठेयविषयेति त्रिविधेत्यर्थः । सनन्दनादय इति ब्रह्मभावभावनया युताः उपासनारूपानुष्ठेय-

विषयभावनान्विता इत्यर्थः । अत्र ब्रह्म-शब्द उपासनरूपज्ञानपर्यायः—आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यते । शब्दब्रह्मागममयं परं ब्रह्मविवेकजम् । द्वे ब्रह्मणी वेदितव्ये द्वे विद्ये वेदितव्ये वै इति चेति, ब्रह्म-शब्दस्य ज्ञानविद्याशब्दनिर्दिष्टागमजन्योपासनरूपज्ञानद्वयपर्यायत्वेन भगवता पराशरेणैव व्याख्यातत्वात्स्थावरावरा इति स्थावर-शब्देन तदभिमानिदेवता विवक्षिता, सनन्दनादीनां समाधिना विरोधिसकलकर्म्मक्षयात्समाधिनिष्पत्तिपौष्कल्येनानवरतब्रह्मानुसन्धानैकतानत्वान्न कर्म्मानुष्ठानावसरः, प्रधानाविरोधेन ह्यङ्गानुष्ठानं, तस्मात्ते ब्रह्मभावनया युताः, हिरण्यगर्भादयो जगन्निर्वाहाधिकृतत्वात्कदाचित्कर्म्मानुष्ठानं कदाचिदुपासनं चेति उभयभावनयाऽन्विताः । इतरे देवमनुष्याद्याः कर्म्मभावनयाऽन्विताः, सनन्दनादयो हिरण्यगर्भादयः देवाद्या इत्यादि-शब्दस्य को विषय आदि-शब्दस्यासङ्कोचान्मुक्तेष्वपि भावनाद्वयप्रसङ्ग इति शङ्काव्यावृत्त्यर्थं प्रयोजकमाह अधिकार इति, कर्म्मण्यैश्वर्यबोधो ऽधिकार इति अधिकारलक्षणं स्वप्रयोजनसाधनत्वात् कर्म्मणि स्वकीयत्वबुद्धिरधिकार इत्यर्थः, अधिकारबोधयुक्तेषु—अधिकाररूपबोधयुक्तेषु अनुष्ठेयविषयस्वकीयत्वबुद्धियुक्तेष्वित्यर्थः । मुमुक्षोरुपासने स्वकीयत्वबुद्धिर्बुभुक्षोः कर्म्मणि स्वकीयत्वबुद्धिः । अधिकारबोधश्च केष्वित्यत्राह अक्षीणेष्विति, विशेषज्ञानकर्म्मसु विशेषज्ञानं देवोऽहं मनुष्योऽहमित्यादिज्ञानं विशेषज्ञाने तद्धेतुषु च कर्म्मसु विद्यमानेष्वधिकारबोधः सम्भवति तद्युक्तेषु भावनात्रयान्वय इति न मुक्तेषु प्रसङ्ग इत्यर्थः । एवं हिरण्यगर्भादीनां भावनात्रयान्वयेनाशुद्धत्वात् मुमुक्षुभिस्ते अनुपास्या इति श्रीविष्णुपुराणे प्रतिपादनात् क्षेत्रज्ञत्वनिश्चय इत्यर्थः । एवं श्रुतिवाक्येषु स्वपक्षसाधनप्रमाणोपन्यास-परमतशङ्कानिरासौ कृतौ, तथोपबृंहणेष्वपि पूर्वं स्वपक्षसाधनवचनान्युपन्यस्य परमतशङ्कानिरासश्च कृतः, एवं प्रथमश्लोकोक्तं विष्णवे इति पदं विवृतं भवति ॥

उक्तार्थस्येमे सिद्धार्थे व्युत्पत्त्यभाववादं व्युदस्यति तन्निरासश्च सर्ववेदान्त्यभिमतः । तत्र पूर्वपक्षमाह यद्यपीत्यादीना, अर्थवादादिषु सिद्धार्थपरत्वव्यावृत्त्यर्थं सर्वस्येत्युक्तं, विधिभागस्य तावत् कार्यपरत्वं सुव्यक्तम्, अर्थवादभा-

गस्य विधेयस्तुतिपरत्वेन मन्त्रभागस्यानुष्ठेयार्थप्रकाशनपरत्वेन च तयोः कार्यपरत्वमित्यभिप्रायः । कुत इत्याह व्यवहारादिति, व्यवहारः प्रवृत्तिः—गामानयेति प्रयोजकवृद्धप्रयुक्तवाक्यश्रवणसमनन्तरभाविनी प्रयोज्यवृद्धस्य प्रवृत्तिरित्यर्थः । सामान्येन शब्दस्य कार्यरूपोऽर्थ इति निश्चिते आवापोद्वापभेदेनानुवृत्तशब्दस्यानुवृत्तमर्थं, व्यावृत्तस्य च व्यावृत्तमर्थं च जानातीति प्रातिस्विकव्युत्पत्तिः स्यात्, विभक्त्यर्थव्युत्पत्तिश्च तथा पुत्रस्ते जातः, नायं सर्पो रज्जुरेवैषेत्यादिवाक्येषु हर्षभयनिवृत्तिहेतुवाचित्वावगमेऽपि हेतुविशेषनिर्द्धारणायोगान्न तत्र सिद्धार्थविषया व्युत्पत्तिः ।

यदपि कैश्चिदुक्तं सर्वस्य शब्दजातस्य विध्यर्थवादमन्त्ररूपस्य कार्याभिधायित्वेनैव प्रामाण्यं वर्णनीयं व्यवहारादन्यत्र शब्दस्य बोधकत्वशक्त्यवधारणासम्भवाद्व्यवहारस्य च कार्यबुद्धिमूलत्वात् कार्यरूप एव वेदार्थः, न परिनिष्पन्ने वस्तुनि शब्दः प्रमाणमिति, अत्रोच्यते प्रवर्त्तकवाक्यव्यवहार एव शब्दानामर्थबोधकत्वशक्त्यवधारणम्—

अस्य शब्दस्यायमर्थ इति व्युत्पत्तिश्च न प्रथमं सम्भवतीति व्युत्पन्नकतिपयशब्दस्यैव हि सा, तस्मात्प्रथमव्युत्पत्तिर्व्यवहारादेवेति सा कार्यार्थविषया, तत्र वाक्यान्तरेष्वपि प्रथमव्युत्पत्तौ कार्यपरतयाऽवगतकतिपयशब्दसमाभिव्याहृतपदान्तरेषु तत्समभिव्याहारबलात्कार्यपरत्वं निश्चिनोतीत्याद्यभिप्रेतं विस्तरादनुक्तं, परिहरति अत्रोच्यत इति, कोयं राजाज्ञेति न हि प्रामाणिकमित्यभिप्रायः । अत्यन्तसुकरमिति यादृच्छिकव्युत्पत्तौ बुद्धिपूर्व्वकव्युत्पत्तौ च सुकरमिति भावः । तदुपपादयति तथा हीति, प्रथमं यादृच्छिकव्युत्पत्तेः सिद्धार्थविषयत्वं दर्शयति केनचिदिति, हस्तचेष्टादिकृत् तज्ज्ञश्च द्वौ पुरुषौ, चेष्टाभिज्ञो व्युत्पित्सुरेकः दण्डापेक्षी चैक इति चत्वारः पुरुषाः, तत्र व्युत्पत्तिर्हस्तचेष्टादिज्ञानस्य कतिपयव्युत्पत्त्यपेक्षा नास्तीति

दर्शयितुं मूकवदित्युक्तम्, आवापोद्वापभेदेन शब्दविशेषाणामर्थविशेषव्युत्पत्तिरत्रापि तुल्या । अथ बुद्धिपूर्व्वकव्युत्पत्तिरेव लोके प्रचुरेति तां दर्शयति तथेति, तातादयः सम्बन्धिशब्दाः मनुष्यादयस्संबन्धिशब्दा बालानां प्रथमं सम्बन्धिशब्दव्युत्पत्तिर्जायत इति लोकसिद्धं, सा च बुद्धिपूर्व्वकशित्तयैवोपपद्यते

कर्त्तव्यमिति किमियं राजाज्ञा, सिद्धवस्तुषु शब्दस्य बोधकत्वशक्तिग्रहणमत्यन्तसुकरं तथा हि केन चिद्धस्तचेष्टादिना अपवरके दण्डः स्थित इति देवदत्ताय ज्ञापयेति प्रेषितः कश्चित्तज्ज्ञापने प्रवृत्तोऽपवरके दण्डः स्थित इति शब्दं प्रयुङ्क्ते मूकवद्धस्तचेष्टामिमां जानन् पार्श्वस्थोऽन्यः प्रागव्युत्पन्नोऽप्येतस्यार्थस्य बोधनायापवरके दण्डःस्थित इति शब्दस्य प्रयोगदर्शनादस्यार्थस्यायं शब्दो बोधक इति जानातीति किमत्र दुष्करं, तथा बालस्तातोऽयमियं माताऽयं मातुलोऽयं मनुष्योऽयं मृगश्चन्द्रोऽयमयं च सर्प इति मातापितृप्रभृभिः शब्दैः शनैः शनैरङ्गुलीनिर्द्देशेन तत्र तत्र बहुशः शिक्षितस्तैरेव शब्दैस्तेष्वर्थेषु स्वात्मनश्च बुद्ध्युत्पत्तिं दृष्ट्वा तेष्वर्थेषु

न हि प्रयोजकवृद्धो व्युत्पित्सुप्रतियोगिकमातुलादिविषये मातुलादिशब्दं प्रयुङ्क्ते अपि तु स्वप्रतियोगिकविषय एव प्रयुङ्क्ते, अतो बालस्य स्वप्रतियोगिकमातुलादिविषये व्युत्पत्तिर्जायमाना वृद्धव्यवहारान्नोपपद्यत इति बुद्धिपूर्व्वकव्युत्पत्तेः प्रथमभावित्वमभ्युपेत्यमिति सम्बन्धिशब्दप्रयोगाभिप्रायः, तस्मिन्नेवार्थे तस्यैव शब्दस्याङ्गुलिनिर्द्देशपूर्व्वकं बहुशः प्रयोगेन

बुद्धौ वासितत्वात्तत्तच्छब्दप्रयोगे तत्तदर्थबुद्धिर्जायते तस्मादस्यार्थस्यायं बोधक इत्यभिप्रायेण अङ्गुलिनिर्द्देशः कृत इति बालो जानातीत्यर्थः । सम्बन्धान्तराभावादिति प्रत्यक्षं सम्बन्धसत्तया ज्ञापकं लिङ्गशब्दौ ज्ञाततया ज्ञापकौ, तत्र लिङ्गं जन्यजनकभावादिसम्बन्धान्तरज्ञानसापेक्षं ज्ञापकं शब्दस्य तु बोध्यबोधकभावसम्बन्धो ज्ञातव्यः, अतो बोध्यबोधकभावातिरेकेण सम्बन्धाभावादित्यर्थः, एतस्य व्युत्पादकोऽपि पुरुषः कार्य्यार्थेषु व्युत्पत्तिमानिति न वक्तव्यं सिद्धार्थे व्युत्पत्तिमद्भिर्बालैः शब्दप्रयोगदर्शनात्, तद्व्युत्पादको वाक्यप्रयोक्ता पुरुषो ऽपि सिद्धार्थे व्युत्पत्तिमानिति दृष्टप्रकारेणाभ्युपगम्यतामित्यभिप्रायेण स्वयमपि सर्ववाक्यजातं प्रयुङ्क्ते इत्युक्तम्, एवं व्युत्पत्तौ न ह्यभिहितान्वयप्रसङ्गः प्रातिस्विकव्युत्पत्तेरन्विताभिधानव्युत्पत्त्युपयोगित्वात्, यथा कार्य्यार्थव्युत्पत्तिपक्षे आवापोद्वापरूपेण पाश्चात्यप्रातिस्विकपदव्युत्पत्तिर्नान्विताभिधानविरोधिनी

तेषां शब्दानामङ्गुलिनिर्देशपूर्व्वकः प्रयोगः संबन्धान्तराभावात् सङ्केतयितृपुरुषाज्ञानाच्च बोधकत्वनिबन्धन इति क्रमेण निश्चित्य* पुनरप्यस्य शब्दस्यायमर्थ इति पूर्व्ववृद्धैः शिक्षितः सर्वशब्दानामर्थमवगम्य स्वयमपि सर्ववाक्यजातं प्रयुङ्क्ते ।

अपि तु तदुपयोगित्येव तथेत्यर्थः । अन्विताभिधानपक्षाभ्युपगमश्च कल्पनालाघवार्थः अभिहितान्वयपक्षे पदानां स्वार्थभिधानशक्तिः तत्रापि यथा पदार्थानां परस्परान्वयबोधनार्हत्वं भवति तथा स्वार्थबोधनशक्तिः तत्तत्पदार्थानां च परस्परान्वयबोधनशक्तिश्च कल्पनीया । अन्विताभिधानपक्षे तु पदानां स्वार्थबोधनशक्तेरेवान्वयपर्यन्तत्वमात्रमेवेति न कल्पनागौरवमिति, एवं यादृच्छिकी वा बुद्धिपूर्विका वा आद्या व्युत्पत्तिः सिद्धार्थविषयाऽस्तु ततः किमित्यत्राह एवमेवेति, सर्वपदानां लौकिकवैदिकावि-

* निश्चिता इति पा० ।

भागेनेत्यर्थः । यथाऽवस्थितसंसर्गविशेषबोधकत्वं चेति सिद्धार्थपरं वाक्यं सिद्धपरमेव स्यात् कार्याभिधायि वाक्यं कार्यपरं स्यात् न तु सिद्धार्थपराणां कार्यार्थपरत्वं कल्पनीयमिति भावः । इत्यादिनिर्बन्ध इति, आदि-शब्देन सर्वशब्दानां कार्यपरत्वं कृत्स्नस्य वेदस्य कार्याभिधायित्वं च गृह्यते सिद्धार्थे व्युत्पत्तिसम्भवात् कार्यार्थ एव व्युत्पत्तिरित्यादिनिर्बन्धोऽनुपपन्न इत्युक्तं, ततः किमित्यत्राह अत इति, एवं सिद्धार्थे आद्या व्युत्पत्तिरुक्ता तदभावेऽपि ब्रह्मणः सिद्धिमुपपादयति अपि चेति, विशिंषन् विषयः अवच्छेदकः कार्यस्यावच्छेदका यागदानादयः अत्रोपासनं विषयः उपासनावच्छिन्नकार्याधिकृतः तत्राधिकारी तत्र तादर्थ्यबोधवान् तस्य विशेषणं फलं फलत्वेन सिद्धौ

एवमेव सर्वपदानां स्वार्थाभिधायित्वं, संघातविशेषाणां च यथाऽवस्थितसंसर्गविशेषवाचित्वं च जानातीति कार्यार्थ एव व्युत्पत्तिरित्यादिनिर्बन्धो निर्निबन्धनः, अतः परिनिष्पन्ने वस्तुनि शब्दस्य बोधकत्वशक्त्यवधारणात्सर्वाणि वेदान्तवाक्यानि सकलजगत्कारणं सर्वकल्याणगुणाकरमुक्तलक्षणं ब्रह्म बोधयन्त्येव । अपि च कार्यार्थ एव व्युत्पत्तिरस्तु वेदान्तवाक्यान्यप्युपासनविषयकार्याधिकृतविशेषणभूतफलत्वेन

उदाहरणत्रयं दर्शयति विधिवाक्यप्रतिपन्नस्वरूपस्य फलस्याप्यर्थवादोक्तविशेषणत्वाभ्युपगमे उदाहरणं दुःखासम्भिन्न इत्यादि फलरूपस्यैवार्थवादप्रतिपन्नस्याभ्युपगमे उदाहरणं रात्रिसत्रप्रतिष्ठा न केवलं विहितफलस्यैव विधेयविरोधिफलस्याप्यर्थवादोक्तस्याङ्गीकारे उदाहरणम् अपगोरणशतयातनासाध्यसाधनभावः । उपासनवाक्यं किं तत्र ब्रह्मणः फलत्वं कथमित्यत्राह तथा हीति, अस्मिन्वाक्ये न विधिश्रवणमिति शङ्कायां फलितमर्थमाह परप्राप्तीति, फलसम्बन्धश्रवणे विधिकल्पनस्य न्याय्यत्वादिति-

भावः स्वर्गविशेषणदुःखासम्भिन्नत्वादिवत् ब्रह्मस्वरूपेण सह तद्विशेषणस्यापि सिद्धिरित्याह अत्रेति, ब्रह्मस्वरूपं तद्विशेषणं च सिद्ध्यतु ततः किमित्यत्राह तदन्तर्गतमिति, तदन्तर्गतं ब्रह्म तद्विशेषणान्तर्गतमित्यर्थः एवमौपनिषदोपासनविधीनां फलत्वेन ब्रह्मणः सिद्धिरुक्ता । अथ सर्वविधिसाधारणोक्तिरुच्यते एवं चेति, अर्थवादानां स्तावकत्वसिद्ध्यर्थं स्वार्थे तात्पर्यमत्रोच्यते, एवं च सति विध्युपयोग्यर्थेष्वभ्युगन्तव्येषु सत्स्वित्यर्थः

दुःखासम्भिन्नदेशविशेषरूपस्वर्गादिवद्रात्रिसत्रप्रतिष्ठावदपगोरणशतयातनासाध्यसाधनभाववच्च कार्योपयोगितयैव सर्वं बोधयन्ति—तथा हि ब्रह्मविदाप्नोति परमित्यत्र ब्रह्मोपासनविषयकार्याधिकृतविशेषणभूतफलत्वेन ब्रह्मप्राप्तिः श्रूयते, परप्राप्तिकामो ब्रह्म विद्यादिति, अत्र प्राप्यतया प्रतीयमानं ब्रह्मस्वरूपं तद्विशेषणं च सर्वं कार्योपयोगितयैव सिद्धं भवति तदन्तर्गतमेव जगत्स्रष्टृत्वं संहर्त्तृत्वमाधारत्वमन्तरात्मत्वम् इत्याद्युक्तमनुक्तं च सर्वमिति न किंचिदनुपपन्नम् ।

प्रमाणान्तरविरुद्धत्वे तत्प्रतिपादयितुं न शक्नोति शास्त्रमित्यविरुद्धा इत्युक्तं, प्रमाणान्तरसिद्धत्वेऽप्यनुवादः स्यादित्यपूर्व्वाश्चेत्युक्तम् । विध्युपयोगित्वेनार्थवादानामपि स्वार्थे प्रामाण्ये द्रमिडाचार्यग्रन्थमाह यथोक्तमिति, असद्गुणकथनं हि स्तुतिः तत्कथमसता स्तुत्यनुपपत्तिरित्याह एतदुक्तमिति, अयं न्यायो न केवलमवदानस्तुतिमात्रविषयः अपि तु सर्वार्थवादसाधारण इति च दर्शयितुमेतदुक्तं भवतीत्यारम्भः, अदृष्टरूपानुगुणानित्यनेनानुवादरूपत्वं बाधितत्वं च व्यावृत्तम्, आराध्यदेवतास्तुतिद्वारा कर्म्मणः स्तुत्या च कर्म्मणि प्ररोचनां कुर्वन्तोऽर्थवादास्तद्गुणासद्भावे तत्कृतोत्कर्षोऽपि नास्तीति कर्म्मणि प्ररोचनां जनयितुं न शक्ताः स्युरित्यर्थः । अनयैव दिशेति विध्यपेक्षितार्थसिद्धिन्यायात्रासता स्तुतिरुपपद्यते

एवं च सति मन्त्रार्थवादगता ह्यविरुद्धा अपूर्वाश्चार्थाः सर्वे विधिशेषतयैव सिद्धा भवन्ति। यथोक्तं द्रमिडभाष्ये—ऋणं हि वै जायते इति श्रुतेरिति उपक्रम्य यद्यप्यवदानस्तुतिपरं वाक्यं तथाऽपि नासता स्तुतिरुपपद्यत इति, एतदुक्तं भवति सर्वो ह्यर्थवादभागो देवताराधनभूतयागादेः साङ्गस्याराध्यदेवतायाश्चादृष्टरूपान् गुणान् सहस्रशो वदन् सहस्रशः कर्म्मणि प्राशस्त्यबुद्धिमुत्पादयति तेषामसद्भावे प्राशस्त्यबुद्धिरेव न स्यादिति कर्म्मणि प्राशस्त्यबुद्ध्यर्थं गुणसद्भावमेव बोधयतीति अनयैव दिशा सर्वे मन्त्रार्थवादावगता ह्यर्थाः सिद्धाः। अपि च कार्यवाक्यार्थवादिभिः किमिदं कार्यत्वं नामेति वक्तव्यं कृतिभावभाविता कृत्युद्देश्यतेति चेत् किमिदं कृत्युद्देश्यत्वं यदधिकृत्य कृतिर्वर्तते तत्कृत्युद्देश्यत्वमिति चेत्

इति न्यायाच्चेत्यर्थः। मन्त्रार्थवादगता इति अर्थवादवन्मन्त्रगता अर्था अपि सिद्धा इत्यर्थः। छागस्य वपाया मेदस इति मन्त्रोक्तश्छागः पशुना यजेतेति विधेरपेक्षितत्वात्तदभ्युपगतो हि धात्वर्थः। स्तुतिपराणामपि मन्त्राणां स्वार्थे तात्पर्यं न चेत्स्तावकत्वं न सिद्ध्यति अनुष्ठेयार्थप्रकाशकत्वमपि मन्त्राणां स्वार्थे तात्पर्याभावे न सिद्ध्यति इन्द्रशदेवताकङ्कर्मेति हि तत्प्रकाशनं, तच्च देवतास्वरूपादौ तात्पर्यादेव सिद्ध्यतीत्यर्थः। एवं सिद्धार्थे व्युत्पत्तिस्तदभावे ऽपि विधिशेषतया ब्रह्मणः सिद्धिश्चोक्ता। अथ परोक्तं कार्यमनुपपन्नमित्याह अपि चेति, भावार्थस्य कर्म्मणोऽपि कृतिसाध्यत्वमस्ति स्वर्गादेरिष्टत्वमस्तीति तदुभयव्यावर्तकं कृतिप्राधान्यं कृत्युद्देश्यत्वमिति तृतीयाकारः कार्यस्याभ्युपगम्यते परैस्तस्य

प्राधान्यादेव कृत्स्नवेदतात्पर्यभूमित्वं चोच्यते, उक्तं कार्यमर्थं प्रतिपादयतो वेदस्य प्रामाण्यमिति टीका, कार्यमर्थं प्रधानतया प्रतिपादयत इति च पञ्चिका, कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयते इति

पुरुषव्यापाररूपायाः कृतेः कोऽयधिकारो नाम यत् प्राप्तीच्छया कृतिमुत्पादयति पुरुषः तत्कृत्युद्देश्यत्वमिति चेत् हन्त तर्हि इष्टत्वमेव कृत्युद्देश्यत्वम् ।

अथैवं मनुषे इष्टस्यैव रूपद्वयमस्ति इच्छाविषयतया स्थितिः, पुरुषप्रेरकत्वं च, तत्र प्रेरकत्वाकारः कृत्युद्देश्यत्वमिति, सोऽयं स्वपक्षाभिनिवेशकारितो वृथाश्रमः, तथा हि इच्छाविषयतया प्रतीतस्य

च, तत्प्रकरणं स तृतीयाकारोऽत्र दूष्यते, किमित्यादिस्पष्टं साध्यत्वदर्शनाय कृतिभावभावितेत्युक्तं, सा स्वर्गादेरप्यस्तीति तद्व्यावृत्त्यर्थं कृत्युद्देश्यतेत्युक्तं, तां दूषयितुं पृच्छति किमिदमिति, परिहरति यदधिकृत्येति, स्वप्रयोजनसाधनत्वात्स्वकीयत्वबुद्धिर्ह्यधिकारः, यदधिकृत्येति यत्साध्यतयाऽवलम्ब्येत्यर्थः । पुरुषबुद्धिरूपोऽधिकारः पुरुषव्यापाररूपकृतेर्न सम्भवतीत्यभिप्रायेणाह पुरुषेति, अत्राह यत्प्राप्तीति, कृतिमत्पुरुषेष्टत्वमिति फलितं दूषयति हन्त तर्हीति, एवं तृतीयाकारस्य परोक्तस्य तयोरन्यतरात्मकत्वे पर्यवसानमुक्तम् । पुनः परमतं शङ्कते अथैवमिति, सोपालम्भं परिहर्तुमुपक्रमते सोऽयमिति, कथं वृथाश्रम इत्यत्राह तथा हीति, यदेष्टस्योपायान्तरेण सिद्धिः तदा न स्वयं प्रवर्तते यदा स्वप्रयत्नादपि न सिद्ध्यति तदाऽपि न प्रवर्तते यदा स्वप्रयत्नादेव सिद्ध्यति तदा प्रवर्तते इति प्रेरकत्वं नाम कृतिसाध्यत्वान्तर्भूतमित्यर्थः । ननु स्वकृतिसाध्यत्वसत्तया न प्रवृत्तिः अपि तु तज्ज्ञानादेव प्रवृत्तिरिति तज्ज्ञातत्वमेव तृतीयाकार इत्यत्राह इच्छायामिति, ज्ञेयमेवाकारत्रयमभ्युपेतं भवता अस्माकं त्वाकारद्वयमेव ज्ञेयं तत्र कृतिसाध्यत्वम्

स्वप्रयत्नोपपत्तिमन्तरेणासिद्धिरेव प्रेरकत्वं तत एव प्रवृत्तेः, इच्छायां जातायामिष्टस्य स्वप्रयत्नोत्पत्तिमन्तरेणासिद्धिः प्रतीयते चेत् ततश्चिकीर्षा जायते ततः प्रवर्तते पुरुष इति तत्त्वविदां प्रक्रिया । तस्मादिष्टस्य कृत्यधीनात्मलाभत्वातिरेकि कृत्युद्देश्यत्वं नाम किमपि न दृश्यते—अथोच्येत इष्टताहेतुश्च पुरुषानुकूलता, तत्पुरुषानुकूलत्वं कृत्युद्देश्यमिति चेत् नैवम्—पुरुषानुकूलं सुखमित्यनर्थान्तरं तथा पुरुषाननुकूलं दुःखपर्यायम्, अतः सुखव्यतिरिक्तस्य कस्यापि पुरुषानुकूलत्वं न सम्भवति

ज्ञाततया प्रवृत्तिहेतुः, यस्तृतीयाकारो ज्ञाततया प्रवृत्तिहेतुरुक्तस्त्वया स एवाकारद्वयान्तर्भूत इत्युक्तमित्यर्थः । तत्त्वविदां प्रक्रियेति न त्वभिनिविष्टानामित्यर्थः । तस्मादिति निगमयति, परमतं शङ्कते अथोच्येतेति, इष्टत्वे हेतुः पुरुषानुकूलत्वं नाम तृतीयाकारः स एव कृत्युद्देश्यत्वमित्यर्थः । परिहरति नैवमिति, दृष्टान्तार्थं तथेत्यादिकमुच्यते कार्यं यथा दुःखव्यतिरिक्तत्वात्पुरुषप्रतिकूलं न भवति तथा सुखव्यतिरिक्तत्वादनुकूलत्वमपि तस्य नास्तीत्यर्थः । अत्र चोदयति ननु चेति, सुखव्यतिरिक्तदुःखनिवृत्तावनुकूलत्वदर्शनात्सुखव्यतिरिक्तकार्यस्याप्यनुकूलत्वमुपपद्यपद्यत इत्यर्थः । परिहरति नैतदिति, दुःखनिवृत्तावनुकूलत्वबुद्धिर्भ्रान्तिरिति वक्ष्यन्सुखदुःखयोर्विवेकं दर्शयति आत्मेति, ततः किमित्यत्राह तत्रेति, अनुकूलत्वात्सुखमिष्टं दुःखस्य प्रतिकूलत्वात्तन्निवृत्तिरपीष्टा । एवमिष्टतासाम्यादानुकूल्यभ्रम इत्यर्थः । दुःखनिवृत्तेरपीष्टत्ववदनुकूलत्वमप्यस्तीत्यनुकूलताबुद्धिर्न भ्रमः स्यादित्यत्राह तथा हीति,

ननु च दुःखनिवृत्तेरपि सुखव्यतिरिक्तायाः पुरु-

षानुकूलता दृष्टा, नैतत् आत्मानुकूलं सुखम् आत्मप्रतिकूलं दुःखम् इति हि सुखदुःखयोर्विवेकः, तत्रात्मानुकूलं सुखमिष्टं भवति तत्प्रतिकूलं दुःखं चानिष्टम्, अतो दुःखसंयोगस्यासह्यतया तन्निवृत्तिरपीष्टा भवति, तत एवेष्टतासाम्यादनुकूलताभ्रमः—तथा हि प्रकृतिसंस्पृष्टसंसारिणः पुरुषस्यानुकूलसंयोगः प्रतिकूलसंयोगः स्वरूपेणावस्थितिरिति च तिस्रोऽवस्थाः, तत्र प्रतिकूलसंबन्धनिवृत्तिश्च अनुकूलसम्बन्धनिवृत्तिश्च स्वरूपेणावस्थितिरेव ।

मुक्तस्यानुकूलसंयोग एवेति तद्व्यावृत्त्यर्थ संसारिण इत्युक्तं, प्रतिकूलनिवृत्तेरनुकूलत्वेऽन्यतरनिवृत्तिरन्यतरसंयोग इत्युक्तं स्यात् तदा सुषुप्तौ सुखदुःखयोर्द्वयोरपि प्रसङ्गः प्रतिकूलनिवृत्तिरनुकूलसंयोगः, अनुकूलनिवृत्तिः प्रतिकूलसंयोगश्च भवतीति तस्माद्दुःखनिवृत्तेरनुकूलत्वं नास्तीत्यर्थः । अत इष्टतासाम्यादनुकूलत्वबुद्धिर्भ्रम एवेति निगमयति तस्मादिति, तस्मात्सुखव्यतिरिक्तस्य नियोगस्य अनुकूलत्वमनुपपन्नमित्याह अत इति, नियोगस्य सुखव्यतिरिक्तत्वेन ह्यनुकूलत्वं दूषितं नियोगः सुखविशेष एवेति, तस्यानुकूलत्वं नाम तृतीयाकारः सम्भवतीति शङ्कायां सुखविशेषत्वं निराकरोति इष्टस्येत्यादिना, अत्र तृतीयाकारदूषणे क्रियमाणे अर्थाद् द्वितीयाकारश्च दूषितो भवति इष्टत्वनिरासात्, इष्टस्य-स्वत इष्टस्येत्यभिप्रायः । स्वत इष्टत्वं च सुखस्य स्वतःशब्देन साधनतयाइष्टत्वव्यावृत्तिः नियोगत्वं-प्रेरकत्वं स्थिरत्वं स्थायित्वमपूर्वत्वं प्रमाणान्तरागोचरत्वम्, एतत्सर्वमिष्टस्यार्थस्य निर्वर्तकतयैव सिद्ध्यति इष्टसाधनत्वज्ञानात् प्रवृत्तिहेतुत्वं कालान्तरभाविस्वर्गसाधनत्वात् स्थिरत्वं, लौकिकप्रत्यक्षसिद्धक्षणिकधात्वर्थातिरिक्तस्थिरसाधनत्वादपूर्वत्वं चेत्यर्थः ।

तस्मात्प्रतिकूलसंयोगे वर्तमाने तन्निवृत्तिरूपा स्वरूपेणावस्थितिरपीष्टा भवति, तत्रेष्टतासाम्यादनुकूलताभ्रमः । अतः सुखरूपत्वादनुकूलतायाः नियोगस्यानुकूलतां वदन्तं प्रामाणिकाः परिहसन्ति, इष्टस्यार्थविशेषस्य निर्वर्तकतयैव हि नियोगस्य नियोगत्वं, स्थिरत्वमपूर्व्वत्वं च प्रतीयते, स्वर्गकामो यजेतेत्यत्र कार्यस्य क्रियातिरिक्तता स्वर्गकामपदसमभिव्याहारेण स्वर्गसाधनत्वनिश्चयादेव भवति, न च वाच्यं यजेतेत्यत्र

इष्टसाधनतयैव नियोगत्वस्थिरत्वापूर्व्वत्वप्रतीतिः कथमित्यत्राह स्वर्गकाम इति, ननु भृत्यादीनामिष्टप्रदस्यापि राज्ञो यथा प्राधान्यं तथा स्वप्रधानभूत एव नियोगः प्रतीयते स्वस्यानुष्ठातुरिष्टप्रदश्च स्याद्राजवदिति प्रथमं स्वप्रधानतयैव प्रतीतत्वान्न स्वत इष्टत्वानुपपत्तिः यथोक्तम्—आत्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये । कुर्वन् स्वर्गादिकमपि प्रधानं कार्यमेव नः ॥ इति, इमां शङ्कामनुभाष्य परिहरति न च वाच्यमिति, कुत इत्यत्राह यजेतेति हीति, धात्वर्थस्य प्रथमप्रतिपन्नस्यापि वाक्यार्थानुपयोगिनः परित्यागे दृष्टान्तत्वं गर्भितं तत्कथमिति शङ्कायां स्वर्गकामपदसमभिव्याहारादेव धात्वर्थातिरिक्तसिद्धिरित्याह स्वर्गेति, आदि-शब्देन प्राधान्यादि विवक्षितं, ततःकिमित्यत्राह तच्चेति, तच्च धात्वर्थातिरिक्तत्वम् अतिरिक्तस्य कार्यस्य स्वर्गसाधनत्वप्रतीतिनिबन्धनं, न हि कामी अकामसाधने नियोक्तुं शक्यत इति न्यायादित्यर्थः । स्वर्गसाधनत्वप्रतीतिनिबन्धनत्वं च कुत इत्यत्राह समभिव्याहृतेति, इतरपदार्थान्वययोग्यस्यैव पदान्तरप्रतिपाद्यत्वमिति हि लोकव्युत्पत्तिभङ्गेनापूर्व्वस्य वाच्यत्वं कल्पितमित्यर्थः ।

प्रथमं नियोगः स्वप्रधानतयैव प्रतीयते स्वर्गका-

मपदसमभिव्याहारात्स्वसिद्धये स्वर्गसिद्ध्यानुकूलता च नियोगस्येति यजेतेति हि धात्वर्थस्य पुरुषप्रयत्नसाध्यतैव प्रतीयते, स्वर्गकामपदसमभिव्याहारादेव धात्वर्थातिरेकिणो नियोगत्वं स्थिरत्वमपूर्वत्वं चेत्यादि ह्यवगम्यते, तच्च स्वर्गसाधनत्वप्रतीतिनिबन्धनं समभिव्याहृतस्वर्गकामपदार्थान्वययोग्यं स्वर्गसाधनमेव कार्यं लिङादयोऽभिदधतीति हि लोकव्युत्पत्तिरपि तिरस्कृता । एतदुक्तं भवति

इतरपदार्थान्वययोग्यस्यैव पदान्तरप्रतिपाद्यत्वं तत्कुतः धात्वर्थस्य प्रथमप्रतिपन्नत्वकथने किं प्रयोजनमित्यत्राह एतदुक्तं भवतीति, पदार्थान्वययोग्यस्यैवेतरपदप्रतिपाद्यत्वं युक्तम् अन्विताभिधायित्वाद्वाक्यस्येत्यर्थः । योग्यं च किमित्यत्राह तच्चेति, प्रथममनन्यार्थतया कार्यं प्रतिपन्नमस्तु तथाऽपि तदनुपपन्नमित्याह अत इति, अतः साधनस्यैव वाक्यार्थान्वयार्हत्वादित्यर्थः । यथा प्रथमप्रतिपन्नाऽपि धात्वर्थभूता क्रिया वाक्यार्थान्वयायोग्यत्वात्परित्यक्ता तथा स्वप्रधानतया प्रथमप्रतिपन्नमपि वाक्यार्थान्वयायोग्यत्वात्त्याज्यमित्यर्थः । उदाहरणं दर्शयति अत एवेति, अत एव प्रथमं प्रतिपन्नस्यापि वाक्यार्थान्वयानर्हस्य त्याज्यत्वादित्यर्थः । एवमित्यादि स्पष्टम् । एकपदश्रवणवेलायामनन्यार्थतया प्रथमप्रतिपत्तिरेव नास्तीत्याह कार्येति, न कार्यमनन्यार्थं प्रतीयत इति गुरुवचनं सङ्गच्छते । कुत इत्यत्राह व्युत्पत्तीति, नियोगस्यानुकूलत्वे प्रमाणाभावमुपसंहरति अत इति, अतः सुखस्यैव पुरुषानुकूलत्वान्नियोगस्य च सुखनिमित्तत्वाच्चेत्यर्थः । यद्वा केवलविधिपदेन दुःखरूपधात्वर्थमात्रप्रतीतेः पदान्तरसमभिव्याहृतार्थविशेषस्य साधनतया प्रतीतेश्चेत्यर्थः ।

समभिव्याहृतपदान्तरवाच्यार्थान्वययोग्यमेवेतरपदप्रतिपाद्यमित्यन्विताविधायिपदसंघातरूपवा-

क्यश्रवणसमनन्तरमेव प्रतीयते, तच्च स्वर्गसाधनरूपम्, अतः क्रियावदनन्यार्थता ऽपि विरोधादेव परित्यक्तेति, अत एव गङ्गायां घोष इत्यादौ घोषप्रतिवासयोग्यार्थावस्थापनपरत्वं गङ्गापदस्याश्रीयते, प्रथमं गङ्गापदेन गङ्गार्थः स्मृत इति गङ्गापदार्थस्यैवोपेयत्वान्न वाक्यार्थान्वयीभवति, एवमत्रापि यजेतेत्येतावन्मात्रश्रवणे कार्यमनन्यार्थं स्मृतमिति वाक्यार्थान्वयसमये कार्यस्यानन्यार्थता नावतिष्ठते, कार्याभिधायिपदश्रवणवेलायां प्रथमं कार्यमनन्यार्थं प्रतीतमित्येतदपि न सङ्गच्छते व्युत्पत्तिकाले गवानयनादिक्रियाया दुःखरूपाया इष्टविशेषसाधनतयैव कार्यताप्रतीतेः, अतो नियोगस्य पुरुषानुकूलत्वं सर्वलोकविरुद्धं नियोगस्य सुखरूपपुरुषानुकूलसुखरूपतां वदतः स्वानुभवविरोधश्च

योग्यानुपलम्भं दूषणमाह नियोगस्येति, यागादिजन्यपरमापूर्वस्यान्त्येष्टनन्तरभावित्वात्तद्व्यावृत्त्यर्थं कारीर्या वृष्टिकामो यजेतेत्युक्तं, यद्यपीति वृष्ट्यादिसिद्ध्यनियमान्नियोगोऽनुपपन्न इति तदनुकूलत्वाननुभव इति चेन्न वृष्ट्याद्यसिद्धिरपि नियमेन नास्तीति कदाचित् नियोगः सिध्यतीति तदानीं नियोगसुखाननुभव इति योग्यानुपलम्भ इत्यर्थः तस्मिन्निति, तस्मिन्नियोगे अनुकूलतापर्यायसुखत्वानुभूतिर्न विद्यत इत्यर्थः । एवमिति स्पष्टम् । अत्रायमर्थ उक्तो भवति किं केवलेन कार्याभिधायिपदेन स्वप्रधानतया कार्यप्रतीतिः, उत पदान्तरसमभिव्याहृतेन, न तावत्केवलेन तत्र दुःखरूपधात्वर्थमात्रप्रतीतेः, एवं स्वप्रधानतया प्रथमं कार्यपदेन प्रतिपन्नमस्तु तथाऽपि वाक्यार्थानुपयोगित्वात् न तावत् प्रतिपाद्यत्वं क्रियावत् न च पदान्तरसमभिव्याहृतेन दृष्टस्यार्थान्तरस्य

साधनतयैव प्रतीतेः । एवं स्वप्रधानतायां प्रमाणाभावान्नियोगस्य सुखस्वरूपत्वं न सम्भवति । किञ्च योग्यानुपलम्भरूपबाधकप्रमाणबाधितं चेति कृतिं प्रति शेषित्वं कृत्युद्देश्यत्वमिति लक्षणवाक्यं दूषयति कृतिमित्यादिना किमित्यादि स्पष्टम् । शेषशेषित्वं लक्षणं पराभिमतमाशङ्कते कार्येति, कृत्युद्देश्यत्वं दूषयति—

कारीर्या वृष्टिकामो यजेतेत्यादिषु सिद्धेऽपि नियोगे वृष्ट्यादिसिद्धिनिमित्तस्य वृष्टिव्यतिरेकेण नियोगस्यानुकूलता नानुभूयते । यद्यप्यस्मिन् जन्मनि वृष्ट्यादिसिद्धेरनियमः, तथाऽप्यनियमादेव नियोगसिद्धिरवश्याश्रयणीया तस्मिन्ननुकूलतापर्यायसुखानुभूतिर्न विद्यते, एवमुक्तरीत्या कृतिसाध्येष्टत्वातिरेकिकृत्युद्देश्यत्वं न विद्यते, कृतिं प्रति शेषित्वं कृत्युद्देश्यत्वमिति चेत् किमिदं शेषित्वं किञ्च शेषत्वमिति वक्तव्यं, कार्यप्रतिसम्बन्धी शेषः ।

एवमिति, कार्यप्रतिसम्बन्धिप्रतिसम्बन्धित्वं हि कार्यत्वमेवेत्यर्थः । ततः किमित्यत्राह कार्यत्वमेवेति, कार्यत्वं नाम कृत्युद्देश्यत्वं, कृत्युद्देश्यत्वं च कृतिशेषित्वं कृतिशेषित्वं च कार्यत्वमित्युक्तं भवति, कृत्युद्देश्यत्वं कृतिशेषित्वमित्युक्ते कृत्युद्देश्यत्वमेव कृत्युद्देश्यत्वमित्युक्तं भवतीत्यर्थः । परोद्देशप्रवृत्तकृतिव्याप्यर्हत्वं शेषत्वमिति पक्षे ऽप्ययमेव दूषणप्रकारः । किञ्च कृतेरशेषत्वप्रसङ्ग इति भाष्येऽभिहितम्, उद्देश्यत्वं नामेति स्पष्टं, पुरुषस्येति न हि कृतेः पुरुषव्यापाररूपायाः प्रयोजनं नामास्ति, तस्मात् कृतिप्रयोजनं नाम कृतिमत्पुरुषस्य कृत्यारम्भप्रयोजनमेव, तच्चेष्टत्वकृतिसाध्यत्वान्तरभूतमित्यर्थः कस्तर्हि शेषशेषिभाव इत्याकाङ्क्षायां शेषः परार्थत्वादिति सूत्रं व्याचष्टे अयमेव हीति, परगतातिशयाधानस्यायोगव्यवच्छेदश्चेच्छेषिणयतिव्याप्तिः, अन्ययोगव्यवच्छेदश्चेदसंभव इति तदुभयव्यावृत्त्यर्थं परगता-

तिशयाधानेच्छयोपादेयत्वमेव यस्य स्वरूपमित्युक्तं, शेषभूतस्य स्वगतातिशयाधानमपि परगतातिशयाधानार्थमित्यर्थः । स्वेच्छा वा परेच्छा वा न तत्र नियमः

तत्प्रतिसम्बन्धित्वं शेषित्वमिति चेत्, एवं तर्हि कार्यत्वमेव शेषित्वमित्युक्तं भवति, कार्यत्वमेव विचार्यते परोद्देशेन प्रवृत्तकृतिव्याप्त्यर्हत्वमेव शेषत्वमिति चेत् कोऽयं परोद्देशो नामेति अयमेव हि विचार्यते, उद्देश्यत्वं नामेप्सितसाध्यत्वमिति चेत् किमिदमीप्सिततत्वं कृतिप्रयोजनत्वमिति चेत् पुरुषस्य कृत्यारम्भप्रयोजनमेव हि कृतिप्रयोजनं, स चेच्छाविषयः कृत्यधीनात्मलाभ इति पूर्व्वोक्त एव, अयमेव हि सर्वत्र शेषशेषिभावः परगतातिशयाधानेच्छया उपादेयत्वमेव यस्य स्वरूपम्

यथासम्भवमेव, न हि शेषभूतस्य व्रीह्यादेः शेषिणो यागस्यापीच्छासम्भवः तत्रान्येच्छयैव ह्युपादेयत्वं, ततो यथोक्त एवार्थः । इदं शेषित्वं पराभ्युपेतस्य कार्यस्य न सम्भवति फलोत्पत्तीच्छयैवोपादेयत्वात्तस्याशेषित्वमेव, उक्तलक्षणस्य वैदिकोदाहरणं दर्शयति फलोत्पत्तीति, अन्यत्सर्वं व्रीह्यादि लौकिकोदाहरणमाह गर्भेति, औपनिषदोदाहरणमाह एवमिति, नित्यस्यानित्यस्य चेत्युभयविभूतिरुच्यते ईश्वरस्य चिदचितोश्च शेषित्वं शेषत्वं च प्रामाणिकं चेदुक्तलक्षणं तत्र वर्त्तेत, किं तत्र प्रमाणमित्यत्राह सर्वस्य वशीत्यादि, तस्मात्प्राभाकरोक्तं निरूपकेषु न शोभत इत्याह कृतीति, कार्यानुबन्धिनमप्यर्थं दूषयति अपि चेत्यादिना, कार्ये स्वकीयत्वबुद्धिमान्नियोज्यः, तत्साधने कर्म्मणि स्वकीयत्वबुद्धिमानधिकारी तदनुष्ठाता कर्तेति तिस्रोऽवस्थाः तत्र यजेतेत्यादिपदैः नियोज्यसामान्यं प्रतिपन्नम् ।

स शेषः, परः शेषी, फलोत्पत्तीच्छया यागादेस्तत्प्रयत्नस्य चोपादेयत्वं यागादिसिद्धीच्छयाऽन्यत्सर्वमुपादेयम्, एवं गर्भाधानादीनामपि पुरुषविशेषातिशयाधानेच्छयोपादेयत्वमेव स्वरूपम् । एवमीश्वरगतातिशयाधानेच्छया उपादेयत्वमेव चेतनाचेतनात्मकस्य नित्यस्यानित्यस्य च सर्वस्य वस्तुनः स्वरूपमिति सर्वमीश्वरशेषभूतं सर्वस्य चेश्वरः शेषीति सर्वस्य वशी सर्वस्येशानः पतिं विश्वस्येत्याद्युक्तं,—कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयत इति—अयमर्थः श्रद्दधानेष्वेव शोभते ।

स्वर्गकामादिपदैर्नियोज्यविशेषः समर्प्यत इति प्राभाकरैः षष्ठाद्याधिकरणे प्रपञ्चितं, तद् दूषयति स्वर्गकामइत्यादिना, कर्तृवाचित्वं शब्दानुशासनसिद्धं न तु नियोज्यवाचित्वम्, अतःस्वर्गकामादिपदान्यपि न नियोज्यविशेषसमर्पकाणीति दूषणशरीरं लकारवाच्यकर्तृविशेषसमर्पणपराणां स्वर्गकामादिपदानां नियोज्यविशेषसमर्पणपरत्वं शब्दानुशासनविरुद्धमित्यस्यायमभिप्रायः कर्तृवाचिनो लकारस्यापि नियोज्यसमर्पणपरत्वं शब्दानुशासनविरुद्धमिति पूर्वपक्षयुक्तिं शङ्कते साध्येति, न हि काम्यकामः साधने नियोक्तुं शक्यते इति न्यायात्स्वर्गकामस्या स्वर्गसाधने कर्तृत्वान्वयो न घटत इति इतीयं पूर्वपक्षे युक्तिरगत्या शङ्किता । परिहरति नियोज्यत्वेति, स्वर्गकामस्यास्वर्गसाधने नियोज्यत्वान्वयोऽपि न सम्भवतीति नियोज्यविशेषसमर्पणपरत्वमप्ययुक्तं, तदुपपत्तये स्वर्गसाधनत्वं कार्यस्य निश्चीयते इति चेत्कर्तृविशेषसमर्पकत्वोपपत्तये स्वर्गसाधनत्वं निश्चीयतां नियोज्यत्वं कर्तृत्वं वा स्वर्गकामस्या स्वर्गसाधने नोपपद्यते । अत उभयपक्षेऽपि कार्यस्य स्वर्गसाधनत्वनिश्चयसापेक्षत्वमविशिष्टम्, इयान्विशेषः कर्तुर्लकारवाच्यत्वात्स्वर्गकामादिपदानां कर्तृविशेषसमर्प-

णपरत्वं शब्दानुशासनाविरुद्धं नियोज्यस्य लकारवाच्यत्वाभावात् स्वर्गकामादिपदानां नियोज्यविशेषसमर्पणपरत्वं शब्दानुशासनविरुद्धमित्यर्थः । तदु*दाहरणेन विशदयति यथेति,

अपि च स्वर्गकामोयजेतेत्यादिषु लकारवाच्यकर्तृविशेषसमर्पणपराणां स्वर्गकामादिपदानां नियोज्यविशेषसमर्पणपरत्वं शब्दानुशासनविरुद्धं केनावगम्यते—साध्यस्वर्गविशिष्टस्य स्वर्गसाधनने कर्तृत्वान्वयो न घटत इति चेत् नियोज्यत्वान्वयोऽपि न घटत इति हि स्वर्गसाधनत्वनिश्चयः । स तु शास्त्रसिद्धे कर्तृत्वान्वये स्वर्गसाधनत्वनिश्चयः क्रियते यथा भोक्तुकामोदेवदत्तगृहं गच्छेदित्युक्ते भोजनकामस्य देवदत्तगृहंगमने कर्तृत्वश्रवणादेव प्रागज्ञातमपि भोजनसाधनत्वं देवदत्तगृहगमनस्यावगम्यते ।

एवमत्रापीति, स्वर्गकामस्य यागे कर्तृत्वश्रवणात् प्रागज्ञातमपि यागस्य स्वर्गसाधनत्वमवगम्यत इत्यर्थः । इयान्विशेष इत्यभिप्रायमाह न क्रियान्तरं प्रतीति, कथं क्रियान्तरं प्रति कर्तृतया श्रवणम् अस्य क्रियान्तरे कर्तृत्वकल्पनं च किमित्यत्राह यजेतेति हीति, कथं बुद्धौ कर्तृत्वकल्पनं कृतं भवतीत्यत्राह बुद्धेरिति, उक्तार्थे तद्धन्यमुदाहरति यथोक्तमिति, नियोज्यत्वं कर्तृत्वानुगुणमिति तत्परत्वमाश्रीयत इति शङ्कते यष्टृत्वेति, परिहरति देवदत्त इति, एवं यदधिकृत्य कृतिर्वर्तते तत्कृत्युद्देश्यमिति पक्षो दूषितः, प्रेरकत्वं कृत्युद्देश्यत्वमिति वादश्च निरस्तः । अर्थात्स्वतः इष्टत्वं चापास्तं कृतिं प्रति शेषित्वं कृत्युद्देश्यत्वमिति च प्रतिक्षिप्तं कृति फलविशेष

* तदुदाहरणानि विशदयतीति पा· ।

कृत्युद्देश्यमित्यादेरप्युक्तरीत्या दूषणं सूचितम्* । एते मुखभेदाश्च बहुग्रन्थकारविलिखिता इत्यत्र ते प्रत्युक्ताः । कार्य्यानुबन्ध्यर्थान्तरमपि परोक्तं दूषितं, एवं ब्रह्मणः फलतया सिद्धिस्तावकत्वसिद्ध्यर्थं तत्सिद्धिश्चेत्युक्ते-ऽथ फलसाधनतया सिद्धिरुपपाद्यते अर्थात्कार्यस्य साधनतया सिद्धिश्चोपपाद्यते ।

एवमत्रापि भवतीति न क्रियान्तरं प्रति कर्त्तृतया श्रुतस्य क्रियान्तरे कर्त्तृत्वकल्पनं युक्तं, यजेतेति हि यागकर्त्तृतया श्रुतस्य हि बुद्धौ कर्त्तृत्वकल्पनं क्रियते बुद्धौ† कर्त्तृत्वकल्पनमेव हि नियोज्यत्वं, यथोक्तं—नियोज्यः स च कार्यं यः स्वकीयत्वेन बुध्यते । इति, यष्टृत्वानुगुणं तद्बोद्धृत्वमिति चेत् देवदत्तः पचेदिति पाके कर्त्तृतया श्रुतस्य देवदत्तस्य पाकार्थगमनं पाकानुगुणमिति गमने कर्त्तृत्वकल्पनं न युज्यते । किञ्च लिङादिशब्दवाच्यं स्थायिरूपं किमित्यपूर्वमाश्रीयते-स्वर्गकामपदसमभिव्याहारानुपपत्तेरिति चेत् काऽत्राऽनुपपत्तिः—सिषाधयिषितस्वर्गो हि

किञ्चेति, न केवलं प्राधान्यासिद्धिः अपि तु साधनतया स्वरूपसिद्धिरनुपपन्नेत्यर्थः । लिङादिरित्यादि स्पष्टं सिषायिषितेत्यादि, न हि काम्यकामसाधनेऽपि नियोक्तुं शक्यते इति न्यायात्, सिषाधयिषितस्वर्गस्य विधीयमानं तत्साधनमेव तत्र कालान्तरभाविफलस्य क्षणिकक्रियायाः साधनत्वाभावादपूर्व्वक्लृप्तिरित्यर्थः । परिहरति अनाघ्रातेति, भगवच्छब्दः फलप्रदानानुगुणज्ञानशक्त्यादिवैष्कल्यपरः, नारायणशब्दः प्राप्तिपरः, ईश्वरान्त-

* सुवचमिति पा० ।
† बुद्धेः इति पा० ।

रसापेक्षत्वव्यावृत्तिपरः परमेश्वरशब्दः । वेदविद्वचो दर्शयति यथाहुरिति, भाष्यग्रन्थं व्याचष्टे फलेति, आत्मानमिति पदं व्याचष्टे इन्द्रादीति, इन्द्रादिदेवतामुखेनेतीन्द्रादिशब्दवाच्यत्वमित्यन्वयः । आत्मान्तरव्यावृत्त्यर्थं परमात्मानमिति पदं, भगवच्छब्दः पूर्व्ववत्

स्वर्गकामस्तस्य स्वर्गकामस्य कालान्तरभाविस्वर्गसिद्धौ क्षणभङ्गिनी यागादिक्रिया न समर्थेति चेत् अनाघ्रातवेदसिद्धान्तानामियमनुपपत्तिः सर्वैः कर्म्मभिराराधितः परमेश्वरो भगवान्नारायणस्तत्तदिष्टं फलं ददातीति वेदविदो वदन्ति—यथाहुर्वेदविदग्रेसरा द्रमिडाचार्याः—फलसम्बिभ*न्त्सया हि कर्म्मभिरात्मानं पिप्रीषन्तीति स प्रीतोऽलं फलायेति शास्त्रमर्यादा— इति, फलसंबन्धेच्छया कर्म्मभिर्यागदानहोमादिभिरिन्द्रादिदेवतामुखेन तत्तदन्तर्यामिरूपेणावस्थितमिन्द्रादिशब्दवाच्यं परमात्मानं भगवन्तं वासुदेवमाराधयिषन्ति, स हि कर्म्मभिराराधितस्तेषामिष्टानि फलानि प्रयच्छतीत्यर्थः, तथा च श्रुतिः—इष्टापूर्त्तं बहुधा जातं जायमानं विश्वं बिभर्त्ति भुवनस्य नाभिरिति, इष्टापूर्त्तमिति सकलश्रुतिस्मृतिचोदितं कर्म्मोच्यते ।

वासुदेवशब्दोऽन्तरात्मत्वे प्रमाणद्योतकः, सर्वत्रासौ समस्तं चेत्यादि श्रुतिप्रमाणं दर्शयति तथा चेत्यादि । तद्वाक्यं व्याचष्टे सकलेति, श्रौतमिष्टं कर्म्म स्मार्तं पूर्तं कर्म्म । विश्वं बिभर्तीत्येतद्व्याचष्टे इन्द्राग्नीति, नानादेवताकत्वेन प्रतीयमानं कर्म्मजातमेकदेवताकमित्यर्थः । भुवनस्य नाभिरिति नाभिवन्नाभिरित्याधारत्वाभिप्रायेण तद्व्याचष्टे ब्रह्मेति, केन

* फलसम्बिभत्सयेति पाठस्तु पुनरयुक्तः सनि नलोपनिमित्तविरहात् ।

प्रकारेण धारक इत्यत्राह तैस्तैरिति, अभिमतफलदातृत्वमुखेन धारकत्वमित्यर्थः । भिन्नदेवताकत्वेन विधीयमानं कर्म कथमेकदेवताकमिति शङ्कायां मन्त्रस्योत्तरार्द्धं व्याचष्टे अग्नीति, अन्यादिदेवताकत्वेन विधीयमानानामेकदेवताकत्वं तत्तदन्तरात्मभूतपरब्रह्माराधनरूपत्वादित्यर्थः । भुवनस्य नाभिरित्यनेन प्रतिपादितफलप्रदत्ववैशद्याय तदेवाग्निरित्यादिसामानाधिकरण्यस्य शरीरात्मभावनिबन्धनत्ववैशद्याय च भगद्वचनमाह यथोक्तमिति,

तद्विश्वं बिभर्त्ति इन्द्राग्निवरुणादिसर्वदेवतासंबन्धितया प्रतीयमानं तत्तदन्तरात्मतयाऽवस्थितः परमपुरुषः स्वयमेव बिभर्त्ति—स्वयमेव स्वीकरोति, भुवनस्य नाभिः—ब्रह्मक्षत्रादिसर्ववर्णपूर्णस्य भुवनस्य धारकः तैस्तैः कर्म्मभिराराधितस्तत्तदिष्टफलप्रदानेन भुवनानां धारक इति नाभिरित्युक्तः, अग्निवायुप्रभृतिदेवतान्तरात्मतया तत्तच्छब्दाभिधेयोऽयमेवेत्याह तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः, इति, यथोक्तं भगवता—यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान् मयैव विहितान् हि तान् ॥ यां यां तनुमिति इन्द्रादिदेवताविशेषास्तत्तदन्तर्यामितयाऽवस्थितस्य भगवतस्तनवः शरीराणीत्यर्थः । अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेत्यादि, प्रभुरेव चेति

अवतारशङ्काव्यावृत्त्यर्थं व्याचष्टे यां यामिति, तनु-शब्दस्याल्पार्थत्व-व्यावृत्त्यर्थमाह शरीराणीति, भोक्तृत्ववैशद्यायाह अहमिति, प्रभु-शब्दं व्याचष्टे प्रभुरिति, श्रीविष्णुपुराणवचनमाह यथा चेति, एवं कतिपयवचन-प्रदर्शनमुपलक्षणार्थम् । अयमर्थः सर्ववेदशास्त्रानुमत इत्याह सेतिहा-सेति, एवं प्रमाणं दर्शितमथायमर्थ उपपन्न इति वदन् घटकं वाक्यं च दर्शयति एवमिति, आराधनप्रकारविशेषफलविशेषज्ञानवत्ता सर्वज्ञपदेन विवक्षिता, सर्वशक्तिमिति तत्तत्फलदानशक्तिरभिप्रेता सर्वेश्वरं सर्वशेषि-णमनेन प्राप्तिरुक्ता भवति, सम्पच्छब्दः प्राप्तिवाची पद गताविति धातु-स्संपच्छब्दस्यावयवार्थोऽन्वयस्वारस्यानुगुणरूढ्याश्रयेण व्याख्यातः, श्रीगी-ताभाष्ये कर्म्मणां देवैः संबन्धश्चेदन्तर्यामिस्थितिरत्र कीदृशीत्यत्राह-

सर्वफलानां प्रदाता चेत्यर्थः । यथा च यज्ञैस्त्वमिज्यसे नित्यं सर्वदेवमयाऽच्युत ! यैः स्वधर्म्मपरैर्नाथ ! नरैराराधितो भवान् । ते तरन्त्यखिलामेतां मायामात्मविमुक्तये ॥ इति, सेतिहासपुराणेषु सर्वेष्वेव वेदेषु सर्वाणि कर्म्माणि सर्वेश्वराराधनरूपाणि तैस्तैः कर्म्मभिराराधितः पुरुषोत्तमस्तत्तदिष्टं फलं ददातीति तत्र-तत्र प्रपञ्चितम् । एवमेव हि सर्वशक्तिं सर्वज्ञं सर्वेश्वरं दिभगवन्तमिन्द्रादिदेवतान्तर्यामिरूपेण यागदानहोमादिवेदोदितसर्वकर्म्मणां भोक्तारं सर्वफलानां प्रदातारं च सर्वाः श्रुतयो वदन्ति । चतुर्होतारो-यत्र सम्पदं गच्छन्ति देवैरित्याद्याः, चतुर्होतारो यज्ञाः यत्र परमात्मनि देवेष्वन्तर्यामिरूपेणावस्थिते देवैः सम्पदं गच्छन्ति देवैस्संबन्धं गच्छन्ति यज्ञा इत्यर्थः । अन्तर्यामिरूपेणावस्थितस्य

अन्तर्यामिस्वरूपेणेति, कर्म्मभिर्देवानां भगवच्छरीरत्वेन परतन्त्रतया संबन्धः स्वातन्त्र्येण संबन्धः परमात्मन एवेत्यर्थः । स्वतन्त्रतया संबन्धे प्रमाणमाह यथोक्तमिति, ततः किं प्रस्तुतानुपपत्तिपरिहारस्येत्यत्राह तस्मादिति, परमपुरुषस्यैव फलप्रदत्वात्तस्य फलसाधनत्वं न कल्प्यं वाच्या-पूर्व्ववादे तस्य वाच्यत्वमपि न कल्प्यं, व्युत्पत्तिसिद्धत्वाभावादित्यभिप्रायः किं प्रयोजनमिति किमनुपपत्तिशमनं प्रयोजनमित्यर्थः । लिङाद्यर्थं विशद-यितुमाह एवं चेति, प्रकृत्यर्थस्य कर्तृव्यापारसाध्यताभिधानं विवृणोति कर्तृवाचिनामिति, कर्तृवाचिनः प्रत्ययाः प्रकृत्यर्थस्य कर्तृव्यापारसंबन्ध-प्रकारमभिदधति तत्र लट् वर्तमानतया कर्तृव्यापारसंबन्धमभिधत्ते भूत-तया लिङादयः कर्तृसाध्यतया

परमात्मनः शरीरतयाऽवस्थितानामिन्द्रादीनां या-गादिसंबन्ध इत्युक्तं भवति, यथोक्तं भगवता—भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् । इति, तस्मादिन्द्रादिदेव-तान्तरात्मभूतपरमपुरुषाराधनरूपाणि कर्माणि स एव चाभिलषितफलप्रदातेति किमत्रापूर्वेण व्युत्पत्तिपथ-दूरवर्त्तिना वाच्यतयाऽभ्युपगतेन, कल्प्ये*न वा प्रयोज-नम् । एवं च सति लिङादेः कोऽयमर्थः परिगृहीत इति चेत् यज देवपूजायामिति देवताराधनभूतयागादेः प्रकृत्यर्थस्य कर्त्तृव्यापारसाध्यतां व्युत्पत्तिसिद्धां लिङा-दयोऽभिदधतीति न किञ्चिदनुपपन्नम् । कर्त्तृवाचिनां प्रत्ययानां प्रकृत्यर्थस्य कर्त्तृव्यापारसंबन्धप्रकारो हि वाच्यः, भूतवर्तमानतादिकमन्ये वदन्ति, लिङादयस्तु कर्तृव्यापारसाध्यतां वदन्ति । अपि च कामिनः कर्त्त-

* कल्पितेन वेति पा० ।

व्यतया कर्म्म विधाय कर्म्मणो देवताराधनरूपतां तद्द्वारा फलसम्भवं च तत्तत्कर्म्मविधिवाक्यान्येव वदन्ति, वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीत्यादीनि नात्र

संबन्धं लिङादयोऽभिदधति एवमभिधानाल्लिङादयः प्रकृत्यर्थस्यैव कर्तृव्यापारसंबन्धमेवाभिदधति न तु प्रकृत्यर्थातिरिक्तस्य यदि लिङादयो-धात्वर्थातिरिक्तस्य कर्तृव्यापारसाध्यतामभिदधति तर्हि लडादयोऽपि धात्वर्थातिरिक्तस्य वर्तमानतादिकमभिदध्युः यथा लडादयोधात्वर्थमात्रस्य वर्तमानतादिकं वदन्ति तथा लिङादयोऽपि धात्वर्थमात्रस्य कर्तृव्यापारसाध्यतां वदन्तीत्यर्थः । एवमुपनिषद्वाक्यैः सोपबृंहणैः भगावत एव फलप्रदत्वाद् नापूर्व्वक्लृप्तिरित्युक्तम् । इदानीं कर्म्मविधिवाक्यैरेव देवतानां फलप्रदत्वाभिधानात् नापूर्व्वक्लृप्तिरित्याह अपि चेति, तत्तत्कर्म्मविधिवाक्यान्येवं वदन्तीति विधिना त्वेकवाक्यत्वात् स्तुत्यर्थत्वेन विधीनां स्युरिति न्यायादर्थवादवाक्यस्यापि विधिशेषतया. तदेकवाक्यत्वमभिप्रेत्य कर्म्मविधिवाक्यान्येवेत्युक्तं वाक्यं दर्शयति वायव्यमिति, कर्म्मणोदेवताद्वारा फलप्रदत्वं श्रौतमिति फलसाधनत्वं विध्याक्षेपसिद्धमिति वक्तुमयुक्तमित्याह नात्रेति,

फलसिद्ध्यनुपपत्तिः काचिदपि दृश्यत इति फलसाधनत्वावगतिरौपादानिकीत्यपि न सङ्गच्छते, विध्यपेक्षितं यागादेः फलसाधनत्वप्रकारं वाक्यशेष एव बोधयतीत्यर्थः । तस्माद्ब्राह्मणाय नापगुरेतेत्यत्र अपगोरणनिषेधविधिपरवाक्यशेषे श्रूयमाणं निषेध्यस्यापगोरणस्य

औपादनिकीति, उपादानप्रमाणसिद्धा-विध्याक्षेपसिद्धेत्यर्थः, अभिहितापर्यवसानं श्रुतार्थापत्तिः, पीनोदेवदत्तो दिवा न भुङ्क्ते इत्यभिधानापर्यवसानम् उपादानमिति तयोर्भेदः अर्थवादादेः स्तुत्याद्यन्यपरत्वेन स्वार्थे तात्पर्याभावात्कर्म्मणां देवताद्वारकं फलसाधनत्वं न सिध्यतीत्यत्राह विध्यपेक्षितमिति, अक्ताः शर्करा उपदधातीत्यादिषु तेजो वै घृतमिति वाक्यशेषावगतस्य विध्यपेक्षितत्वेन स्वार्थे तात्पर्यमभ्युपगतं संदिग्धे तु वाक्यशेषादित्यादिसूत्रेण प्रतिपन्नपरित्यागेनाप्रतिपन्नकल्पनायोगात् एवमत्रापि विध्यपेक्षितत्वेन देवतास्वरूपे तात्पर्यमस्तीत्यभिप्रायः । अर्थवादोक्तविध्यपेक्षितार्थतात्पर्याभ्युपगमे उदाहरणमाह तस्मादिति, ततः किमित्यत्राह अत्रेति, विधेयविरोधिनः फलसाधनत्वमर्थवादोक्तं विध्यपेक्षितत्वात्स्वीकृतं विधेयस्य फलसाधनत्वं विध्यपेक्षितं ततोऽप्यन्तरङ्गतयाऽर्थवादोक्तं स्वीकार्यं तदनादृत्य किमित्युपादानेन फलसाधनत्वक्लृप्तिरित्यर्थः । लोकसिद्धभावणानुस्मरणमुखेन परमुपालभते हिरण्यनिधिमिति, हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न

शतयातनासाधनत्वं निषेधविध्युपयोगीति हि स्वीक्रियते, अत्र पुनः कामिनः कर्तव्यतया विहितस्य यागादेः काम्यस्वर्गादिसाधनत्वप्रकारं वाक्यशेषावगतमनादृत्य किमित्युपादानेन यागादेः फलसाधनत्वं प्रकल्प्यते, हिरण्यनिधिमपवरके निधाय याचते कोद्रव्यादिलुब्धः कृपणञ्जनमिति श्रूयते तदेतद्युष्मासु दृश्यते, शतयातनासाधनत्वमपि नादृष्टद्वारेण चोदितान्यनुतिष्ठतो विहितङ्कर्म्माकुर्वतो निन्दितानि च कुर्वतःसर्वाणि सुखानि दुःखानि च परमपुरुषानुग्रहनिग्रहाभ्यामेव भवन्ति, एष ह्येवानन्दयाति अथ

सोऽभयं गतोभवति अथ तस्य भयम्भवति भीषाऽस्माद्वातः पवते भीषोदेति सूर्यःभीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः, इति ॥

विन्देयुरिति, परमात्मनो हिरण्यनिधिदृष्टान्तो हि श्रौतः, अतोहिरण्यनिधिमपवरके निधायेत्युक्तं शतेति अपगोरणस्य शतयातनासाधनत्वमपि न कल्प्यापूर्व्वद्वारेण सम्भवति देवताद्वारकत्वश्रुतेः कल्पनायोगादित्यर्थः। कथं तर्हीत्यत्राह चोदितानीति, उक्तार्थे श्रुतिमाह—एष हीति, ददतामनुष्याः प्रशंसन्तीति दानस्य प्रशस्यत्वं भगवदाराधनात्मकतयेत्यर्थः दर्वीं पितरोऽन्वायत्ता इति दर्वीशब्दः पैतृककर्म्मोपलक्षणार्थः अन्वायत्ताः तत्प्रवणाः तर्पणाय पितॄणां पैतृककर्म्मणा तृप्तिर्भगवदाज्ञयेत्यर्थः। वेदविद्वचनमाह यथोक्तमिति, मेषविसर्पितम् उज्जृम्भणं जलोर्म्मितिः जलाशयास्समुद्राः कृतसीमान एव मेषविसर्प्पितं कुर्वन्ति न त्वतिलङ्घितसीमान इत्यर्थः। उक्तार्थे भगवद्वचनं दर्शयिष्यन्नाह परमपुरुषेति, अश्रुतेति देवतायां प्रतिपाद्यमानायां कर्म्मणि श्रद्धावैकल्यं स्यात् तदनुत्पत्तये कर्म्मणि श्रद्धाजननाय चार्थवादाः कृताः, न तत्र तात्पर्यं देवतानिरपेक्षं कर्म्मैव फलदानशक्तमिति

एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः एतस्य वाऽक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवा दर्वीं पितरोऽन्वायत्ताः, इत्याद्यनेकविधाश्श्रुतयः सन्ति, यथोक्तं द्रमिडभाष्ये—तस्याज्ञया धावति वायुर्नद्यः स्रवन्ति तेन च कृतसीमानोजलाशयाः स*मदा इव मेषविसर्पितं कुर्वन्ति, इति, तत्सङ्कल्पनिबन्धना ह्यीमे लोका न च्यवन्ते न स्फुटन्ते स्वशासनानुवर्तिनं

* समुद्रा एव मेषविसर्पितमिति पा· ।

ज्ञात्वा कारुण्यात्स भगवान् वर्द्धयेत विद्वान् कर्म्मदत्त इति च परमपुरुषयाथात्म्यज्ञानपूर्व्वकतदुपासनादि-विहितकर्म्मानुष्ठायिनस्तत्प्रसादात्तत्प्राप्तिपर्यन्तानि सुखान्यभयं च यथाऽधिकारम्भवन्ति, तज्ज्ञानपूर्व्वकं तदुपासनादिविहितं कर्म्माकुर्व्वतो निन्दितानि च कुर्वतस्तन्निग्रहादेव

श्रद्धातिशयजननमेवाभिप्रेतमित्यर्थः । एवमविरोधेन निर्वाहः किमर्थ-मित्यत्राह सर्वमिति, एकशास्त्रं भगवद्बोधाय*नाद्यभिमतमङ्गीकृतं तत्र च विरुद्धार्थप्रतिपादने श्रुतिविरोधात्तदनादरणीयं स्यात् अविरोधे सम्भवति विरुद्धार्थपरत्वेन व्याख्यानमयुक्तमिति भावः ॥ एवं सर्ववेदान्त्यभिमतः सिद्धार्थे व्युत्पत्त्यभावनिरासः कृतः । अथ तैरप्यनभिमतां नित्यविभूतिं समर्थयति तस्यैतस्येत्यादिना, तस्यैतस्येति पदद्वयेन ब्रह्मस्वरूपसिद्धौ

तदप्राप्तिपूर्व्वकापरिमितदुःखानि भयं च भवन्ति, यथोक्तं भगवता—नियतं कुरु कर्म्म त्वं कर्म्म ज्यायो-ह्यकर्म्मणः । इत्यादिना, कृत्स्नं कर्म्मज्ञानपूर्व्वकमनुष्ठेयं विधाय—मयि सर्वाणि कर्म्माणि संन्यस्येति सर्वस्य कर्म्म-णः स्वाराधनतामात्मनां स्वनियाम्यतां च प्रतिपाद्य—ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः। श्रद्धावन्तो ऽन-सूयन्तो मुच्यन्ते तेऽपि कर्म्मभिः ॥ ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् । सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥ इति स्वाज्ञानुवर्तिनः प्रशस्य विपरी-तान्विनिन्द्य पुनरपि स्वाज्ञानुपालनमकुर्वतामासुर-

† अयं चार्थोऽस्माभिर्बोधायनमतानुवर्तिब्रह्मसूत्रवृत्तौ बहुलमुपपादितः ।

प्रकृत्यन्तर्भावमभिधाय अधमा गतिश्चोक्ता—तानहं द्विषतः क्रूरान्संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ आसुरीं योनिमापन्ना मूढा जन्मनिजन्मनि । मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमां गतिम् ॥ इति सर्वकर्म्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः—मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् । इति च स्वाज्ञानुवर्तिनां शाश्वतं पदं चोक्तम् । अश्रुतवेदान्तानां कर्म्मण्यश्रद्धा माभूदिति देवताधिकरणे अतिवादाः कृताः कर्म्ममात्रे यथा श्रद्धा स्यादिति सर्वमेकशास्त्रमिति वेदवि*त्सिद्धान्तः, ॥ तस्यैतस्य परस्य ब्रह्मणो नारायणस्यापरिच्छेद्यज्ञानानन्दामलत्वस्वरूपवज्ज्ञानशक्तिबलैश्वर्यवीर्यतेजःप्रभृत्यनवधिकातिशया—

तस्य च नारायणत्वे प्रमाणं स्मारितं, स्वरूप—शब्दः स्वरूपनिरूपकधर्म्मवाची अपरिच्छेद्येति स्वरूपमुक्तं ज्ञानेति गुणा उक्ताः । स्वसङ्कल्पेति विभूतिमत्त्वमुक्तं, स्वरूपतद्गुणविभूतयो दिव्यरूपादीनां प्रामाणिकत्वे दृष्टान्ततयोक्ताः । दिव्यविग्रहादयः साध्याः अनुरूपो†ऽप्यभिमतिरस्तीति तद्व्यावृत्त्यर्थमनुरूप—शब्दः, हेयप्रत्यनीकत्वं कल्याणगुणास्पदत्वं सर्वावस्थस्याप्यस्तीत्येकरूपत्वं तदुचितेत्यादिभूषणविशेषणं कल्याणत्वमप्राकृतत्वं स्वशक्तिसदृशेत्याद्यायुधविशेषणम्, अनन्ताश्चर्यत्वमत्यन्तविस्मयनीयत्वं, स्वाभिमतेत्यादि महिषीविशेषणं, स्वरूपरूपगुणेति रूपतद्गुणा इत्यर्थः । ऐश्वर्यशीलशब्दौ स्वरूपगुणप्रदर्शनार्थौ, स्वरूपस्य भगवदनुरूपपत्वं यथा सर्व-

* वेदार्थविदां बोधायन—टङ्क—द्रमिड—गुहदेव—भारुचिप्रभतीनां सिद्धान्तः ।

† अननुरूपेति पा· ।

गतो विष्णुरित्यवगम्यते । विग्रहस्य तदनुरूपत्वं विष्णोर्देहानुरूपां वै इति ज्ञायते । महिम-शब्दः

सङ्ख्येयकल्याणगुणावत्स्वसङ्कल्पप्रवर्त्यस्वेतरसमस्त-चिदचिद्वस्तुजातवत्स्वाभिमतस्वानुरूपैकरूपदिव्यरूप-तदुचितनिरतिशयकल्याणविविधानन्तभूषण-स्वशक्तिसदृशापरिमितानन्ताश्चर्यनानाविधायुध-स्वाभिमतस्वानुरूपस्वरूपरूपगुणविभवैश्वर्य*शीलाद्यनवधिकमहिम-महिषीस्वानुरूपकल्याणज्ञानक्रियाद्यपरिमेयगुणानन्तपरिजनपरिच्छदस्वोचितनिखिलभोग्यभोगोपकरणाद्यनन्तमहाविभवावाङ्मनसगोचर-स्वरूपस्वभाव-

उत्कृष्टत्ववाची महिषी-शब्देन लक्ष्मीर्विवक्षिता अन्यासामपि तच्छेषत्वेन सिद्धिः । स्वानुरूपेत्यादि परिजनपरिच्छदविशेषणं क्रियाकैङ्कर्यम्परिजनाः शेषशेषाशनादयः कलाचिकाप्रभृतयः परिच्छदाः स्वोचितेत्यादिपरमपदविशेषणं, भोग्यशब्देन स्रक्चन्दनादिर्विवक्षितः, भोगोपकरणशब्देन स्रक्चन्दनादिविनियोगोपयोगिभाजनाद्यो विवक्षिताः । परिच्छदशब्देन कलाचिकादिस्वरूपेण भोगोपकरणं विवक्षितं, भोगोपकरण-शब्देन भोग्यवस्तुविनियोगसाधनपदार्था विवक्षिता इति भिदा, आदि-शब्देन दिव्योद्यानादि विवक्षितम् । अवाङ्मनसगोचरेति अपरिच्छेद्यत्वात्स्वभावशब्दो जाज्वल्यमानत्वादिगुणपरः, आदि-शब्देन तत्र तद्व्यापारादयोऽभिप्रेताः । सहस्रशः श्रुतयः सन्तीति प्रत्यक्षश्रुतयः उपबृंहणमूलभूताखिलश्रुतयश्चाभिप्रेताः । उक्तार्थविषयाः श्रुतीरुदाहरति वेदाहमिति, मनोमय-शब्दं व्याचष्टे मनोमय इतीति, मयट्-शब्दः प्राचुर्यार्थोऽयं सम्बन्धपरो भवति सम्बन्धश्च ग्राह्यग्राहकभावः, मनसा तु विशुद्धेनेत्या-

* लीलेति पा० ।

द्युतेरित्यर्थः । नीलतोयदेत्यादिश्रुतिं व्याचष्टे मध्यस्थेति, नीलतोयदमध्यस्थेति समासो बहुव्रीहिः पूर्वनिपातश्छान्दसः । अस्य वाक्यस्य कथमयमर्थ इत्यत्राह सेयमिति,

दिव्यस्थानादिनित्यतानिरवद्यतागोचराश्च सहस्रशः श्रुतयः सन्ति, वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् य एषोऽन्तरादित्ये हिरण्मयः पुरुषः तस्य यथा कप्यासम्पुण्डरीकमेवमक्षिणी स एषोऽन्तर्हृदय आकाशस्तस्मिन्नयं पुरुषो मनोमयः अमृतो हिरण्मयः । मनोमय इति मनसैव विशुद्धेन गृह्यत इत्यर्थः । सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि विद्युद्वर्णात्पुरुषादित्यर्थः नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा मध्यस्थनीलतोयदा विद्युल्लेखेव सेयं दहर–

तस्य मध्ये वह्निशिखेत्यत्र तस्येति पदं सुशिरपरापर्शपरमित्यर्थः । स्वान्तरिति स्वरूपशब्दो विग्रहपरः पूर्वापरपरामर्शान्नीलतोयदेत्यादिवाक्यस्योक्त एवार्थः । मनोमयः पूर्ववदर्थः, प्राणशरीरः शरीरधारकस्यापि धारकः, भारूप इत्यत्र तात्पर्यम्, आकाशात्मा आकाशवत्स्वच्छब्दरूपः, अक्षरमम्बरान्तरधृतेरित्युक्तप्रकृत्यन्तरात्मेति वा, सर्वकर्म्मा सर्वं जगदस्य कर्म्मेति क्रियत इति कर्मणि व्युत्पत्तिः । सर्वकामः भोग्यभोगोपकरणादिकाम्यवस्तुसमृद्धः । एवं पदद्वयेनोभयविभूतिमत्त्वमुक्तं भवति । सर्वगन्धः सर्वरस इत्यनेन च विग्रहसिद्धिः अभ्यात्तः–स्वीकृतवान्, अवाकी–अजल्पाकः, अनादरः–तृणीकृतसकलजगत्त्वादित्यर्थः । महा*रजतं रागद्रव्यविशेषः तेन

* अत्रापि महारजनमित्येव युक्तः पाठोमाध्यन्दिनारण्यकमूलव्याख्यादौ तथैवोपलम्भात्–रागद्रव्यविशेषश्च हरिद्रैव ब्राह्मणव्याख्यादिषु तथोक्तत्वात् ।

रञ्जितं माहा*रजतम् आकाशशब्देन वक्ष्यमाणाः श्रुतयो विवक्षिताः, पत्नी विषयं प्रमाणमाह अस्येति, स्थानपरिजनादौ प्रमाणमाह तद्विष्णोरिति, क्षयन्तं क्षि—निवासगत्योरिति धातुः । यदेकमिति अनन्तरूपमिति पदं दिव्यग्रहपरं स्पष्टम् । उपरि तद्विष्णोरित्यादिस्थानविधिः सूरिविधिः सदा दर्शनविधिश्चेत्यभिप्रेत्य तत्र चोद्यं परिहारं च वक्ष्यंस्तत्प्रतिपत्तमर्थमाह—

पुण्डरीकमध्यस्थाकाशवर्तिनी वन्हिशिखा स्वान्तर्निहितनीलतोयदाभपरमात्मस्वरूपा स्वान्तर्निहितनीलतोयदा विद्युदिवाभातीत्यर्थः । मनोमयः प्राणशरीरो भारूपः सत्यकामः सत्यसङ्कल्पः आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्याप्तोऽवाक्यनादरोमहारजतं वास इत्याद्याः, अस्येशाना जगतो विष्णुपत्नी ह्रीश्च ते लक्ष्मीश्च पत्न्यौ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः क्षयन्तमस्य रजसः पराके, यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् यो वेद निहितं गुहायां परमे व्योमन् यो ऽस्याध्यक्षः परमे व्योमन् तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्नित्यादिश्रुतिशतनिश्चितोऽयमर्थः, तद्विष्णोः परमं पदमिति विष्णोः परस्य ब्रह्मणः परमं पदं सदा पश्यन्ति सूरय इति वचनात् ।

परस्येति, ये सूरय इति यच्छब्दान्वयो वचनव्यक्तिश्चतः, नात्रोद्देश्यं किमप्यस्ति सर्व्वोर्थस्याप्राप्तत्वात्तस्मादियं वचनव्यक्तिर्नोद्देश्योपा-

* माहारजनमिति पाठान्तरमेव तु युक्तं भाति तदर्थश्च महारजनं हरिद्रा तया रक्तं-माहारजनमिति तेन रक्तं रागादिति पाणिनीयेनापि साधुः ।

द्वयविभागवतीत्यभिप्रायेण वचनव्यक्तिद्वयमुक्तम्, अनेकार्थविधाने वाक्यभेद इति शङ्कते उभयेति, परिहरति अप्राप्तत्वादिति, विशिष्टविधाने जैमिनीयं सूत्रमाह यथोक्तमिति, सूत्रस्य विषयवाक्यं दर्शयँस्तदर्थं विशदयति यथेति, । ननु विशिष्टविधिरस्तु तत्रापि मन्त्राणामनुष्ठेयार्थप्रकाशकत्वादत्रान्यपरत्वेन स्वार्थे न तात्पर्यमिति सर्वमिदं न सिध्यतीति अत्राह करणमन्त्रा इति, करणमन्त्राः होमादिसाधनतया विहितमन्त्राः न तु जप्यत्वेन विहिताः, क्रियमाणानुवादिनो बर्हिर्देवसदनं दामीत्यादयः, स्तोत्रं गानविशिष्टं मन्त्रोच्चारणं, शस्त्रं गानरहितम् एकश्रुतिरूपोच्चारणं तद्युक्ता इत्यर्थः ।

सर्वकालदर्शनवन्तः परिपूर्णज्ञानाः केचन सन्तीति विज्ञायते ये सूरयस्ते सदा पश्यन्ति इति वचनव्यक्तिः ये सदा पश्यन्ति ते सूरय इति वा उभयपक्षेऽप्यनेकविधानं न सम्भवतीति चेन्न अप्राप्तत्वात्सर्वस्य सर्वविशिष्टं परमस्थानं विधीयते यथोक्तं तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थे न चेदन्येन शिष्टाः, इति, यथा यदाग्नेयोऽष्टाकपाल इत्यादिकर्म्मविधौ कर्म्मणो गुणानां चाप्राप्तत्वेन सर्वगुणविशिष्टं कर्म्म विधीयते तथाऽत्रापि सूरिभिस्सदा दृश्यत्वेन विष्णोः परमस्थानमप्राप्तं प्रतिपादयतीति न कश्चिद्विरोधः । करणमन्त्राः क्रियमाणानुवादिनः स्तोत्रशस्त्ररूपा जपादिषु विनियुक्ताश्च प्रकरणपठिताश्चाप्रकरणपठिताश्च स्वार्थं सर्वं यथाऽवस्थितमेवाप्राप्तमविरुद्धं ब्राह्मणवद्बोधयन्तीति हि वैदिकाः,

प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं स्तोत्रम्, अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रं, विनियुक्तार्थप्रकाशिनां च-

जपादिष्विति आदि-शब्देनाध्ययनं विवक्षितम् उपांशूच्चारणम् जपः, उच्चैरुच्चारणमध्ययनं, मोक्षप्रकरणानधीतत्वात् न परस्थानादौ तात्पर्यमिति चोद्यपरिहाराय प्रकरणपठिताश्चाप्रकरणपठिताश्चेत्युक्तं, तद्विष्णोरित्यादिश्रुतिर्मोक्षप्रकरणे पठिता च अखण्डं भिनत्तीत्यादिप्रकरणे सुबालोपनिषद्यधीतत्वात्, अप्राप्तमविरुद्धं चेति साधकबाधकप्रमाणरहितमित्यर्थः साधकान्तरसद्भावे तदनुवादः स्यात् बाधकस्य सद्भावे आदित्योयूप इत्यादिवाक्यवत्र तत्प्रतिपादक इति तदुभयव्यावृत्त्यर्थमप्राप्तमविरुद्धं चेत्युक्तं, करणमन्त्रशब्दस्य कर्म्मसाधनमन्त्रमात्रपरत्वे तु नाध्याहारः, अन्यथा मन्त्राश्चेत्यध्याहारः स्यात् मन्त्राश्चेन्नानुष्ठेयार्थप्रकाशिनः अपि तु बर्हिर्देवसदनं दामीत्यादयः के च न तदर्थाश्चेत्तत्पराः स्युः । अन्ये व्युत्पत्तिसिद्धस्वार्थपराः ब्राह्मणवद्विधिभागवत् विनियोगभेदेऽपि न स्वार्थपरित्याग ऐन्द्र्या गार्हत्यमुपतिष्ठते सावित्र्या गार्हपत्यमुपतिष्ठते इत्यत्र विनियोगभेदाव हि सावित्र्यादेः सवितृदेवताकत्वादिहानिः ।

देवतादिष्वप्राप्ताविरुद्धगुणविशेषप्रतिपादनं विनियोगानुगुणमेव नेयं श्रुतिर्मुक्तजनविषया

यदि कर्म्मविशेषविनियुक्तस्य मन्त्रस्य तदेकानुष्ठेयपरत्वं तर्हि-वेदमेव जपेन्नित्यं यथाकालमतन्द्रितः । इत्यादिभिः कृत्स्नस्य वेदस्य जपे विनियुक्तत्वात् ब्राह्मणभागोऽपि विनियुक्त इति ब्राह्मणमपि स्वार्थे न प्रमाणं स्यात् जपमात्रानुष्ठेयप्रकाशकं स्यात्, न च तथा भवति, शब्दानां व्युत्पत्तिसिद्धस्वार्थाभिधायित्वं चेति तन्मन्त्रेष्वपि तुल्यमिति बाधकसाधकाभावे मन्त्राः स्वार्थप्रतिपादका एवेत्यर्थः । अनुष्ठेयार्थप्रकाशकत्वमभ्युपगम्याह विनियुक्त इति, अनुष्ठेयार्थप्रकाशकत्वेऽप्यनुष्ठेयं कर्म्मैवंविधदेवताकं

भवतीति कर्म्मविशेषणभूतदेवताविशेषणस्थानपत्नीपरिजनादिप्रतिपादनं च विनियोगाननुगुणमित्यर्थः । नित्यपरविभूतिपरत्वस्येम्ने मुक्ताविषयत्वादिकमाशङ्क्य परिहरति नेयमिति, नापीति, एकैकं सर्वदा दर्शनवन्तोऽनेके प्रतीता इति श्रुतिभङ्गप्रसङ्गात् प्रवाहविषयत्वमयुक्तमित्यर्थः । कार्यार्थे एव व्युत्पत्त्या न विवक्षितसिद्धिरिति चेत् तत्राह मन्त्रार्थवादगता इति, अर्थान्तरपरत्वमुखेन चोदयति ननु चेति, अव्यतिरेकदर्शनादिति परमपद–शब्दवाच्यस्य भगवत्स्वरूपाव्यतिरेकदर्शनादित्यर्थः । परिहरति नैवमिति, विलक्षणस्थानस्य–

तेषां सदा दर्शनानुपपत्तेः । नापि मुक्तप्रवाहविषया सदा पश्यन्तीत्येकैककर्तृविषयतया प्रतीतेः श्रुतिभङ्गप्रसङ्गात्, मन्त्रार्थवादावगता ह्यर्थाः कार्यपरत्वेऽपि सिद्ध्यन्तीत्युक्तं, किं पुनः सिद्धवस्तुन्येव तात्पर्ये व्युत्पत्तिसिद्धे इति सर्वमुपपन्नम् । ननु चात्र तद्विष्णोः परमं पदमिति परस्वरूपमेव परमपद–शब्देनाभिधीयते समस्तहेयरहितं विष्ण्वाख्यं परमं पदमित्यादिषु अव्यतिरेकदर्शनात्, नैवं क्षयन्तमस्य रजसः पराके तदक्षरे परमे व्योमन् यो अस्याध्यक्षः परमे व्योमन् यो वेद निहितं गुहायां परमे व्योमन्नित्यादिषु परमस्थानस्यैव प्रदर्शनात् तद्विष्णोः परमं पदमिति व्यतिरेकनिर्देशाच्च विष्ण्वाख्यं परमं पदमिति विशेषणादन्यदपि परं पदं विद्यत इति चैतेनैव ज्ञायते, तदिदं परमं स्थानं सूरिभिः सदा दृश्यत्वेन प्रतिपाद्यते ।

प्रमाणान्तरसिद्धत्वादत्रापि विष्णोरिति व्यतिरेकनिर्द्देशात् परमपद-शब्दस्य च स्थानवाचित्वव्युत्पत्तिसद्भावाच्चेदं स्थानपरमित्यर्थः । विष्णवाख्यमिति विशेषणानां व्यावर्तकत्वात् विष्णवाख्यमिति विशेषणेन तद्व्यावर्त्यतयाऽन्यस्यापि कस्यचित्परमपदशब्दवाच्यत्वं गम्यते इत्यर्थः । तदिदमिति—एकान्तिनः सदाब्रह्मध्यायिनो योगिनो हि ये । तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः । इति श्रीविष्णुपुराणवचनं स्मारितं, परमस्थानशब्देन अस्याः श्रुतेः परमस्थानपरत्वेन श्रीविष्णुपुराणे व्याख्यातत्वादियं श्रुतिः स्थानपरेत्यभिप्रायः । स्थान-शब्दस्य स्वरूपपरत्वमस्वरसं स्वरसार्थविरोधाभावे हि नाङ्गीकार्यं विष्णवाख्यं परमं पदमित्यत्र व्यावर्त्यं न स्थानमपि तु जीवस्वरूपमित्यत्राह एतदुक्तं भवतीति, भगवत्स्वरूपादन्यस्यापि परमपदशब्दवाच्यत्वं दृष्टमित्येतदेव विवक्षितमित्यर्थः ।

एतदुक्तं भवति क्वचित्परमं स्थानं परमपदशब्देन प्रतिपाद्यते, क्वचित्प्रकृतिवियुक्तात्मस्वरूपं क्वचिद्भगवत्स्वरूपं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय इति परमं स्थानं,—सर्गस्थित्यन्तकालेषु त्रिविधैवं संप्रवर्तते । गुणप्रवृत्त्या परमं पदं तस्यागुणं महत् ॥ इत्यत्र प्रकृतिवियुक्तात्मस्वरूपं समस्तहेयरहितं विष्णवाख्यं परमं पदम् । इत्यत्र भगवत्स्वरूपं त्रीण्यप्येतानि परमप्राप्यत्वेन परमपद—शब्देन प्रतिपाद्यन्ते कथं त्रयाणां परमप्राप्यत्वमिति चेत् ।

परमपदशब्दस्यार्थत्रयवाचित्वेऽपि प्रयोगं दर्शयति तद्विष्णोरिति, त्रिष्वप्यर्थेषु किं शक्तिभेदक्लृप्तिस्तदा कल्पनागौरवं स्यात्, किमेकत्र मुख्यत्वमन्यत्रामुख्यत्वं तथा षष्ठ्याः अस्वारस्यम्, सोप्यऽमुख्यस्वपरस्वरूपस्यापि वाक्यप्रतिपाद्यत्वप्रसिद्धेरित्यंत्राह त्रीण्यपीति, एकावयवशक्त्या त्रिष्वपि

मुख्यमित्यर्थः । अर्थत्रयस्यापि प्राप्यत्वं चोद्यपूर्व्वकमुपपादयति कथमिति, इतरयोरपि भगवत्प्राप्तिगर्भत्वात्-भगवत्प्राप्तिसहितत्वादित्यर्थः । तत्रात्मप्राप्तेर्भगवत्प्राप्तिसाहित्यमाह सर्वेति, तिरोधायकसर्वकर्म्मविनाशे ह्यात्मप्राप्तिर्भगवद्गुणानामपि तिरोधायकं कर्म्मेति तन्निवृत्तिपूर्वकात्मप्राप्तौ भगवद्गुणतिरोधायकनिवृत्तेरपि प्रतिबन्धकाभावात् भगवत्प्राप्तिः सिध्यतीत्यर्थः । अनृत-शब्दस्य कर्मवाचित्वं कथमिति शङ्कते अनृतेति, परिहरति अविद्येति, अविद्या-शब्दस्य कर्म्मवाचित्वे प्रयोगः श्रीविष्णुपुराणे दर्शितः । इदमप्यभिप्रेतम् ऋतं पुण्यम् ऋतं पिबन्तौ सुकृतस्य लोके इति वचनात्, एवं पुण्यस्य कर्म्मणो दूराद्गन्धो वातीति प्रकरणेऽनृतादात्मानं जुगुप्सेदिति श्रवणात् पापमनृत-शब्दवाच्यं न सुकृतं न दुष्कृतं सर्वे पाप्मनोऽतो निवर्तन्त इति मुमुक्ष्वपेक्षयाऽनिष्टफलप्रदत्वेन द्वयोरपि पाप-शब्दवाच्यत्वादनृतमिति कर्म्मोच्यते इति परस्यानेति अर्चिरादिना स्थानविशेषप्राप्तिर्भगवत्प्राप्तिगर्भेति स्पष्टमित्यर्थः ।

भगवत्स्वरूपं परमप्राप्यत्वादेव परमं पदम्, इतरयोरपि भगवत्प्राप्तिगर्भत्वादेव परमपदत्वं सर्वकर्म्मबन्धविनिर्मुक्तात्मस्वरूपावाप्तिर्भगवत्प्राप्तिगर्भेति ते इमे सत्याः कामाः अनृतापिधाना इति भगवतो गुणगणस्य तिरोधायकत्वेनानृत-शब्देन स्वकर्म्मणः प्रतिपादनात्, अनृतरूपतिरोधानं क्षेत्रज्ञकर्म्मेति कथमवगम्यत इति चेत्-अविद्या कर्म्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते । यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप! सर्वगा ॥ संसारतापानखिलानवाप्नोत्यतिसन्ततात् तया

उदाहृतवाक्यान्तरं व्याचष्टे क्षयन्तमिति, क्षि निवासगत्योरिति धातु परोके-परस्तात् । फलितमर्थमाह अनेनेति, वेदाहमिति अस्मिन्वाक्येऽपि

निवासशब्दार्थोऽनुसन्धेय इत्याह रजस इति, एकवाक्यत्वात्—एकार्थप्रतिपादकत्वात्, अस्य परमव्योमशब्दवाच्यत्वनिर्विकारत्वे दर्शयति सत्यं ज्ञानमित्यादिना, स्पष्टं, व्याख्याविशेषव्यावृत्त्यर्थमाह अक्षर इति, यत्रेति, यत्र पूर्वे इत्यत्र यच्छब्दः परमपदपरामर्शी नाक—शब्देन प्रकृतं नास्मा अकं भवतीति हि श्रुतिः, अतोनाक—शब्दः परमपदमुख्यार्थः । यत्रर्षय इत्यत्र प्रथमजाः पूर्वमेव सन्तः तद्विप्रास इति विप्रास इति पदं व्याचष्टे मेधाविन इति, अथर्वणे विष्णुक्रान्तं वासुदेवं विजानन् विप्रो विप्रत्वं गच्छते तत्त्वदर्शीति वचनात्, विपन्यवः—स्तुतिशीला इति पण पन स्तुतिव्यवहारयोरिति

तिरोहितत्वाच्चेत्यादिवचनात् परस्थानप्राप्तिरपि भगवत्प्राप्तिगर्भैवेति सुव्यक्तं, क्षयन्तमस्य रजसः पराक इति रजश्शब्देन त्रिगुणात्मिका प्रकृतिरुच्यते केवलस्य रजसोऽनवस्थानात् इमां त्रिगुणात्मिकां प्रकृतिमतिक्रम्य स्थिते स्थाने क्षयन्तं वसन्तमित्यर्थः, अनेन त्रिगुणात्मकात् क्षेत्रज्ञस्य भोग्यभूताद्वस्तुनः परस्ताद्विष्णोर्वासस्थानमिति गम्यते वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तादित्यत्रापि तमश्शब्देन सैव प्रकृतिरुच्यते केवलस्य तमसोऽनवस्थानादेव रजसः पराके क्षयन्तमित्यनेनैकवाक्यत्वात्तमसः परस्ताद्वसन्तं महान्तमादित्यवर्णं पुरुषमहं वेदेत्ययमर्थोऽवगम्यते सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् तदक्षरे परमे व्योमन्निति तत्स्थानमविकाररूपं परमव्योमशब्दाभिधेयमिति च गम्यते । अक्षरे परमे व्योमन्नित्यस्य

स्थानस्याक्षरत्वश्रवणात् क्षररूपादित्यमण्डलादयो न परमव्योमशब्दाभिधेयाः, यत्र पूर्वे साध्याः सन्ति देवाः ।

धातुः महिमानं पश्यति इति श्रुतिप्रयोगः स्पष्टः । परमपदस्याप्यस्थिरत्वमेकत्वावधारणादित्यत्राह एतेषामिति, यथा कारणवस्त्वन्तर्भूतत्वात् ज्ञानादिगुणानां सदेवेत्यादिवाक्ये तेषामभावो न प्रतिपाद्यते एवं नित्यविभूतेरपि कारणवस्त्वन्तर्भूतत्वात् सदेवेत्यादिवाक्यगतैः सदेवैकमेवाद्वितीयमिति शब्दैर्ब्रह्मान्तर्भावो ऽवगम्यते नित्यविभूतिविशिष्टं ब्रह्मैवावगम्यत इत्यर्थः । कुत इत्यत्राह एषामपीति, कल्याणगुणैकदेशत्वादप्राकृतविशेषणैकदेशत्वादित्यर्थः । गुण—शब्दो विशेषणवाची ज्ञानादेरपि हि द्रव्यत्वे सत्यपि गुणत्वं नित्यविशेषणत्वादेव नित्यविभूतेरपि तथेत्यर्थः । विशेषणत्वं प्रपञ्चस्याप्यविशिष्टमिति तद्व्यावृत्त्यर्थं कल्याणगुणैकदेशत्वादित्युक्तं, प्राकृतो हि प्रपञ्चः सदेवेत्यादि स्पष्टम् । अपहतेत्यादि सत्यकाम—शब्दस्य कथं भोग्यभोगोपकरणादिवाचित्वमित्यत्राह सत्या इति,

यत्रर्षयः प्रथमजा ये पुराणाः इत्यादिषु च त एव सूरय इत्यवगम्यते, तद्विप्रासो विप*ण्यवो जागृवांसः समिन्धते विष्णोर्यत्परमं पदमित्यत्रापि विप्रासो—मेधाविनः, विपण्यवः—स्तुतिशीलाः, जागृवांसः—अस्खलितविज्ञानास्त एवास्खलितविज्ञानास्तद् विष्णोः परमं पदं सदा स्तुवन्तस्समिन्धत इत्यर्थः । एतेषां परिजनस्थानादीनां सदेव सोम्येदमग्र आसीदित्यत्र ज्ञानबलैश्वर्यादिकल्याणगुणगणवत्परब्रह्मस्वरूपान्त-

* विन्यव इति पा० ।

गतत्वात् सदेवैकमेवाद्वितीयमिति ब्रह्मान्तर्भावोऽवगम्यते, एषामपि कल्याणगुणैकदेशत्वादेव सदेव सोम्येदमग्र आसीदित्यत्रेदमिति शब्दस्य कर्म्मवश्यभोक्तृवर्गमिश्रतद्भोग्यभूतप्रपञ्चविषयत्वाच्च सदा पश्यन्ति सूरय इति सदादर्शित्वेन च तेषां कर्म्मवश्यानन्तर्भावात् अपहतपाप्मेत्याद्यपिपास इत्यन्तेन

प्रमाणसम्बन्धार्हत्वलक्षणं सत्यत्वं प्रपञ्चस्याप्यस्तीति तद्व्यावृत्त्यर्थमाह अन्यस्येति, सत्यत्वं द्विविधं प्रमाणसम्बन्धार्हत्वमविकारित्वं च तच्च सत्यत्वं प्रपञ्चे नास्ति तदत्राभिप्रेतमित्यर्थः । सत्यसङ्कल्पपदं व्याचष्टे सत्येति, अर्थान्तरमाह एषां चेति, चेतनानामचेतनानां चेति, प्रपञ्चे प्राकृतपदार्थाः अचेतना बद्धाश्चेतनाः, नित्यविभूतौ शुद्धसत्त्वमचेतनं नित्या मुक्ताश्च चेतनाः स्थिराणामस्थिराणां चेति प्रपञ्चे चिदंशः स्थिरः, अचिदंशोऽस्थिरः । नित्यविभूतावपि लीलाव्यापारादयोऽस्थिरा अन्यत्सर्वं स्थिरं, तत्सङ्कल्पेति, आदि-शब्देन तत्तत्पदार्थधर्म्माणामपि तत्सङ्कल्पायत्तत्वं विवक्षितम् ।

सर्व*लीलोपकरणभूतत्रिगुणात्मकप्रकृतिप्राकृततत्संसृष्टपुरुषगतं हेयस्वभावं सर्वं प्रतिषिध्य सत्यकाम इत्यनेन स्वभोग्यभोगोपकरणजातस्य सर्वस्य सत्यता प्रतिपादिता, सत्याः कामा यस्यासौ सत्यकामः काम्यन्त इति कामाः तेन परब्रह्मणा स्वभोग्यतदुपकरणादयः स्वाभिमता ये काम्यन्ते ते सत्याः—नित्या इत्यर्थः । अन्यस्य लीलोपकरणस्यापि वस्तुनः

* स्वलीलोपकरणभूतेति पा° ।

प्रमाणसम्बन्धयोग्यत्वे सत्यपि विकारास्पदत्वेनास्थिरत्वात्तद्विपरीतं स्थिरत्वमेषां सत्यपदेनोच्यते, सत्यसङ्कल्प इत्येतेषु भोग्यतदुपकरणादिषु नित्येषु निरतिशयेषु अनन्तेषु सत्स्वपि अपूर्वाणामपरिमितानामर्थानामपि सङ्कल्पमात्रेण सिद्धिं वदति, एषां च भोगोपकरणानां लीलोपकरणानां चेतनानामचेतनानां स्थिराणामस्थिराणां च तत्सङ्कल्पायत्तस्वरूपस्थितिप्रवृत्तिभेदादि सर्वं वदति सत्यसङ्कल्प इति, इतिहासपुराणयोर्वेदोपबृंहणयोश्चायमर्थ उच्यते—तौ तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ । वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ॥ इति, वेदोपबृंहणतया प्रारब्धे श्रीमद्रामायणे—व्यक्तमेष महायोगी परमात्मा

उक्तार्थोऽनधीतशाखास्वपि प्रतिपाद्यत इति दर्शयितुं भूषणादिकण्ठोक्तिं दर्शयितुं चोपबृंहणं दर्शयति इतिहासेति, तत्र श्रीमद्रामायणे दर्शयिष्यंस्तस्य काव्यसाम्यबुद्धिनिवृत्तये प्रामाण्यमाह तौ त्विति, काव्यत्वकञ्चुकितो वेदार्थो हि तत्र प्रतिपादितः सर्वजनबुद्ध्यारोहणाय, यथोक्तं महाभारते—बिभेति निग*माच्छास्त्रान्नरस्तिक्तादिवौषधात् । भारतः शास्त्रसारोऽयं ततः काव्यात्मना कृतः ॥ इति, व्यक्तमेष इत्यादि अनादिमध्यनिधन इति स्वरूपनित्यत्वं, शाश्वत इति गुणविशिष्टाकारेण नित्यत्वं ध्रुव इति विग्रहविशिष्टाकारेण नित्यत्वं, नित्यश्रीरिति, पत्नीविधिः । श्रीपराशरवचनमाह श्रीमदिति, मूर्तमिति मूर्त्तं ब्रह्म यस्यास्ति स हरिः सर्वब्रह्ममयश्च ब्रह्म—शब्दो जीवपरः शुद्धजीवस्वरूपं तच्छेषमित्यर्थः ।

* महनादिति पा॰ ।

सनातनः । अनादिमध्यनिधनो महतः परमो महान् ॥ तमसः परमो धाता शङ्खचक्रगदाधरः । श्रीवत्सवक्षा नित्यश्रीर*नेयः शाश्वतो ध्रुवः ॥ शरा नानाविधाश्चापि धनुरायतविग्रहम् । अन्वगच्छन्त काकुत्स्थं सर्वे पुरुषविग्रहाः ॥ विवेश वैष्णवं ते†जः सशरीरस्सहानुगः ॥ श्रीमद्वैष्णवपुराणे—समस्ताः शक्तयश्चैता नृप! यत्र प्रतिष्ठिताः ॥ तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् । मूर्त्तं ब्रह्म महाभाग! सर्वब्रह्ममयो हरिः । नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी । यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम । देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी । विष्णोरे‡वानुरूपां वै करोत्येषात्मनस्तनुम् । एकान्तिनः सदा ब्रह्मध्यायिनोयोगिनो हि ये । तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः ॥ कलामूहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः ॥ महाभारते च—

श्रीपत्न्यां प्रमाणमाह नित्यैवेति, परमस्थाने वचनमाह एकान्तिन इति, तस्य नित्यत्वमाह कलेति, महाभारतवचनमाह महेति, परस्येति, अन्तस्तद्धर्म्मोपदेशादिति सूत्रे न हि रूपवत्त्वं प्रतीयते कथं वा तस्य विलक्षणत्वमिति शङ्कायां तद्विषयवाक्यार्थपुरस्सरं तदर्थमाह योऽसावित्यादिना, य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते इत्यादिविषयवाक्यं तत्र य इति प्रसिद्धवन्निर्द्देशात्प्रत्यक्षाप्रत्यक्षसकलश्रुतिगतविशेषणजातमत्र विवक्षितमिति सर्वश्रुतिस्मृतीतिहासपुराणगतवि-

* अजय्य इति पा· ।   † धामेति पा· ।
‡ विष्णोर्देहानुरूपामिति पा· ।

शेषणान्यत्रोच्यन्ते य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् इति बृहदारण्यके य एष एतस्मिन्मण्डलेऽर्चिषि पुरुष इति तैत्तिरीयके च श्रवणादत्रादित्यशब्दो मण्डलवाचीत्यभिप्रायेणादित्यमण्डलान्तर्वर्त्तीत्युक्तम्, आदित्यशब्दादुपरि दित्यदित्यादित्यपत्युत्तरपदाण्ण्य इति ण्य प्रत्ययः रुक्माभं स्वप्नधीगम्यं यदा पश्यः पश्यते रुक्मवर्णं प्रतप्तकार्तस्वरवर्चसं प्रभुमित्यादिवचनानुसारेण तप्तकार्तस्वरगिरिवरप्रभ इत्युक्तम्, आदित्यवर्णं परस्तात्. दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता । यदि भाः सदृशी सा तमसः स्याद्भासस्तस्य महात्मनः ॥ इत्यादिवचनात् सहस्रांशुशतसहस्रकिरण इत्युक्तम् ।

दिव्यं स्थानमजरं चाप्रमेयं दुर्विज्ञेयं चागमैर्गम्यमाद्यम् । गच्छ प्रभो ! रक्ष चास्मान्प्रपन्नान् कल्पे कल्पे जायमानः स्वमूर्त्या ॥ कालस्सम्पच्यते तत्र न कालस्तत्र वै प्रभुः ॥ इति, परस्य ब्रह्मणोरूपवत्त्वं सूत्रकारश्च वदति—अन्तस्तद्धर्म्मोपदेशात् इति, योऽसावादित्यमण्डलान्तर्वर्त्ती

एवं विशेषणद्वयेन भक्तजनभोग्यत्वं प्रतिकूलदुरासदत्वं च विवक्षितं, तच्चाभियुक्तैरुक्तं—नित्यानुकूलमनुकूलनृणां परेषामुद्वेजनं तव च तेज उदाहरन्ति । इति तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी इत्यस्यार्थं हृदि निधायाह गम्भीराम्भ इति, अस्य वाक्यस्य वाक्यकारेण षडर्थाः पूर्व्वपक्षत्वेन सिद्धान्तत्वेन चोक्ताः, तत्र सिद्धान्तितार्थत्रयमत्रोक्तम्, इतरार्थत्रयस्य पूर्व्वपक्षत्वं तत्स्वभावादेवावगतं, तत्र पूर्व्वपक्षानुपन्यासादेव तस्यानुपादेयत्वं स्पष्टं, न च तस्य पृथक् निरासः क्रियते ग्रन्थेषु, तस्माद्वाक्यकारोक्तेष्वर्थत्रयं विवक्षितम् । के पुनः पूर्व्वपक्षिता अर्थाः—उच्यन्ते कपिः—आदित्यः कपि चलने इति धातुः, कं पिबतीति च कपिः कपिर्गभस्तितेजनमिति वैदिकप्रयोगस्तस्यासम्मण्डलं कप्यासं, यथाऽऽदित्य

मण्डलं हृदयपुण्डरीकं चोपासनस्थानम् एवमक्षिणी अप्युपासनस्थानमित्येकोऽर्थः, अयं नोपपद्यते उपास्यस्येति षष्ठ्यन्तं पदमध्याहार्यम् उपासनस्थानमिति चाध्याहार्यम्। एवं पदद्वयाध्याहारः समानविभक्त्यन्तयोः पदयोः स्वतः प्राप्तं सामानाधिकरण्यं घटः पट इतिवदर्थविरोधाभावे च-शब्दाद्यभावेऽपि स्वतःप्राप्तसामानाधिकरण्यपरित्याग एको दोषः, पुण्डरीकशब्दस्य गौणता पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखमिति श्रुतेः तत्सदृशि तच्छब्दो हि गौणः, हिरण्यश्मश्रुर्हिरण्यकेशः आप्रणखात् सर्व एव सुवर्ण इति दिव्याङ्गवर्णनप्रकरणाननुगुणत्वं च, य एषोऽक्षिणि पुरुषो दृश्यत इत्युत्तरत्राक्षिस्थानस्याभिधास्यमानत्वात् पुनरुक्तिश्च, य एषोऽन्तरक्षिणि पुरुषोदृश्यते इत्येकस्मिन्नक्षिण्युपासनविधानात् य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् इति बृहदारण्यके दक्षिणस्याक्ष्ण उपासनस्थानत्वविधानादक्षिणी इति द्विवचनानुपपत्तिश्चेति ।

तप्तकार्तस्वरगिरिवरप्रभः सहस्रांशुशतसहस्रकिरणो गम्भीराम्भःसमुद्भूतसुमृष्टनालरविकरविकसितपुण्डरीकदलामलायतेक्षणः—

तस्मादस्य वाक्यस्योपासनस्थानविधिपरत्वमनुपपन्नं कपिर्मर्कटः तस्यासं पृष्ठमिति मर्कटपृष्ठसाम्यमुच्यते इति यत् तदयुक्तं मर्कटपृष्ठं पुण्डरीकं चोपमाद्वयम् उतैकोपमा तत्रोपमाद्वित्वमयुक्तं स्वतःप्राप्तसामानाधिकरण्यपरित्यागप्रसङ्गात् श्लाघ्यार्थे सम्भवत्यपि हीनोपमाश्रयणायोगाच्च । यद्येकोपमा तथा सति मर्कटपृष्ठसदृशपुण्डरीकसदृशे इत्युक्तं स्यात् तदा कप्यास-शब्दस्य गौणता स्यादिति कप्यासमीषद्विकसितमिति यदुच्यते तदाऽप्यनौचित्यमस्त्येव तथाऽप्यवयवशक्त्या रूढ्या वेषद्विकसितवाचित्वं नास्तीति तदप्ययुक्तमित्येवमर्थत्रयस्याप्यनुपपत्तेरुपपन्नमर्थत्रयं विवक्षितं भगवता भाष्यकारेण । गम्भीराम्भ इत्यादि, कं पिबतीति कपिरादित्यः तेनास्यते क्षिप्यते विकास्यत इति कप्यासं, तदाह वाक्य-

कार आदित्यक्षिप्तं वा श्रीमत्त्वादिति, तत्रादित्यः स्वकिरणेन विकासयति अतो घटकं रविकिरणमपि स्वीकृत्य रविकरविकसितेत्युक्तं, कं पिबतीति कपिर्नालं तस्मिन्नास्ते इति कप्यासम् अत्र *त्रुटितादपि पद्मात् पद्मनालस्थस्य पुण्डरीकस्य शोभातिशयोऽस्तीति सोऽत्र विवक्षितः, सनालमप्युन्मूलितमम्बुजं म्लानं स्यात् इति तद्व्यावृत्त्यर्थमुच्यते सुमृष्टेति, अर्थान्तरमुच्यते गम्भीराम्भः समुद्भूतेति, कज्जलम्, अस भुविरपि पूर्व्वकः वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरिति वचनादपेरत्राल्लोपः, कप्यासं सलिले विद्यमानमित्युक्तं भवति, एवं वाक्यकारोक्तार्थत्रयकथनेन तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी इति श्रुतिवाक्यं व्याख्यातं भवति, रामः कमलपत्राक्षः, पुण्डरीकपलाशाभ्यां विप्रकीर्णमिवोदकम् । प्रसन्नवदनं चारुपद्मपत्रोपमेक्षणम् । जितं ते पुण्डरीकाक्ष त्वत्तः कमलपत्राक्षेत्यादिभिः पद्मपत्रसाम्यकथनात्पुण्डरीकस्य दलाभ्यामेव साम्यमिति दर्शयितुं दल-शब्दः प्रयुक्तः, यथा पुण्डरीकमेवमक्षिणी इत्युक्ते पुण्डरीकादधिकगुणनिवृत्तिर्माभूदित्याशयेनायत-शब्दप्रयोगः, एवमिति, सामान्येन पुण्डरीकधर्म्मेषु तद्गतदोषातिदेशोमाभूदित्यमल-शब्दः, एवमधिकगुणान्वयं दोषराहित्यं चाभिप्रेत्याभियुक्तैरुक्तम् । अदीर्घमप्रेमदुघं क्षणोज्ज्वलं न चोरमन्तःकरणस्य पश्यताम् । अनुब्जमब्जं नु कथं निदर्शनं नीला†द्रिनाथस्य विशालयोर्दृशोः ॥ इति, नारायण! नमस्तेऽस्तु पुण्डरीकायतेक्षण ! सुभ्रूललाटसुनसस्मिताधरविद्रुमेति जितं ‡तोक्तविशेषणान्येवोक्तानि, सुभ्रूललाट इत्यादिनासुरुचिरकोमलदण्ड इत्यादिविशेषणानामपि मूलभूतवचनानि भगवच्छास्त्रपुराणादिषु द्रष्टव्यानि । सुकपोलमिति पराशरः, कम्बुग्रीवो महाहनुरिति वचनमभिप्रेत्य कम्बुग्रीव इत्युक्तं, कर्णकिसलयः कर्णपाशः पीनवृत्तायतभुजः पीनवृत्तायतभुजः श्रीवत्सकृतलक्षण इति जितंतेवचनं, विशालवक्षस्स्थलः महोरस्को महेष्वासः । इति वचनं, समविभक्तसर्वाङ्गः

* अपचितादपि इति पा० ।
† वनाद्रिनाथस्येति द्राविडपाठः ।
‡ जितन्तेपदेन तत्पदघटिताध्यायोविवक्ष्यते ।

समः समविभक्ताङ्गः । इति वचनं, दिव्यरूपसंहनन इति रूपसंहननं लक्ष्मीमिति रूपसंहननं नाम सर्वाङ्गानां संश्लेषौचित्यम्, । अभिरूपविरूपाणामङ्गानां हि संश्लेषो नोचितः सर्वाङ्गानामप्यभिरूपत्वादन्योन्यसंश्लेषः सदृश इति संहनन–शब्दार्थः । स्निग्धवर्णः–

सुभ्रूललाटस्सुनासस्सुस्मिताधरविद्रुमः सुरुचिरकोमलगण्डः कम्बुग्रीवः समुन्नतांसविलम्बिचारुरूपदिव्यकर्णकिसलयः पीनवृत्तायतभुजश्चारुतरातिताम्रकरतलानुरक्ताङ्गुलीभिरलङ्कृतस्तनुमध्यो विशालवक्षस्स्थलः समविभक्तसर्वाङ्गोऽनिर्देश्यदिव्यरूपसंहननः स्निग्धवर्णः प्रबुद्धपुण्डरीकचारुचरणयुगलः

प्रतापवानिति वचनं, प्रबुद्धपुण्डरीकचारुचरणयुगल इति त्वत्पादकमलादन्यत् स्वानुरूपपीताम्बरधर इति तस्य महार*जतं वास इति श्रुतिः– ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः । केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥ इत्याद्युक्तविशेषणान्युच्यन्ते । अमलकिरीटेति, अमल–शब्देनाप्राकृतत्वं विवक्षितम्, अनवधिकेति–रूपौदार्य्यगुणैः पुंसां दृष्टिचित्तापहारिणमिति वचनं, लावण्यं समुदायशोभा । सौन्दर्यमवयवशोभा । अत्यद्भुतेति युवा कुमारः । यः पूर्व्याय वेधसे नवीयसे इति श्रुतिः पुष्पहाससुकुमार इति सौकुमार्यं सुवेशतामिति वचनं, पुण्यगन्धेति सर्वगन्धः सर्वरसः

स्वानुरूपपीताम्बरधरोऽमलकिरीटकुण्डलहारकौस्तुभकेयूरकटकनूपुरोदरबन्धनाद्यपरिमिताश्चर्यानन्तदिव्यभूषणः शङ्खचक्रगदासिशार्ङ्गश्रीवत्सवनमाला-

* तस्य माहारजनं वास इति बृहदारण्यके पाठः ।

ऽलङ्कृतोऽनवधिकातिशयसौन्दर्याहृताशेषमनोदृष्टिवृत्तिर्लावण्यामृतपूरिताशेषचराचरभूतजातोऽत्यद्भुताचिन्त्यनित्ययौवनः पुष्पहाससुकुमारः पुण्यगन्धवासितानन्तदिगन्तरालस्त्रैलोक्याक्रमणप्रवृत्तगम्भीरभावः करुणानुरागमधुरलोचनावलोकिताश्रितवर्गः पुरुषवरो दरीदृश्यते।'स च निखिलजगदुदयविभवलयलीलो निरस्तसमस्तहेयः

तस्याननं पद्मसमानगन्धीति त्रैलोक्येति समुद्र एव गाम्भीर्ये इति करुणेति करुणापूर्णदृष्टिभ्यां दीनं मामवलोकयेति, एवं य एवं य एषोऽन्तरादित्ये इत्यादिवाक्यस्यार्थ उक्तः । एतद्विषयस्य सूत्रस्य प्रतिज्ञाखण्डस्यार्थमाह स इति, निखिलजगदिति पदेनानन्दवल्ल्युक्तजगत्कारणत्वं विवक्षितं, यश्चासावादित्ये इति तत्र हि जगत्कारणस्यादित्यान्तर्वर्तित्वमुक्तं, निरस्तेति सर्वेभ्यः पाप्मभ्य उदित इत्यस्यार्थो विवक्षितः । हेयप्रतिभटत्वात् कल्याणगुणाकरत्वाच्च स्वेतरसमस्तवस्तुविलक्षणपरमात्मपरब्रह्मनारायणशब्दाः सामान्यविशेषशब्दाः, एवं सूत्रस्य प्रतिज्ञाखण्डो व्याख्यातः । कुत इत्यत्राह तद्धर्मोपदेशादित्येतद्व्याचष्टे स एष इति, सर्वलोकेशत्वादिगुणा हि श्रूयन्ते ततः किं परमात्मत्वस्येत्यत्राह तस्यैते गुणा इति, तस्यैते गुणा इत्यादिवाक्यप्रतिपादिता इत्यन्वयः । वाक्यकारश्चैतदिति प्राज्ञ—शब्देन ब्रह्मणा विपश्चितेत्युक्तं विपश्चित्त्वमुक्तं सर्वान्तरशब्देनान्योऽन्तर आत्मानन्दमय इत्युक्तार्थो विवक्षितः, लोककामेशोपदेशात् लोककामेशत्वोपदेशात्, तथोदयात् पाप्मनां स एषः सर्वेभ्यः पाप्मभ्य उदितः इत्युक्ताद्वित्यर्थः । एवमादित्यान्तरवर्तिनो रूपवत्त्वात् जीवत्वमाशङ्क्य

समस्तकल्याणगुणनिधिः स्वेतरसमस्तवस्तुविलक्षणः परमात्मा परब्रह्मनारायण इत्यवगम्यते । तद्ध-

म्मोपदेशात् स एष सर्वेषां लोकानामीष्टे सर्वेषां कामानां स एष सर्वेभ्यः पाप्मभ्य उदित इत्यादिदर्शनात्, तस्यैते गुणास्सर्वस्य वशी सर्वस्येशानः अपहतपाप्मा विजर इत्यादिसत्यसङ्कल्प इत्यन्तं विश्वतः परमं नित्यं विश्वं नारायणं हरिं पतिं विश्वस्यात्मेश्वरमित्यादिवाक्यप्रतिपादिताः । वाक्यकारश्चैतत्सर्वमाह—हिरण्मयः पुरुषो दृश्यत इति प्राज्ञः सर्वान्तरः स्याल्लोककामेशोपदेशात्

रूपस्याप्राकृतत्वात् परमात्मत्वं सिद्धान्तितमन्तरित्यादिसूत्रे वाक्यकारग्रन्थे रूपस्यानित्यत्वप्राकृतत्वशङ्काव्यावृत्त्यर्थमाह तस्य चेति, पूर्वपक्षवाक्यमिदं स्यात्तु रूपमित्यादि, चेतनानामुपासकानामनुग्रहार्थमैश्वर्यात् स्वतन्त्रशक्त्या वा रूपं कृतकं स्यादित्यर्थः । वाक्यस्यार्थमाह उपासितुरिति, रूपं वेत्यादिसिद्धान्तवाक्यं तत्तात्पर्यार्थमाह यथेति, स्वरूपतया स्वरूपनिरूपकधर्मतया स्वाभाविकत्वेनेत्यर्थः । द्रमिडाचार्यैर्व्याख्यातमित्याह भाष्येति, अञ्जसा—अव्यवधानेन स्वाभाविकमित्यर्थः । ऐन्द्रिजालिकवस्तुवन्मायाकृतमिति शङ्काव्यावृत्त्यर्थमाह तत्त्विति, मिथ्याभूतं—दुष्टेन्द्रियग्राह्यम् अदुष्टकरणग्राह्यत्वश्रवणात् परमार्थभूतमित्यभिप्रायः । पारमार्थ्यमेवोपपादयति न हीति, । अरूपाया रूपोपदेशः कथमित्यत्राह यथा भूतवादीति, वेदाहमित्यादित्यवर्णमिति पदे तात्पर्यमिति, आदिना भाष्यकारेण व्याख्यातमित्यन्वयः, हिरण्मय इति विकारवाचिशब्दश्रवणात्कृतकं रूपमिति शङ्काव्यावृत्त्यर्थं वाक्यमाह हिरण्मय इति, रूपमौज्ज्वल्यं तस्य भाष्यग्रन्थमाह न मयडत्रेति,

तथोदयात्पाप्मनामित्यादिना, तस्य च रूपस्यानित्यतादि वाक्यकारेणैव प्रतिषिद्धं स्यात्तद्रूपं कृत-

* वाक्यकारश्चैतत्सुस्पष्टमाहेति पा॰ ।

कमनुग्रहार्थं तच्चेतनानामैश्वर्यादिति उपासितुरनुग्रहार्थः परमपुरुषस्य रूपसंग्रह इति पूर्वपक्षं कृत्वा—रूपं वाऽतीन्द्रियमन्तःकरणप्रत्यक्षं तन्निर्देशादिति, यथा ज्ञानादयः परस्य ब्रह्मणस्स्वरूपतया निर्देशात् स्वरूपभूतगुणाः तथेदमपि रूपं श्रुत्या स्वरूपतया निर्देशात्स्वरूपभूतमित्यर्थः । भाष्यकारेणैतद्व्याख्यातम्—अञ्जसैव विश्वसृजो रूपं तत्तु न चक्षुषा ग्राह्यं मनसा त्वकलुषेण साधनान्तरवता गृह्यते

विकारमादाय—विकारार्थमङ्गीकृत्य अनारभ्यत्वादात्मन इति विग्रहविशिष्टस्यात्मनोऽनारभ्यत्वादित्यर्थः । पूर्वं रूपं वाऽतीन्द्रियमिति वाक्योपादानेन संग्रहेणोक्तमर्थं भाष्यग्रन्थानन्तरं विस्तरेणाह यथेति, कल्याणतमरूपं इत्यनेन—तत्ते कल्याणतमं रूपं पश्यामीति श्रुतिः स्मारिता, आदित्यवर्णमिति श्रुतिः पुरुषविद्यया अतः पुरुषोत्तम-शब्दः, स एव ब्रह्मेति-दर्शयितुं परब्रह्म-शब्दः विशेषवाची नारायणशब्दः, यथा ज्ञानादिकल्याणगुणगणाः प्रामाणिकत्वादभ्युपगम्यन्ते तथा रूपमपि प्रामाणिकत्वादङ्गीकार्यमित्यर्थः । एवं वाक्यकार-भाष्यग्रन्थयोर्दिव्यरूपसमर्थनं पत्नीपरिजनादेरपि प्रदर्शनार्थं तुल्यन्यायादित्यभिप्रेत्याह तथेति, कथं तत्रावगतमित्यत्राह यथेति, प्रामाणिकत्वङ्गुणाभ्युपगमवद्रूपमभ्युपेतव्यमिति

न चक्षुषा गृह्यते नापि वाचा मनसा तु विशुद्धेनेति श्रुतेः, न ह्यरूपाया देवताया रूपमुपदिश्यते यथाभूतवादि हि शास्त्रं महा*रजतं वासः वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तादिति प्रकर-

*. माहारजनं वास इति पा· ।

णान्तरनिर्देशाच्च साक्षिण इत्यादिना हिरण्मय इति रूपसामान्याच्चन्द्रमुखवत् न मयडत्र विकारमादाय प्रयुज्यते अनारभ्यत्वादात्मन इति यथा ज्ञानादिकल्याणगुणानन्त्यनिर्देशादपरिमितकल्याणगुणविशिष्टं परं ब्रह्मेत्यवगम्यते, एवमादित्यवर्णं पुरुषमित्यादिनिर्देशात्स्वाभिमतस्वानुरूपकल्याणतमरूपः परब्रह्मभूतः पुरुषोत्तमो नारायण इति ज्ञायते तथाऽस्येशाना जगतो विष्णुपत्नी ह्रीश्च ते लक्ष्मीश्च पत्न्यौ सदा पश्यन्ति सूरयः तमसः परस्तात् क्षयन्तमस्य रजसः पराके इत्यादिना पत्नीपरिजनस्थानादीनाम् ।

उक्तं तर्हि गुणानपि वयं नाभ्युपगच्छाम इत्यत्राह एतदुक्तं भवतीति, प्रमाणसिद्धत्वाद् ब्रह्मणः स्वरूपमभ्युपगम्यते सार्वज्ञ्यसर्वशक्तित्वविश्वावभासकत्वादिसद्गुणाश्च अवगन्तव्याः प्रामाणिकत्वाविशेषात्, तथा रूपपरिजनादीन्यपीत्यर्थः। सकलेतरविलक्षण इत्यनेन प्रकृतिप्राकृतवैलक्षण्यं प्राकृतेषु पदार्थेषु चतुर्मुखादीनामप्यभिमानोऽस्तीति तद्व्यावृत्त्यर्थं स्वासाधारण इत्युक्तम्। इयत्ताराहित्यम्, औज्ज्वल्यादिगुणोत्कर्षश्च अनिर्देश्येत्यादिपदेनोक्तं,तत्रायमपि चोद्यपरिहारोऽर्थात्सिद्धः ।

निर्देशादेव तथैव सन्तीत्यवगम्यते—यथाऽऽह भाष्य*कारः—यथाभूतवादि हि शास्त्रमिति, एतदुक्तं भवति यथा सत्यं ज्ञानमनन्तं ब्रह्मेति निर्देशात्परमात्मस्वरूपं समस्तहेयप्रत्यनीकानवधिकानन्दैकतानतयाऽपरिच्छेद्यतया च सकलेतरविलक्षणं तथा यस्सर्वज्ञः सर्व-

* द्रमिडाचार्यः ।

वित् पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीत्यादिनिर्देशान्निरतिशयासङ्ख्येयाश्च गुणाः सकलेतरविलक्षणाः, तथा आदित्यवर्णमित्यादिनिर्देशात् रूपपरिजनस्थानादयश्च सकलेतरविलक्षणाः स्वासाधारणाः अनिर्देश्यस्वरूपस्वभावा इति वेदाः प्रमाणं चेद्विध्यर्थवादमन्त्रगतं सर्वमपूर्व्वमविरुद्धमर्थजातं यथाऽवस्थितमेव बोधयन्ति, प्रामाण्यं च वेदानाम् औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः—इत्युक्तं, यथाऽग्निजलादीनामौष्ण्यादिशक्तियोगः स्वाभाविकः, यथा च चक्षुरादीनामिन्द्रियाणां बुद्धिविशेषजननशक्तिः स्वाभाविकी, तथा शब्दस्यापि बोधनशक्तिः स्वाभाविकी, न च हस्तचेष्टादिवत्सङ्केतमूलं शब्दस्य बोधकत्वमिति वक्तुं युक्तमनाद्यनुसन्धानाविच्छेदेऽपि

रूपस्य भोग्यतमत्वे स्वरूपस्य निरतिशयभोग्यत्ववैकल्यं स्यादिति चेन्न स्वरूपस्य भोग्यतमत्वं स्वसम्बन्धिनोऽपि भोग्यतमत्वावहमिति स्वरूपभोग्यतमत्वपूर्तिरेवेति अर्थवादादेः स्वार्थे तात्पर्याभावात् ब्रह्म स्वरूपमपि नाभ्युपेतमिति पूर्व्वमीमांसकशङ्कायामाह वेदाः प्रमाणञ्चेदिति, अपूर्व्वाविरुद्ध—शब्दाभ्यां साधकबाधकाभावोऽभिप्रेतः प्रामाण्य चेति चोदनासूत्रेऽपि अवधारणद्वयमस्ति चोदनैव प्रमाणं प्रमाणमेव चोदनेति प्रथमावधारणं प्रत्यक्षसूत्रे उपपादितं, द्वितीयावधारणम् औत्पत्तिकसूत्रप्रतिपाद्यमित्यर्थः । औत्पत्तिकः सत्ताप्रयुक्तः—नित्य इत्यर्थः । स्वाभाविकत्वं विवृणोति यथेति, स्पष्टं बोधव्यतिरिक्तकार्यकरत्वशक्तिः स्वाभाविकी बोधकार्यकरत्वं तु न स्वाभाविकमिति विभागमाशङ्क्य

तत्परिहारायाह यथा चेति, हस्तचेष्टादिवद् बोधकत्वाच्छब्दस्य सङ्केतितत्वं स्यादित्यत्राह अनादीति, अनुसन्धानविच्छेदात्

सङ्केतयितृपुरुषाज्ञानात् यानि सङ्केतमूलानि तानि सर्वाणि साक्षाद्वा परम्परया वा ज्ञायन्ते, न च देवदत्तादिशब्दवत्कल्पयितुं युक्तं तेषु च साक्षाद्वा परम्परया वा सङ्केतो ज्ञायते, गवादिशब्दानां त्वनाद्यनुसंधानाविच्छेदेऽपि संकेतयि*अज्ञानादेव बोधकत्वशक्तिः स्वाभाविकी अतोऽग्न्यादीनां दाहकत्वादिशक्तिवदिन्द्रियाणां बोधकत्वशक्तिवच्च शब्दस्यापि बोधकत्वशक्तिराश्रयणीया ।

तत्संङ्केतयितृपुरुषाज्ञानमिति शङ्कापरिहारार्थमनाद्यनुसन्धानाविच्छेदेऽपीत्युक्तं, सङ्केतयितृपुरुषज्ञानं सङ्केतमूलत्वे प्रयोजकं, न बोधकत्वे इत्यर्थः । एवं बोधकत्वात्सङ्केतमूलत्वमाशङ्क्य परिहृतं, शब्दत्वाद्देवदत्तादिशब्दवत्साङ्केतिकत्वमाशङ्क्य परिहरति न चेति, अत्र शङ्कामुखभेद एव परिहारस्तुल्यः अत इत्यादि स्पष्टं, बोधकत्वं स्वाभाविकं चेद् व्युत्पत्तिग्रहणसापेक्षत्वमयुक्तम् अतः साङ्केतिकमिति शङ्कायामाह गृहीतसम्बन्धस्येति, सम्बन्धग्रहणमपि सामग्र्यन्तर्भूतं यथा चक्षुरादेरालोकाद्यपेक्षत्वं न बोधकत्वशक्तिविरोधि तस्मात्स्वाभाविकी बोधकत्वशक्तिरित्यर्थः । सम्बन्धग्रहणसापेक्षत्वाच्छब्दोऽपि लिङ्गं स्यादिति चेन्न जन्यजनकभावादिसम्बन्धान्तरज्ञानसापेक्षं लिङ्गं शब्दार्थयोर्बोध्यबोधकभावसम्बन्ध एव ज्ञातव्य इति लिङ्गशब्दयोर्भेदः सर्वशब्दानां बोधकत्वशक्तिः स्वाभाविकीति चेत् लौकिकवैदिकविभागः कथमित्यत्राह एवमिति, स्मृतिपूर्व्वकत्वेऽप्युच्चारणस्य पुरुषाधीनत्वात् कथं वेदस्यापौरुषेयत्वं स्यादित्यत्राह एतदिति, अपौरुषेयत्वं—पुरुषबुद्धिमूलत्वाभावः, नित्यत्वं—सर्वकालसम्बन्धित्वं पदनित्यत्वं वर्णनित्यत्वं वा नापौरुषेयत्वे प्रयोजकं तथा सति कालिदासादिग्रन्थानामपि अपौरुषेयत्वप्रसङ्गात्, तस्मात् अनाद्यानुपूर्व्वीविशेषविशिष्टत्वेन

* संकेताज्ञानादिति पा॰ ।

ननु च इन्द्रियवच्छब्दस्यापि बोधकत्वं स्वाभाविकं संबन्धग्रहणं बोधकत्वाय किमित्यपेक्षते—लिङ्गवदित्युच्यते, यथा ज्ञातसंबन्धनियमं धूमादि अग्न्यादिविज्ञानजनकं तथा ज्ञातसंबन्धनियमः शब्दोऽप्यर्थविशेषबुद्धिजनकः । एवं तर्हि शब्दोऽप्यर्थविशेषस्य लिङ्गमित्यनुमानमेव स्यात्, मैवं शब्दार्थयोः संबन्धो बोध्यबोधकभाव एव, धूमादीनां तु संबन्धान्तरमिति तस्य संबन्धस्य ज्ञानद्वारेण बुद्धिजनकत्वमिति विशेषः । एवं गृहीतसंबन्धस्य बोधकत्वदर्शनादनाद्यनुसन्धानाविच्छेदेऽपि सङ्केताज्ञानात् बोधकत्वशक्तिरेवेति निश्चीयते । एवं बोधकानां पदसंघातानां संसर्गविशेषबोधकत्वेन वाक्यशब्दाभिधेयानामुच्चारणक्रमो यत्र पुरुषबुद्धिपूर्वकः ते पौरुषेयाः शब्दा इत्युच्यन्ते, यत्र तु तदुच्चारणक्रमः पूर्वपूर्वोच्चारणक्रमजनितसंस्कारपूर्वकः सर्वदा ऽपौरुषेयास्ते च वेदा इत्युच्यन्ते, एतदेव वेदानामपौरुषेयत्वं नित्यत्वं च—यत्पूर्वपूर्वोच्चारणक्रमजनितसंस्कारेण तमेव क्रमविशेषं

पश्चादप्युच्चार्यमाणत्वमपौरुषेयत्वं नित्यत्वं चेत्यर्थः । तर्ह्युपबृंहणापेक्षा कथमित्यत्राह ते चेति, आनन्त्येन दुर्ग्रहत्वादुपबृंहणापेक्षा न त्वनित्य*त्वमित्यर्थः । नानन्त्यम् ऋग्यजुःसामाथर्वणरूपेण संख्यातत्वादिति चेन्न ऋग्यजुःसामादिकोटिचतुष्टयान्तर्भावेऽप्येकैककोटौ शाखाद्वाराऽऽनन्त्यमित्यर्थः । ते च विध्यर्थेति, तत्र विधिभाग एवाऽपौरुषेयः । अर्थवादादयः पौरुषेया इति विभागश्चेदर्थवादादीनां स्वार्थे प्रामाण्यं न

* न त्वनित्यतयेत्यर्थः ।

स्यात् न च तथाऽस्ति, अतोऽपौरुषेयतया प्रमाणत्वाविशेषादर्थवादाद-योऽपि स्वार्थप्रतिपादका इति सर्वार्थसिद्धिरित्यर्थः । लोके सिद्धवस्तुपर-शब्दानां प्रतिपाद्यात् पश्चात्तनत्वं दृष्टं तस्मात्सिद्धवस्तुपरत्वे वेदानाम-नादित्वहानिरिति तत्राह परमपुरुषवदिति, यथा जातिवाचित्वेन व्रीह्या-दिशब्दानां जातेश्च नित्यत्वात् तेषां न नित्यत्वहानिरभ्युपेता । एवं प्रतिपाद्यप्रतिपादकयोरुभयोरप्यनादित्वमभ्युपपन्नमित्यर्थः ।

स्मृत्वा तेनैव क्रमेणोच्चार्यमाणत्वं, ते चानुपूर्वीवि-शेषेण संस्थिता अक्षरराशयो वेदा ऋग्यजुःसामा-थर्वभेदभिन्ना अनन्तशाखा वर्तन्ते, ते च विध्यर्थवा-दमन्त्ररूपा वेदाः परब्रह्मभूतनारायणस्वरूपं तदारा-धनप्रकारम्, आराधितात्फलविशेषं च बोधयन्ति, परमपुरुषवत्तत्स्वरूपतदाराधनतत्फलज्ञापकवेदाख्य-शब्दजातं नित्यमेव, वेदानामनन्तत्वाद्दुरवगाहत्वाच्च परमपुरुषनियुक्ताः परमर्षयः कल्पेकल्पे निखिलज-गदुपकारार्थं वेदार्थं स्मृत्वा विध्यर्थवादमन्त्रमूलानि धर्म्मशास्त्राणीतिहासपुराणानि च चक्रुः ।

पूर्व्वमानन्त्यं प्रपञ्चितं तेनोपबृंहणमपेक्षितमित्युक्तम् । इदानीं दुरवगा-हत्वात् तदपेक्षितमित्याह वेदानामिति, दुरवगाहत्वम् अधीयमानशाखा-नामपि दुरवबोधार्थत्वेन धर्म्मशास्त्राणि पूर्व्वभागोपबृंहणानि उपनिषदु-पबृंहणानीतिहासपुराणानि, व्युत्पन्नलौकिकशब्दस्य वैदिका न बोधकाः स्युरित्यत्राह लौकिकाश्चेति,—नामरूपं च भूतानांकृत्यानांच प्रपञ्चनम् । वेद-शब्देभ्य एवादौ देवादीनां चकार सः ॥ इत्यादिवचनात् वेदशब्दा एव लौकिकैः प्रयुज्यन्त इति लौकिकवैदिकशब्दाभेदाद् बोधका इत्यर्थः । लक्ष-णभेदाच्छब्दभेद इति चोदयति ननु चेति, परिहरति उच्यत इति, आनुपूर्वी-भेदकृतो लक्षणभेदः । न तु शब्दभेदकृत इत्यर्थः । एतस्मिन्प्रकरणे विस्तरेण

प्रतिपादितानामर्थानां सुग्रहत्वायोक्तार्थजातं संग्रहेणानुक्रमते एवमित्यादिना, परब्रह्मनारायण-शब्दौ सामान्यविशेषशब्दौ निखिलहेयमित्यादिनोभयलिङ्गत्वमुक्तम्। विभूतिमत्त्वमाह स्वसङ्कल्पेति, नित्यविभूतिमत्त्वमाह

लौकिकाश्च शब्दा वेदराशेरुद्धृत्यैव तत्तदर्थविशेषनामतया पूर्ववत्प्रयुक्ताः पारम्पर्येण प्रयुज्यन्ते । ननु च वैदिका एव सर्वे वाचकाः शब्दाश्चेच्छन्दस्येवं भाषायामेवमिति लक्षणभेदः कथमुपपद्यते—उच्यते तेषामेव शब्दानां तस्यामेवानुपूर्व्यां वर्तमानानां तथैव प्रयोगः, अन्यत्र प्रयुज्यमानानामन्यथेति न कश्चिद्दोषः। एवमितिहासपुराणधर्मशास्त्रोपबृंहितसाङ्गवेदवेद्यः परब्रह्मभूतो नारायणो निखिलहेयप्रत्यनीकः सकलेतरविलक्षणोऽपरिच्छिन्नज्ञानानन्दैकस्वरूपः स्वाभाविकानवधिकातिशयासङ्ख्येयकल्याणगुणाकरः स्वसङ्कल्पानुविधायिस्वरूपस्थितिप्रवृत्तिभेदचिदचिद्वस्तुजातोऽपरिच्छेद्यस्वरूपस्वभावानन्तमहाविभूतिर्नानाविधानन्तचेतनाचेतनात्मकप्रपञ्चलीलोपकरण इति प्रतिपादितं, सर्वं खल्विदं ब्रह्म ऐतदात्म्यमिदम्

अपरिच्छेद्येति अपरिच्छेद्यस्वरूपस्वभाव-शब्देनेयत्तारहित्यमौज्ज्वल्यादिगुणोत्कर्षश्च विवक्षितः। अनन्त-शब्देन नित्यत्वं विवक्षितं, तद्गतपदार्थानन्त्यं वा, महाविभूतिरिति भोग्यविभूतिरुच्यते शुद्धे महाविभूत्याख्ये इति वचनात् । लीलाभूतिमत्त्वमाह नानाविधेति, एवं सर्वविलक्षणत्वमुक्तं तर्हि कथमैक्यश्रुतिरित्यत्राह सर्वं खल्विति, त्वं यज्ञ इत्यादिश्लोकानन्तरभावित्वाज्जगत्सर्वं शरीरं ते इति श्लोक उदाहृतः। अनेन सामानाधिकरण्यस्यार्थः स्पष्टो भवति, कारणावस्थायामेकत्वावधारणाच्छरीरात्मभावस्तदानीं नोपपद्यत इति स्वरूपैक्यनि-

बन्धनमेव सामानाधिकरण्यमित्यत्राह सत्यसङ्कल्पमिति, न हि सत्यसङ्कल्पं ब्रह्मस्वरूपमेव स्वर्गनरकादिभाग् भवति ।

सर्वं तत्त्वमसि श्वेतकेतो एनमेके वदन्त्यग्निं मरुतोऽन्ये प्रजापतिं इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतं ज्योतींषि शुक्लानि च यानि लोके त्रयोलोकालोकपालास्त्रयी च त्रयोऽग्नयश्चाहुतयश्च पञ्च सर्वे देवा देवकीपुत्र एव, त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारः परन्तपः, ऋतुधामा वसुः पूर्व्वो वसूनान्त्वं प्रजापतिः जगत्सर्वं शरीरं ते स्थैर्यन्ते वसुधातलम् । अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षणः ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयोदिशश्च । नद्यस्समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य! ॥ इत्यादिसामानाधिकरण्यप्रयोगेषु सर्वैः शब्दैः सर्वशरीरतया सर्वप्रकारं ब्रह्मैवाभिधीयत इति चोक्तं, सत्यसङ्कल्पं परं ब्रह्म स्वयमेव बहुप्रकारं स्यामिति सङ्कल्प्याचित्समष्टिरूपमहाभूतसूक्ष्मवस्तु भोक्तृवर्गसमूहं च

अत उभयविल*क्षणमेव ब्रह्मेति सत्यसङ्कल्पशब्दाभिप्रायः, बहुप्रकारं स्यामित्यनेन बहु स्यामित्येतद्व्याख्यातम् । अचित्समष्टिरूपमहाभूतसूक्ष्ममिति महदाद्यपेक्षया प्रकृतिस्समष्टिस्सैव महाभूतसूक्ष्ममिति व्याख्यानव्याख्येयभावः। भोक्तृवर्गसमूहं चेति, अनेन यतः प्रधानपुरुषावित्यत्र पुरुषशब्दो व्याख्यातः पुरुषशब्दो नैकजीवपरः अपि तु जीवसमष्टिपर इत्यर्थः । स्वस्मिन्प्रलीनं स्वयमेव विभज्येति एकीभूतमव्यक्तावस्थं व्यक्तं कृत्वेत्यर्थः । तस्मादिति सृष्ट्वेति समष्टितत्त्वसृष्टिरुक्ता । जीवानामचित्संसर्गस्य अनादि-

* अतोविलक्षणमेव ब्रह्मेति पा० ।

त्वात् तद्व्यावृत्त्यर्थमात्मतयेत्युक्तं, व्यष्टिदेहाभिमानितया प्रवेश्येत्यर्थः । व्यष्टिसृष्टिरुच्यते तैरिति, चिदधिष्ठितैः–चित्संसृष्टैरित्यर्थः । पुरुषाधिष्ठितत्वाच्चाव्यक्तानुग्रहेण च महदादयो विशेषान्ता ह्यण्डमुत्पादयन्ति ते । इति

स्वस्मिन् प्रलीनं स्वयमेव विभज्य तस्माद्भूतसूक्ष्माद्वस्तुनो महाभूतानि सृष्ट्वा तेषु च भोक्तृवर्गमात्मतया प्रवेश्य तैश्चिदधिष्ठितैर्महाभूतैरन्योन्यसंसृष्टैः कृत्स्नं जगद्विधाय स्वयमपि सर्वस्यात्मतया प्रविश्य परमात्मत्वेनावस्थितं सर्वशरीरं बहुप्रकारमवतिष्ठते, यदिदम्महाभूतसूक्ष्मं वस्तु तदेव प्रकृति–शब्देनाभिधीयते, भोक्तृवर्गसमूह एव पुरुष–शब्देन चोच्यते, तौ च प्रकृतिपुरुषौ परमात्मशरीरतया परमात्मप्रकारभूतौ तत्प्रकारः परमात्मैव प्रकृतिपुरुषशब्दाभिधेयः

अत्र पुरुषाधिष्ठितशब्दस्य चित्संसृष्टतापरत्वज्ञापनाय चिदधिष्ठितैरित्युक्तम्, । अन्योन्यसंसृष्टैरिति पञ्चीकरणं विवक्षितं, कृत्स्नं जगदिति ब्रह्माण्ड–तदन्तर्गतभोक्तृभोगोपकरणभोगस्थानदेव मनुष्यादिव्यष्टिजातमुच्यते, प्रविश्येति तदवस्थचिदचिन्नियन्तृतयाऽवस्थानमुच्यते, प्रवेश्य प्रविश्येति पदाभ्यां जीवप्रवेशस्य पराधीनत्वं, परात्मप्रवेशस्य स्वेच्छाकृतत्वं च दर्शितं, तत्र प्रवेश्य–विधाय प्रविश्येति ल्यबन्तपदानां न पौर्वापर्यविवक्षा, अपि तु कार्यभेदमात्रविवक्षैव तस्य त्वष्टा विदधद्रूपमेतीत्यादिश्रुत्यविरोधात्, परमात्मत्वेनावस्थितमिति अप्रच्युतस्वरूपमवस्थितमित्यर्थः । पूर्ववाक्ये गर्भितमर्थं विवृणोति यदिदमिति, ब्रह्मणश्चिदचिद्विलक्षणत्वे तयोरपि भेदे ब्रह्मणस्तदनुप्रवेशकृततत्तन्नामभाक्त्वे च श्रुतिमाह सोऽकामयतेति, एवं सिद्धवस्तुविषयसंग्रहः कृतः । अथोपायविषयं वक्तव्यमाह ब्रह्मेति, भक्तिनिष्ठा–भक्तियोगाभ्यासः तेन साध्या परभक्तिः प्राप्तिपूर्वावस्था तर्हि ज्ञानस्य कथं मोक्षोपायत्वमित्यत्राह–

सोऽकामयत बहु स्यां प्रजायेयेति तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवदिति पूर्वोक्तं सर्वमनयैव श्रुत्या व्यक्तं, ब्रह्मप्राप्त्युपायश्च शास्त्राधिगततत्त्वज्ञानपूर्व्वकस्वकर्म्मानुगृहीतभक्तिनिष्ठा—साध्यानवधिकातिशयप्रियविशदतमप्रत्यक्षतापन्नानुध्यानरूपपरभक्तिरेवेत्युक्तं, भक्ति—शब्दश्च प्रीतिविशेषे वर्तते, प्रीतिश्च ज्ञानविशेष एव । ननु च सुखं प्रीतिरित्यनर्थान्तरं, सुखं च ज्ञानविशेषसाध्यं पदार्थान्तरमिति हि लौकिकाः, नैवं येन ज्ञानविशेषेण तत्साध्यमित्युच्यते स एष ज्ञानविशेषः सुखम् । एतदुक्तं भवति

भक्तिशब्दश्चेति, प्रीतिविशेष—शब्देन स्वामिनि भृत्यस्यानुरागो विवक्षितः । ततः* किमित्यत्राह प्रीतिश्चेति, तत्र वैशेषिकमतेन चोदयति नन्विति, परिहरति नैवमिति, व्याहतमिदं ज्ञानसाध्यं सुखं ज्ञानमेवेति, न हि दण्डचक्रादिरेव घट इत्यत्राह एतदुक्तम्भवतीति, सुखदुःखमध्यस्थशब्दा अनुकूलप्रतिकूलानुभयरूपविषयवाचिनः तेषां साधारणानीत्यर्थः । तथाभवन्ति सुखं दुःखमनुभयं च भवन्तीत्यर्थः । ज्ञानमेव सुखं स्यादित्यत्राह येनेति, ज्ञानं सुखजनकं चेद्घटज्ञानमपि सुखजनकं स्यात् नैवं स्रक्चन्दनादिविषयविशेषज्ञानं सुखजनकमिति चेत्स्रक्चन्दनादिविषयं ज्ञानमेव सुखमिति न दोष इत्यर्थः । ज्ञानातिरेकि सुखं किं दृष्टम् उत कल्प्यमिति विकल्प्य दूषणमाह तदतिरेकीति, पदाऽर्थान्तरानुपलब्धेरित्यर्थः । द्वितीयं शिरो दूषयति, तेनैवेति, तेनैव—विशेषविशेषितज्ञानेनैवेत्यर्थः । ततः किं प्रस्तुतोपासनस्य अनवधिकातिशयप्रीतिरूपत्वे इत्यत्राह एवं विधेति, ब्रह्मव्यतिरिक्तस्य वस्तुनः

विषयज्ञानानि सुखदुःखमध्यस्थसाधारणानि तानि च विषयाधीनविशेषाणि तथा भवन्ति येन च विषयविशेषेण विशेषितं ज्ञानं सुखस्य जनकमित्यभिमतं तद्विषयं ज्ञानमेव सुखं तदतिरेकि पदार्थान्तरं नोपलभ्यते। तेनैव सुखित्वव्यवहारोपपत्तेश्च, एवंविधसुखरूपज्ञानस्य विशेषकत्वं ब्रह्मव्यतिरिक्तस्य वस्तुनः सातिशयमस्थिरं च, ब्रह्मणस्त्वनवधिकातिशयं स्थिरं चेति आनन्दो ब्रह्मेत्युच्यते विषयायत्तत्वात् ज्ञानस्य सुखरूपतया ब्रह्मैव सुखं तदिदमाह रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दीभवतीति ब्रह्मैव सुखमिति ब्रह्म लब्ध्वा सुखी भवतीत्यर्थः ।

एवं विधसुखरूपज्ञानविशेषकत्वमनुकूलत्वमल्पमस्थिरं च ब्रह्मणस्त्ववधिकातिशयं स्थिरं चानुकूलत्वमित्यर्थः । तत्र श्रुतिमाह आनन्दो ब्रह्मेतीति, । ननु आनन्द-शब्दस्य सुखपर्यायत्वादनुकूलविषयज्ञानस्य सुखशब्दवाच्यत्वोपपादनाच्च आनन्दो ब्रह्मेति ब्रह्मणः सुखत्ववचनमयुक्तमित्यत्राह विषयेति, । अयमर्थः आत्माऽनुकूलं सुखम् इत्यानुकूल्यं हि सुखशब्दप्रवृत्तिनिमित्तं तच्च ज्ञानस्य विषयानुकूल्यप्रयुक्तमिति विषयस्य स्वतोऽनुकूलस्य सुख-शब्दवाच्यत्वं युक्तमित्यर्थः । ज्ञानानुकूलत्वस्य विषयानुकूल्यप्रयुक्तत्वे श्रुतिमाह तदिदमिति, अस्यां श्रुतौ ब्रह्मणः सुखरूपत्वाप्रतीतेस्तां व्याचष्टे ब्रह्मैवेति, तच्छब्दः कारणतया प्रकृतब्रह्मपरामर्शीत्यर्थः । अत्र सुखवाची शब्दः कः, लोके यो यस्य सुखं भवति तत्र स्वस्यापि सुखं भवति, एवं परस्य भोग्यं ब्रह्म न स्वभोग्यमित्यत्राह परमपुरुष इति, स्वयं-स्वस्मै इत्यर्थः । सुखरूपत्वाविशेषादिति स्वपरविभागरहितमानन्दो ब्रह्मेत्यविशेषेणानन्दत्वकथना-

दित्यर्थः । तर्हि रसो वै सः रसं ह्येवायं लब्ध्वाऽनन्दी भवति इति परं प्रत्यानन्दत्वश्रवणं कथमित्यत्राह ब्रह्म यस्येति, ब्रह्म परस्य ज्ञानविषयश्चेत्तस्य सुखं भवति स्वस्य ज्ञानविषयत्वे स्वस्य सुखं भवति ।

परमपुरुषः स्वेनैव स्वयमनवधिकातिशयसुखस्सन् परस्यापि सुखं भवति, सुखरूपत्वाविशेषात्, ब्रह्म यस्य ज्ञानविषयो भवति स सुखी भवतीत्यर्थः । तदेवं परस्य ब्रह्मणोऽनवधिकातिशयासङ्ख्येयकल्याणगुणगणाकरस्य निरवद्यस्यानन्तमहाविभूतेरनवधिकातिशयसौ*शील्यसौन्दर्यवात्सल्यजलधेः सर्वशेषित्वादात्मनः शेषत्वात्प्रतिसम्बन्धितयाऽनुसन्धीयमानमनवधिकातिशयप्रीतिविषयः सत्

अतो यस्य ज्ञानविषयभूतं ब्रह्म अविशेषेण तस्य तत्सुखमिति जीवस्यापि सुखरूपं भवतीति अस्याः श्रुतेरर्थ इत्यर्थः । प्रीतिविशेष–शब्देन अभिहितमर्थं† विवृणोति तदेवमिति, महाविभूतेरित्यन्तेन परत्वोपयोगिगुणजातमुक्तम् । अनवधिकेत्यनेन सौलभ्योपयोगिगुण उक्तः । प्रीतिविषयमिति स्वदास्यानुसन्धानगर्भा प्रीतिर्विवक्षिता । एवं विधप्रीतिरूपज्ञानविषयभूतं ब्रह्म स्वप्राप्त्युपायभूतमित्यर्थः । अपुरुषार्थत्वापादनमुखेन चोदयति ननु चेति, अत्यन्तेत्यादि स्पष्टं । सर्वलोकविरुद्धत्वमुपपादयति तथा हीति, तदिदमित्यादिना परिहरति देहात्माभिमानविजृम्भितत्वमुपपादयति तथा हीति, सुखत्वदुःखत्वे च न स्वातन्त्र्यपारतन्त्र्यप्रयुक्ते अपि तु कर्मकृतदेहात्माभिमानप्रयुक्ते इति सोपाधिकत्वं दूषणं वक्ष्यन् विपरीतात्माभिमानं दर्शयति शरीरं हीति, ततः किमित्यत्राह आत्माभिमान इति, आत्माभिमानानुगुणपुरुषार्थप्रतीतावुदाहरणमाह सिंहव्याघ्रेति, परस्परविरुद्धानीति, परस्परविरुद्धेषु सुखदुःखेषु तत्तदसाधारणं प्रयोजकं न भवति व्यभिचारात् तस्मादनुयायिप्रयोजकं विपरीतात्माभिमानानुरूपमित्यभिप्रायः ।

* सौशील्येति पा० । † अभिप्रेतमर्थमिति पा० ।

परं ब्रह्मैवैनमात्मानं प्रापयतीति । ननु चात्यन्तशेषतैवात्मनोऽनवधिकातिशयं सुखमित्युक्तं भवति, तदेतत्सर्वलोकविरुद्धं, तथा हि सर्वेषामेव चेतनानां स्वातन्त्र्यमेवेष्टतमं दृश्यते पारतन्त्र्यं दुःखतरं, स्मृतिश्च—सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् । तथा च—सेवा श्ववृत्ति*र्व्याख्याता तस्मात्तां परिवर्जयेत् । इति तदेतदनधिगतदेहातिरिक्तात्मस्वरूपाणां शरीरात्माभिमानविजृम्भितं, तथा हि शरीरं हि मनुष्यत्वादिजातिगुणाश्रयपिण्डभूतं स्वतन्त्रं प्रतीयते तस्मिन्नेवाहमिति संसारिणां प्रतीतिः, आत्माभिमानो यादृशः

सोपाधिकत्वमुपसंहरति तस्मादिति, आत्मानुकूलं सुखमात्मप्रतिकूलं दुःखमिति सुखदुःखलक्षणं, तस्मात्स्वतन्त्रतयाऽऽत्माभिमाने प्रतिकूलत्वात् पारतन्त्र्यं दुःखं भवति न तु पारतन्त्र्यादित्यर्थः । कथं समाहितमित्यत्राह आत्मस्वरूपं त्विति, । ज्ञानैकाकारत्वे परशेषतैकस्वरूपत्वे च प्रमाणमाह आत्मा ज्ञानमय इति, अत इत्यादि स्पष्टम् । एवं सोपाधिकत्वं कण्ठोक्तम् अनैकान्त्यं च लोकसिद्धमित्यनुक्तं केवलमुपायतया स्वीकृतं पतिपारतन्त्र्यमेवापुरुषार्थः भोग्यतमत्वेन स्वीकृतं पतिपारतन्त्र्यं पुरुषार्थ एव लोके दृश्यते इति । किञ्च कालात्ययापदिष्टश्चाभिप्रेतः, तथा हि भगवत्पारतन्त्र्यस्य दुःखरूपत्वं साध्यते किमितरपारतन्त्र्यस्य, इतरस्य चेत्साध्यतां, भगवत्पारतन्त्र्यस्य दुःखरूपत्वं केन प्रमाणेन साध्यते न तावत्प्रत्यक्षादिना तदगोचरत्वात्, आगमैस्तु भगवत्पारतन्त्र्यं सुखरूपमेवावगम्यत इति पारतन्त्र्यसाम्याल्लोकसिद्धपारतन्त्र्यं सपक्षीकृत्य दुःखरूपत्वं साध्यते चेदत्र किमागममभ्युगम्य साध्यते, उतानभ्युपगम्य अनभ्युपगमे आश्रयासिद्धिः ।

तदनुगुणैव पुरुषार्थप्रतीतिः सिंहव्याघ्रवराहमनुष्ययक्षरक्षःपिशाचदेवदानवस्त्रीपुंसव्यवस्थितात्माभिमानानां सुखानि व्यवस्थितानि, तानि च परस्पर-

* श्ववृत्तिराख्यातेति पा० ।

विरुद्धानि, तस्मादात्माभिमानानुगुणपुरुषार्थव्यवस्थया सर्वं समाहितम् ।

आत्मस्वरूपं तु देवादिदेहविलक्षणं ज्ञानैकाकारं तच्च परशेषतैकस्वरूपं, यथाऽवस्थितात्माभिमाने तदनुगुणैव पुरुषार्थप्रतीतिः, आत्मा ज्ञानमयोऽमलः इति स्मृतेर्ज्ञानैकाकारता पुरुषार्थता प्रतिपन्ना, पतिं विश्वस्येत्यादिश्रुतिगणैः परमात्मशेषतैकाकारता च प्रतीता । अतस्सिंहव्याघ्रादिशरीरात्माभिमानवत् स्वातन्त्र्याभिमानोऽपि कर्म्मकृतविपरीतात्मज्ञानरूपो वेदितव्यः । अतः कर्म्मकृतमेव परमपुरुषव्यतिरिक्तविषयाणां सुखत्वम् । अत एव तेषामल्पत्वमस्थिरत्वं च परमपुरुषस्यैव स्वत एव सुखत्वम् । अतस्तदेव स्थिरमनवधिकातिशयं च, कं ब्रह्म खं ब्रह्म आनन्दो ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेः, ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य वस्तुनः स्वरूपेण सुखत्वाभावः कर्म्मकृतत्वेन चास्थिरत्वं भगवता पराशरेणोक्तं—नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम ! । वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च । कोपाय च यतः

अभ्युपगम्य चेद्धर्म्मिग्राहकप्रमाणबाध इत्यभिप्रेतं दूषणं, परशेषतैकस्वरूपत्वे पतिं विश्वस्येत्यादिप्रमाणतया भाष्यकारेणाभिप्रेतं भगवत्पारतन्त्र्यं सुखरूपमस्तु विपरीतात्माभिमानेऽपि सुखमनुभूयते चेत् किं ब्रह्मप्राप्त्येत्यत्राह अतः कर्म्मकृतमेवेति, इतरसुखानां कर्म्मकृतत्वात्तत्तारतम्यानुगुणे तदल्पत्वास्थिरत्वे च स्वाभाविकसुखरूपत्वाद् ब्रह्मणोऽनन्तत्वास्थिरत्वे इत्यर्थः । अत्र प्रमाणमाह कं ब्रह्मेति, ब्रह्मणोऽपरिमितसुखत्वश्रुतिवत्का व्यतिरिक्तसुखास्थिरत्वादिके प्रमाणं श्रीविष्णुपुराणवचनमाह ब्रह्मेति, पापपुण्ये—पापपुण्यकृते इत्यर्थः । वस्तु वस्त्वात्मकं कुत इत्येतद्

व्याचष्टे सुखदुःखादीति, तस्माद्दुःखात्मकं नास्ति न च किञ्चित् सुखात्मकमित्यत्रापि कथनादत्राप्येकान्तसुखतया वस्तुत्वमेकान्तदुःखतया वस्तुत्वं च न *सिद्धमिति भावः । सुखाद्येकान्तत्वप्रतीतिः कथमित्यत्राह तदेकान्तेति,

तस्माद्वस्तु वस्त्वात्मकं कुतः । सुखदुःखाद्येकान्तरूपिणो† वस्तुनो वस्तुत्वं कुतः तदेकान्तता पुण्यपापकृतेत्यर्थः । एवमनेकपुरुषापेक्षया कस्यचित्सुखमेव कस्यचिद्दुःखं भवतीति व्यवस्थां प्रतिपाद्य एकस्मिन्नपि पुरुषे न व्यवस्थितमित्याह—तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते । तदेव कोपाय यतः प्रसादाय च जायते ॥ तस्माद्दुःखात्मकं नास्ति न च किञ्चित्सुखात्मकम् ॥ इति, सुखदुःखात्मकत्वं सर्वस्य वस्तुनः कर्म्मकृतं न वस्तुस्वरूपकृतम्, अतः कर्म्मावसाने तदपैतीत्यर्थः । यत्तु सर्वं परवशं दुःखमित्युक्तं तत्परमपुरुषव्यतिरिक्तानां परस्परशेषशेषिभावाभावात् तद्व्यतिरिक्तं प्रति शेषता दुःखमेवेत्युक्तम् ।

उक्तवक्ष्यमाणश्लोकयोरपौनरुक्त्यार्थमाह एवमिति, एकस्मिन्नपि पुरुषे न व्यवस्थितमिति कालभेदेनेत्यध्याहारः । उदाहृतश्लोकार्थमाह सुखदुःखात्मकत्वमिति, । फलितमर्थमाह अत इति, पूर्वपक्षोक्तग्रन्थार्थमाह यत्त्विति, परस्परं शेषशेषिभावाभावादिति स्वभावतोऽभावादित्यर्थः । सेवेत्यादि स्पष्टं, कथमस्य वचनस्यापसेवाविषयत्वमित्यत्राह स हीति, तद्व्याचष्टे सर्वैरिति, भगवद्वचनमाह यथोक्तमिति, कथं सेवाया मोक्षोपायत्वं ज्ञानं हि मोक्षोपाय इत्यत्राह इयमेवेति,-भज इत्येष धातुर्वै सेवायां परिकीर्तितः । तस्मात्सेवा बुधैः प्रोक्ता भक्तिशब्देन भूयसी ॥ इति भगवद्बोधायनवचनं, सेवा भक्तिरुपास्तिरिति निघण्टुः, तस्माद्भक्तिरूपसेवा वेदनादिशब्दवाच्येत्यर्थः । सेवा भक्तिरस्तु कथं वेदनादिशब्दवाच्या भक्तिरित्य-

* निषिद्धमिति ।

† एकान्तरूपेणेति पा ।

त्राह इयमेवेति, कथं शेषित्वमित्यत्राह यमेवेति, ततः किमित्यत्राह वरणीयश्चेति, प्रियतमश्च क इत्यत्राह यस्येति, तत्र भगवद्वचनमाह तदुक्तमिति, तस्मादिति, पुत्रत्वादिरूपेण भगवत्प्राप्तिर्दशरथादेरप्यस्तीति तद्व्यावृत्त्यर्थं तत्त्वत इत्युक्तम्,

सेवा श्ववृत्तिर्व्याख्याता इत्यत्राप्यसेव्यसेवा श्ववृत्तिरेवेत्युक्तं,—स ह्याश्रमैस्सदोपास्यस्समस्तैरेक एव चेति सर्वैरात्मयाथात्म्यवेदिभिः सेव्यः पुरुषोत्तम एक एव यथोक्तं भगवता—मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ इतीयमेव भक्तिरूपा सेवा ब्रह्मविदाप्नोति परं, तमेवं विद्वानमृत इह भवति, ब्रह्म वेद ब्रह्मैव भवतीत्यादिषु वेदन—शब्देनाभिधीयत इत्युक्तं, यमेवैष वृणुते तेन लभ्य इति विशेषणात् यमेवैष वृणुते इति भगवता वरणीयत्वं प्रतीयते वरणीयश्च प्रियतमः ।

यथावदनुभवसाधनमित्यर्थः । तत्र महाभारते वचनमाह यथोक्तमिति, न संदृशे तिष्ठतीत्यादिश्रुतिगणरूपत्वात्सर्वोपनिषद्व्याख्यानरूपमित्युक्तं, न संदृश इत्यादि पूर्वार्द्धं वेदे महाभारते च तुल्यं, भात्यनेनोत्तरार्द्धगतहृच्छब्दो व्याख्यात इति ज्ञायते, स्थानप्रमाणाद् धृतिरिन्द्रियाणां विषयवैमुख्यकरणम्, अनेन शमदमादय उपलक्षिताः । हृदा मनीषा मनसाऽभिक्लृप्तः भक्त्या शमदमादिना चान्वितेन मनसा सम्पद्यत इति तस्य वाक्यस्यार्थः । श्लोकमन्वयक्रमेण व्याचष्टे धृत्येति, । अन्वयक्रम एवमिति कथमवगम्यते इत्यत्राह भक्त्या त्विति, ततः किं वेदनादिशब्दैः भक्तेरभिधेयत्वे इत्यत्राह भक्तिश्च ज्ञानविशेष एवेति, भक्तिः—प्रीतिविशेषः प्रीतिश्च ज्ञानादनर्थान्तरमिति पूर्वमेवोक्तं, तस्मात्प्रीतिरूपा भक्तिर्ज्ञानविशेष इति। सर्वमुपपन्नमिति । स्वपक्षस्थापन—परपक्षप्रतिक्षेपरूपयोर्यत्प्रमाणजातमुक्तं तेनैवानुक्तमन्यदपि च वक्तव्यं सर्वं निर्वाह्यम् । अत्रैव कृत्स्नान्तर्भावादित्यर्थः । अस्य प्रबन्धस्यातिगम्भीरताप्रदर्शनार्थमाह सारासारेति, अनेन

सर्वजनापरिग्रहो न दोषः, अशिष्टपरिग्रह एव दोषः । तस्माद्विशिष्टजनपरिग्रह एव श्लाघ्यताहेतुरिति चोक्तं भवति, । सारासारविवेकज्ञाः परस्परविरुद्धानेकार्थेषु प्रतिपन्नेषु

यस्य भगवत्यनवधिकातिशया प्रीतिर्जायते स एव भगवतः प्रियतमः, तदुक्तं भग*वता—प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥ इति, तस्मात्परभक्तिरूपापन्नमेव वेदनं तत्त्वतोभगवत्प्राप्तिसाधनं, यथोक्तं भगवता द्वैपायनेन मोक्षधर्म्मे सर्वोपनिषद्व्याख्यानरूपं—न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् । भक्त्या च धृत्या च समाहितात्मा ज्ञानस्वरूपं परिपश्यतीह ॥ धृत्या समाहितात्मा भक्त्या पुरुषोत्तमं पश्यति—साक्षात्करोति प्राप्नोतीत्यर्थः । भक्त्या त्वनन्यया शक्य इत्यनेनैकार्थ्यात्, भक्तिश्च ज्ञानविशेष एवेति सर्वमुपपन्नम् ।

सारासारविवेकज्ञा गरीयांसो विमत्सराः ।
प्रमाणतन्त्राः सन्तीति कृतो वेदार्थसंग्रहः ॥

इति श्रीभगवद्रामानुजाचार्यविरचितो वेदार्थसंग्रहः समाप्तः ॥

श्रीपुराणपुरुषोत्तमोलक्ष्मीविलासलालसो गोपीजनस्वजनोराधासमाराधनव्यग्रो विजयतेतराम् ॥

तत्र प्रमाणतन्त्रैः प्राबल्यदौर्बल्यविभागविदः, गरीयांसः,—बहुश्रुताः, न बाहुश्रुत्याभावे तत्तच्छास्त्रोक्तानां प्राबल्यदौर्बल्यविभाग उपपद्यते । बहुश्रुतस्याप्यस्मिन् शास्त्रेऽयमर्थ उक्तः अन्यत्रान्यः किमत्र तत्त्वमिति व्यवस्थितिर्नास्तीति केचिन्मन्दधियो मन्यन्ते, अतः सारासारविवेकज्ञत्वमपेक्षितम् एवमुभयस्मिन्सत्यप्यस्मत्सवयसाऽनेनोक्तं कथं वयमङ्गीकुर्म इति मत्सरो-

* भगवतैवेति पा· ।

पहताश्चेदुभयमपि निष्फलमिति तद्व्यावृत्त्यर्थं विमत्सरा इत्युक्तम् । उक्त-विशेषणत्रयफलमाह प्रमाणतन्त्रा इति, ये प्रमाणानुसारिणः तदनुगुणैस्त-र्कैरर्थं निरूपयन्ति न तु स्वापेक्षितार्थे प्रमाणजातं क्लेशेन नयन्ति ते प्रमाणतन्त्राः । कालो ह्ययं निरवधिर्विपुला च पृथ्वीति प्रकारेण यत्र कुत्रचिद्यदा कदाचिदेवंविधाः पुरुषास्सम्भविष्यन्तीति मत्वा तेषा-मभिमतिविषयत्वेन वेदार्थसंग्रहः कृत इत्यर्थः ॥

वेदार्थसंग्रहसुधां वेदान्ताब्धेर्य आहरत् ।
रामानुजाय मुनये तस्मै भगवते नमः ॥
वेदार्थसंग्रहव्याख्याऽभिहितेयं यथाश्रुता ।
वेदव्यासापराख्यानश्रीसुदर्शनसूरिणा ॥

इति श्रीहरितकुलतिलकश्रीवाग्विजयिसूनुना श्रीवत्साङ्कमिश्रवं-श्येन श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन श्रीमद्वरदाचार्यपाद-सेवासमधिगतवेदार्थसंग्रहतात्पर्येण श्रीसुदर्शनसूरिणा विलिखिता तात्प-र्यदीपिका समाप्ता ॥

श्रीसँव्वत् १९५० आश्विनशुक्लदशम्यां, शुक्रवासरान्वितायां पूर्तिमा-प शोधनकार्यं, पूर्वाचार्यकृपास्पदस्य परमपूरुषकृपासरित्पूरपरीवाहपूर्णपा-त्रस्य सत्संप्रदायाचार्यपण्डितस्वामिश्रीराममिश्रशास्त्रिणः श्रमसेवया ॥

तत्तत्कल्पितयुक्तिभिः शकलशः कृत्वा तदीयं मतम् ।
यच्छिष्यैरुदमर्दि सात्त्वतमतस्पर्धावतामुद्गतिः ॥
यच्चेतः सततं मुकुन्दचरणद्वन्द्वास्पदं वर्तते ।
जीयाद्यामुनिः स योगमहिमप्रत्यक्षतत्त्वत्रयः ॥ १ ॥
वन्दिषीय वरणीयवाङ्मयं वारिधिं वरगुणौघसम्पदाम् ।
वत्सवंश्यवरदार्यसंश्रयं वादिहंसनववारिदं गुरुम् ॥ २ ॥
श्रीविष्णुचित्तपदपङ्कजसङ्गमाय चेतो मम स्पृहयते किमतः परेण ।
नोचेन्ममापि यतिशेखरभारतीनाम्भावः कथम्भवितुमर्हति वाग्विधेयः ॥ ३॥
यः पर्याप्तकलः ख्यातो यतिराजाब्धिचन्द्रमाः ।
कुशलं दिशतान्मेऽसौ कुरुकेश्वरदेशिकः ॥ ४ ॥
तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥ ५ ॥
नमोनमः पूर्वाचार्येभ्यो बोधायनप्रमुखेभ्यः ।